❀ श्रीमते रामानुजाय नमः ❀



वेदान्तदेशिकस्तोत्रमाला

प्रकाशक :

श्री वैकुण्ठनाथ देवस्थान

१२-ए, कालीकृष्ण टैगोर स्ट्रीट,

कलकत्ता-७

ऽऽ श्रीरामाय नमः ऽऽ

पुस्तकञ्च महेशानि यद्गृहे विद्यते सदा ।
काश्यादीनि च तीर्थानि सर्वाणि तस्य मंदिरे ॥

(भूतशुद्धितन्त्र)

श्रीमते रामानुजाय नमः



वेदान्तदेशिकस्तोत्रमाला

प्रकाशक—

श्री वैकुण्ठनाथ देवस्थान

१२-ए, कालीकृष्ण टैगोर स्ट्रीट,

कलकत्ता-७

गुरुपूर्णिमा संवत् २०२६

प्रथम संस्करण ३०००

कलकत्ता

मूल्य एक रु० ५० पैसे

मुद्रक—उदयाचल प्रेस ३१, मुखराम कानोड़िया रोड, हवड़ा



श्री वैकुण्ठनाथ भगवान्

सव्यं पादं प्रसार्य श्रितदुरितहरं दक्षिणं कुञ्चयित्वा,
जानुन्याधाय सव्येतरमितरभुजं नागभोगे निधाय।
पश्चाद्बाहुद्वयेन प्रतिभटशमने धारयन् शंखचक्रे,
देवीभूषादिजुष्टो जनयतु जगतां शर्म वैकुण्ठनाथः॥

श्री हयग्रीवमूर्तिः

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥

दर्शनस्थापकाचार्याः श्रीरामानुजगुरवः

उपवीतिनमूर्ध्वपुण्ड्रवन्तं त्रिजगत्पुण्यफलं त्रिदण्डहस्तम् ।
शरणागतसार्थवाहमीडे शिखया शेखरिणं पतिं यतीनाम् ॥



श्री कवितार्किकसिंहाः सर्वतन्त्रस्वतन्त्राः श्रीमद्वेंकटनाथाः

श्री वेदान्ताचार्याः

जीवनं जगतां जीयात् किमाप्यपगतस्पृहम् ।
स्वतन्त्रं सर्वतन्त्रेषु वेंकटेशाह्वयं महः ॥

श्रीमदुत्तराहोबिल झालरियामठाधिपति १००८
श्री बालमुकुन्दमहादेशिकाः

विषय-सूची

१—आलवन्दार स्तोत्रम्	१
२—वरदवल्लभा स्तोत्रम्	१३
३—हयग्रीव स्तोत्रम्	१४
४—दशावतार स्तोत्रम्	२०
५—भगवद्ध्यान सोपानम्	२३
६—गोपाल विंशतिः	२६
७—श्रीस्तुतिः	३०
८—गोदास्तुतिः	३५
९—भूस्तुतिः	४१
१०—नारायणाष्टकम्	४७
११—सुदर्शनाष्टकम्	४९
१२—वैराग्य पञ्चकम्	५१
१३—न्यासदशकम्	५३
१४—वरदराज पञ्चाशत्	५५
१५—हरिदिन तिलकम्	६४
१६—वेगासेतु स्तोत्रम्	६८
१७—अष्टभुजाष्टकम्	७०
१८—कामासिकाष्टकम्	७२
१९—षोडशायुध स्तोत्रम्	७४
२०—न्यासतिलकम्	७६
२१—न्यासविंशतिः	८२
२२—अभीतिस्तवः	८७
२३—गरुडदण्डकः	९३

२४—गरुडपञ्चाशत्	९५
२५—देवनायक पञ्चाशत्	१०५
२६—अच्चु अ सअ अम् (अच्युतशतकम्)	११५
२७—रघुवीरगद्यम्	१५०
२८—देहलीशस्तुतिः	१५७
२९—परमार्थस्तुतिः	१६३
३०—दयाशतकम्	१६६
३१—यतिराज सप्ततिः	१८४
३२—शरणागति दीपिका	१९६
३३—श्रीमद्वेदान्तदेशिक मंगलाशासनम्	२०७
३४—श्रीमद्वेदान्तदेशिक प्रपत्तिः	२१०
३५—श्रीमद्वेदान्तदेशिकदिनचर्या स्तोत्रम्	२१२
३६—सप्ततिरत्नमालिका	२१७

॥ श्रीः ॥

श्री रमा वैकुण्ठनाथपरब्रह्मणे नमः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

प्रास्ताविकं किञ्चित्

आस्तिक महाशयाः ! अद्येदं विज्ञापयामि युष्माकं सविधे। श्री कवितार्किकसिंह सर्वतन्त्रस्वतन्त्रश्रीमद्वेङ्कटनाथश्रीवेदान्ताचार्यैर्विरचितानां नानाविधानां सरलसमुचितानां संग्रह विस्तृतदशाशोभिनां भगवतो देव्या आचार्यपरंपरायाश्च विषये प्रवृत्तानां स्तोत्राणांकदम्बः इदानीं प्रकाश्यमानः मालेव कालविहिता सर्वेषां आमोदाय भविष्यति।

पूर्वाचार्याः भगवत्तोषकरेषु साधनेषु प्रथमोपायं स्तुतिमेवाङ्गी चक्रुः। परमात्मा तावत् सर्वथा तोषयितव्यएव। यतः संसृत्यक्षर वैष्णवाध्वसु नृणां अरविन्दलोचनस्य अरविन्द संभवायाश्च मनस्तोषंविना न तुषमात्रमपि संभाव्यते कर्हिचित्।

एवं स्तव्य भूतस्स परम पुरुषः स्तवप्रिय इत्यपि प्रथते। स्व स्तुतौ प्रवृत्तानां परिमित शक्तीनामस्मद्विधानां शेषपूरणमपि स्वयमेव विधत्ते सोऽन्तः प्रविश्य वाचमिमां प्रसुप्तां सञ्जीवयन् सन्धुक्षयन्निन्द्रियाणि च हृषीकेशत्वात्। तस्मादुच्यते सः स्तोतेत्यपि। स्तुतिप्रयोजक इतियावत्। तथाहि नामसहस्रके पापठ्यते "स्तव्यः स्तवप्रियस्तोतेति।"

ईदृशस्तोत्रावल्याः प्रथममारम्भः अस्मदाचार्यकुले श्रीमद्यामुनमुनिमूल इति वदन्ति। अनन्तरं श्रीभाष्यकृतः श्रीमत्कूरेशाः तत्पुत्ररत्नभट्टपराशरपादाः इत्युत्तरोत्तरं पुङ्खमाने स्तुतिपूरे चरमाचार्याः श्रीमद्वेदान्तगुरवः

तत्पूरपूर्तिपरश्शतस्तुतिस्तोमसंदर्भणेन व्यदधुरिति विनिश्चितमेव विपश्चिताम् ।

इमानि स्तोत्राण्यनुसन्धीयमानानि व्युत्पन्नानां सद्यः परमात्मनिचित्तं रञ्जयन्ति । संसार मरुकान्तारसंतापं शमयन्ति । भगवन्मुखोल्लासमुखेनेह लोके परत्र च श्रेयो निश्रेयसंचप्रयच्छन्ति । सिद्धान्त तत्वानां परिचयपरिपाटींचोपचिन्वन्ति। अव्युत्पन्ना अप्यहो आचार्य स्तुतिजाल शब्दसौन्दर्याकृष्टदृष्टयोऽदृष्टार्थं तृषितजनता तीर्थस्नान क्रमेणानवरतमत्रावतीर्य विहरन्ति ।

एवमवश्यमभ्यसनीयानामेषां स्तोत्राणामावलिं, आस्तिक भक्तजनेपयोगाय श्रीमन्निगमान्त महादेशिकस्य सप्तशताब्दपूर्ति महोत्सवोपलक्षणरूपेण एते महाभागाः विलक्षण विख्यात वैष्णव श्रीविभूषिताः पुष्कर क्षेत्रे पश्चिमधामनि प्राच्यभूमौ गङ्गासागरसंगमे वङ्गदेशीय कलकत्ता नगरेच विष्णोः विपुलालयनिर्माण, मूर्तिप्रतिष्ठापननित्यपूजा नैमित्तिकमहोत्सवादि सेवा विशेषमनन्यनिरपेक्षं लोकोत्तरं च संचालयन्तः सद्गुरु श्रीबालमुकुन्दमहादेशिककृपापात्रभूताः श्रीमन्तः गोविन्दलाल गोकुलचन्द्र बांगड़ महोदयाः श्रेष्ठिवर्याः प्रकाशयन्ति । सज्जनास्सर्वे एककण्ठमेतन्मुद्रणप्रयासं सफली कुर्वाणाः श्रेष्ठिवर्यस्यास्य सपरिवारस्य सर्वदेश दशा कालेष्वप्यव्याहतैश्वर्यादिकमनुगृह्णन्तः तथैव श्री वैकुण्ठ नाथं प्रार्थयन्तश्चाशीभिरेनं योजयन्तु ॥

इति आनुषङ्गिकमत्रान्वयं प्राप्य पूतो धन्यः परिशोधकश्च

नावलपाक्कम्, रङ्गनाथाचार्यः

प्रधानार्चकः

श्री वैकुण्ठनाथ देवस्थानम्

कलकत्ता

❁ दिव्यदेशमङ्गलाशासनश्लोकाः ❁

विधिविहितसपर्यां वीतदोषानुषङ्गा-
मुपचितधनधान्यामुत्सवैस्त्यानहर्षाम् ।
स्वयमुपचिनु नित्यं रङ्गधामन् स्वरक्षां
शमितविमतपक्षां शाश्वतीं रङ्गलक्ष्मीम् ॥ १ ॥

प्रशमितकलिदोषां प्राज्यभोगानुबन्धां
समुदितगुणजातां सम्यगाचारयुक्ताम् ।
श्रितजन बहुमान्यां श्रेयसीं वेङ्कटाद्रौ
श्रियमुपचिनु नित्यं श्रीनिवासत्वमेव ॥ २ ॥

वरदविरचयत्वं वारिताशेषदोषां
पुनरुपचितपुण्यां भूषितां पुण्यकोट्या ।
सितमुदितमनोभिः तावकैर्नित्यसेव्यां
हतरिपुजनयोगां हस्तिधाम्नस्समृद्धिम् ॥ ३ ॥

नवनवबहुभोगां नाथ नारायण त्वं
विरचय दुरितौघैस्तामनाघ्रातगन्धाम् ।
सहजसुलभदास्यैस्सद्भिरभ्यर्थनीयां
यतिपरिबृढहृद्यां यादवाद्रेस्समृद्धिम् ॥ ४ ॥

|| श्रीः ||

श्री रमा वैकुण्ठनाथपरब्रह्मणे नमः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

प्रास्ताविकं किञ्चित्

आस्तिक महाशयाः ! अद्येदं विज्ञापयामि युष्माकं सविधे। श्री कवितार्किकसिंह सर्वतन्त्रस्वतन्त्रश्रीमद्वेङ्कटनाथश्रीवेदान्ताचार्यैर्विरचितानां नानाविधानां सरलसमुचितानां संग्रह विस्तृतदशाशोभिनां भगवतो देव्या आचार्यपरंपरायाश्च विषये प्रवृत्तानां स्तोत्राणांकदम्बः इदानीं प्रकाश्यमानः मालेव कालविहिता सर्वेषां आमोदाय भविष्यति।

पूर्वाचार्याः भगवत्तोषकरेषु साधनेषु प्रथमोपायं स्तुतिमेवाङ्गी चक्रुः। परमात्मा तावत् सर्वथा तोषयितव्यएव। यतः संसृत्यक्षर वैष्णवाध्वसु नृणां अरविन्दलोचनस्य अरविन्द संभवायाश्च मनस्तोषंविना न तुषमात्रमपि संभाव्यते कर्हिचित्।

एवं स्तव्य भूतस्स परम पुरुषः स्तवप्रिय इत्यपि प्रथते। स्व स्तुतौ प्रवृत्तानां परिमित शक्तीनामस्मद्विधानां शेषपूरणमपि स्वयमेव विधत्ते सोऽन्तः प्रविश्य वाचमिमां प्रसुप्तां सञ्जीवयन् सन्धुक्षयन्निन्द्रियाणि च हृषीकेशत्वात्। तस्मादुच्यते सः स्तोतेत्यपि। स्तुतिप्रयोजक इतियावत्। तथाहि नामसहस्रके पापठ्यते "स्तव्यः स्तवप्रियस्तोतेति।"

ईदृशस्तोत्रावल्याः प्रथममारम्भः अस्मदाचार्यकुले श्री मद्यामुनमुनिमूल इति वदन्ति। अनन्तरं श्रीभाष्यकृतः श्रीमत्कूरेशाः तत्पुत्ररत्नभट्टपराशरपादाः इत्युत्तरोत्तरं पुङ्खमाने स्तुतिपूरे चरमाचार्याः श्रीमद्वेदान्तगुरवः

तत्पूरपूर्तिपरश्शतस्तुतिस्तोमसंदर्भणेन व्यवधुरिति थिनि-श्चितमेव विपश्चिताम् ।

इमानि स्तोत्राण्यनुसन्धीयमानानि व्युत्पन्नानां सद्यः परमात्मनिचित्तं रञ्जयन्ति । संसार मरुकान्तारसंतापं शमयन्ति । भगवन्मुखोल्लासमुखेनेह लोके परत्र च श्रेयो निश्रेयसंचप्रयच्छन्ति । सिद्धान्त तत्वानां परिचयपरिपा-टींचोपचिन्वन्ति। अव्युत्पन्ना अप्यहो आचार्य स्तुतिजाल शब्दसौन्दर्याकृष्टदृष्टयोऽदृष्टार्थं तृषितजनता तीर्थस्नान क्रमेणानवरतमत्रावतीर्य विहरन्ति ।

एवमवश्यमभ्यसनीयानामेषां स्तोत्राणामावलिं, आस्तिक भक्तजनेपयोगाय श्रीमन्निगमान्त महादेशिक-स्य सप्तशताब्दपूर्ति महोत्सवोपलक्षणरूपेण एते महा-भागाः विलक्षण विख्यात वैष्णव श्रीविभूषिताः पुष्कर क्षेत्रे पश्चिमधामनि प्राच्यभूमौ गङ्गासागरसंगमे वङ्ग-देशीय कलकत्ता नगरेच विष्णोः विपुलालयनिर्माण, मूर्तिप्रतिष्ठापननित्यपूजा नैमित्तिकमहोत्सवादि सेवा विशेषमनन्यनिरपेक्षं लोकोत्तरं च संचालयन्तः सद्गुरु श्रीबालमुकुन्दमहादेशिककृपापात्रभूताः श्रीमन्तः गोविन्द-लाल गोकुलचन्द्र बांगड़ महोदयाः श्रेष्ठिवर्याः प्रकाशयन्ति । सज्जनास्सर्वे एककण्ठमेतन्मुद्रणप्रयासं सफली कुर्वाणाः श्रेष्ठिवर्यस्यास्य सपरिवारस्य सर्वदेश दशा कालेष्वप्यव्याहतैश्वर्यादिकमनुगृह्णन्तः तथैव श्री वैकुण्ठ नाथं प्रार्थयन्तश्चाशीर्भिरेनं योजयन्तु ॥

इति आनुषङ्गिकमत्रान्वयं प्राप्य पूतो धन्यः परिशोधकश्च

नावलपाक्कम्, रङ्गनाथाचार्यः

प्रधानार्चकः

श्री वैकुण्ठनाथ देवस्थानम्

कलकत्ता

❁ दिव्यदेशमङ्गलाशासनश्लोकाः ❁

विधिविहितसपर्यां वीतदोषानुषङ्गा-
मुपचितधनधान्यामुत्सवैस्त्यानहर्षाम् ।
स्वयमुपचिनु नित्यं रङ्गधामन् स्वरक्षां
शमितविमतपक्षां शाश्वतीं रङ्गलक्ष्मीम् ॥ १ ॥

प्रशमितकलिदोषां प्राज्यभोगानुबन्धां
समुदितगुणजातां सम्यगाचारयुक्ताम् ।
श्रितजन बहुमान्यां श्रेयसीं वेङ्कटाद्रौ
श्रियमुपचिनु नित्यं श्रीनिवासत्वमेव ॥ २ ॥

वरदविरचयत्वं वारिताशेषदोषां
पुनरुपचितपुण्यां भूषितां पुण्यकोट्या ।
सितमुदितमनोभिः तावकैर्नित्यसेव्यां
हतरिपुजनयोगां हस्तिधाम्नस्समृद्धिम् ॥ ३ ॥

नवनवबहुभोगां नाथ नारायण त्वं
विरचय दुरितौघैस्तामनाघ्रातगन्धाम् ।
सहजसुलभदास्यैस्सद्भिरभ्यर्थनीयां
यतिपरिबृढहृद्यां यादवाद्रेस्समृद्धिम् ॥ ४ ॥

श्रीरङ्ग - द्विरद - वृषाद्रि - पूर्वकेषु
स्थानेषु स्थिर - विभवा भवत्सपर्या ।
आकल्पं वरद विधूतवैरिपक्षा
भूयस्या भवदनुकंपयैव भूयात् ॥ ५ ॥

कल्याणमावहतु कार्तयुगं स्वधर्मं
प्रख्यापयन् प्रणिहितेषु नरादिकेषु ।
आद्यं कमप्यधिगतो रथमष्टचक्रं
बन्धुस्सतां बदरिकाश्रमतापसोनः ॥ ६ ॥

वेदान्तदेशिकस्तोत्रमाला

आलवन्दार स्तोत्रम्

स्वादयन्निह सर्वेषां, त्रय्यन्तार्थं सुदुर्ग्रहम् ।
स्तोत्रयामास योगीन्द्र स्तं वन्दे यामुनाह्वयम् ॥ १

नमो नमो यामुनाय यामुनाय नमो नमः ।
नमो नमो यामुनाय यामुनाय नमो नमः ॥ २

नमो यामुनपादाब्जरेणुभिः पावितात्मने ।
विदिताऽखिलवेदाय गुरवे विदितात्मने ॥ ३

नमोऽचिन्त्याद्भुताऽक्लिष्टज्ञानवैराग्यराशये ।
नाथाय मुनयेऽगाधभगवद्भक्तिसिन्धवे ॥ ४

तस्मै नमो मधुजिदङ्घ्रिसरोजतत्व-
ज्ञानाऽनुरागमहिमाऽतिशयान्तसीम्ने ।
नाथाय नाथमुनयेऽत्र परत्र चाऽपि
नित्यं यदीयचरणौ शरणं मदीयम् ॥ ५

भूयो नमोऽपरिमिताच्युतभक्तितत्त्व-
ज्ञानामृताऽब्धिपरिवाहशुभैर्वचोभिः ।
लोकेऽवतीर्णपरमार्थसमग्रभक्ति-
योगाय नाथमुनये यमिनां वराय ॥ ६

तत्त्वेन यश्चिदचिदीश्वरतत्स्वभाव-
भोगाऽपवर्गतदुपायगतीरुदारः ।
सन्दर्शयन्निरमिमीत पुराणरत्नं
तस्मै नमो मुनिवराय पराशराय ॥ ७

माता पिता युवतयस्तनया विभूतिः
सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपतेर्वकुलाभिरामं
श्रीमत्तदङ्घ्रियुगलं प्रणमामि मूर्ध्ना ॥ ८

यन्मूर्ध्नि मे श्रुतिशिरस्सु च भाति यस्मिन्
अस्मन्मनोरथपथः सकलः समेति ।
स्तोष्यामि नः कुलधनं कुलदैवतं तत्
पादारविन्दमरविन्दविलोचनस्य ॥ ९

तत्त्वेन यस्य महिमार्णवशीकराणुः
शक्यो न मातुमपि शर्वपितामहाद्यैः ।
कर्तुं तदीयममहिमस्तुतिमुद्यताय,
मह्यं नमोऽस्तु कवये निरपत्रपाय ॥ १०

यद्वाश्रमावधि यथामति वाप्यशक्तः
स्तौम्येवमेव खलु तेऽपि सदा स्तुवन्तः ।
वेदाश्चतुर्मुखमुखाश्च महार्णवान्तः
को मज्जतोरणुकुलाचलयोर्विशेषः ॥ ११

किञ्चैष शक्त्यतिशयेन नु तेऽनुकम्प्यः
स्तोताऽपि तु स्तुतिकृतेन परिश्रमेण ।
तत्र श्रमस्तु सुलभो मम मन्दबुद्धे-
रित्युद्यमोऽयमुचितो मम चाब्जनेत्र ॥ १२

नाऽवेक्षसे यदि ततो भुवनान्यमूनि
नालं प्रभो भवितुमेव कुतः प्रवृत्तिः ।
एवं निसर्गसुहृदि त्वयि सर्वजन्तोः
स्वामिन्न चित्रमिदमाश्रितवत्सलत्वम् ॥ १३

स्वाभाविकाऽनवधिकाऽतिशयेशितृत्वं
नारायण ! त्वयि न मृष्यति वैदिकः कः ? ।
ब्रह्मा शिवः शतमखः परमः स्वराडि-
त्येतेऽपि यस्य महिमार्णवविप्रुषस्ते ॥ १४

का श्रीः ? श्रियः परमसत्वसमाश्रयः कः ?
कः पुण्डरीकनयनः ? पुरुषोत्तमः कः ? ।
कस्याऽयुतायुतशतैककलांशकांशे
विश्वं विचित्रचिदचित् प्रविभागवृत्तम् ॥ १५

वेदाऽपहारगुरुपातकदैत्यपीडा-
द्यापद्विमोचनमहिष्ठफलप्रदानैः ।
कोऽन्यः प्रजापशुपतिः परिपाति कस्य
पादोदकेन स शिवः स्वशिरोधृतेन ॥ १६

कस्योदरे हरविरिंचिमुखः प्रपञ्चः
को रक्षतीममजनिष्ट च कस्य नाभेः ।
क्रान्त्वा निगीर्य पुनरुद्गिरति त्वदन्यः
कः केन चैष परवानिति शक्यशङ्कः ॥ १७

त्वां शीलरूपचरितैः परमप्रकृष्ट-
सत्वेन सात्विकतया प्रबलैश्च शास्त्रैः ।
प्रख्यातदैवपरमार्थविदां मतैश्च
नैवाऽऽसुरप्रकृतयः प्रभवन्ति बोद्धुम् ॥ १८

उल्लङ्घितत्रिविधसीमसमातिशायि
सम्भावनं तव परिब्रढिमस्वभावम् ।
मायाबलेन भवताऽपि निगूह्यमानं
पश्यन्ति केचिदनिशं त्वदनन्यभावाः ॥ १९

यदण्डमण्डान्तरगोचरश्च यत्,
दशोत्तराण्यावरणानि यानि च ।
गुणाः प्रधानं पुरुषः परम्पदं
परात्परं ब्रह्म च ते विभूतयः ॥ २०

वशी वदान्यो गुणवानृजुः शुचि-
र्मृदुर्दयालुर्मधुरः स्थिरः समः ।
कृती कृतज्ञस्त्वमसि स्वभावतः
समस्तकल्याणगुणामृतोदधिः ॥ २१

उपर्युपर्यब्जभुवोऽपि पूरुषान्
प्रकल्प्य ते ये शतमित्यनुक्रमात् ।
गिरस्त्वदेकैकगुणावधीप्सया
सदा स्थिता नोद्यमतोऽतिशेरते ॥ २२

त्वदाश्रितानां जगदुद्भवस्थिति-
प्रणाशसंसारविमोचनादयः ।
भवन्ति लीलाविधयश्च वैदिका-
स्त्वदीयगम्भीरमनोऽनुसारिणः ॥ २३

नमो नमो वाङ्मनसोऽतिभूमये
मनो नमो वाङ्मनसैकभूमये ।
नमो नमोऽनन्त महाविभूतये
नमो ममोऽनन्तदयैकसिन्धवे ॥ २४

न धर्मनिष्ठोऽस्मि न चात्मवेदी
न भक्तिमांस्त्वच्चरणारविन्दे ।
अकिञ्चनोऽनन्यगतिः शरण्यं
त्वत्पादमूलं शरणं प्रपद्ये ॥ २५

न निन्दितं कर्म तदस्ति लोके
सहस्रशो यन्न मया व्यधायि ।
सोऽहं विपाकावसरे मुकुन्द !
क्रन्दामि सम्प्रत्यगतिस्तवाग्रे ॥ २६

निमज्जतोऽनन्त ! भवार्णवान्त-
श्चिराय मे कूलमिवासि लब्धः ।
त्वयाऽपि लब्धं भगवन्निदानी-
मनुत्तमं पात्रमिदं दयायाः ॥ २७

अभूतपूर्वं मम भावि किं वा !
सर्वं सहे मे सहजं हि दुःखम् ।
किन्तु त्वदग्रे शरणागतानां
पराभवो नाथ ! न तेऽनुरूपः ॥ २८

निरासकस्यापि न तावदुत्सहे,
महेश ! हातुं तव पादपङ्कजम् ।
रुषा निरस्तोऽपि शिशुस्तनन्धयो
न जातु मातुश्चरणौ जिहासति ॥ २९

तवामृतस्यन्दिनि पादपङ्कजे,
निवेशितात्मा कथमन्यदिच्छति ।
स्थितेऽरविन्दे मकरन्दनिर्भरे
मधुव्रतो नेक्षुरकं हि वीक्षते ॥ ३०

त्वदङ्घ्रिमुद्दिश्य कदाऽपि केनचित्
यथा तथा वाऽपि सकृत् कृतोऽञ्जलिः
तदैव मुष्णात्यशुभान्यशेषतः
शुभानि पुष्णाति न जातु हीयते ॥ ३१

उदीर्णसंसारदवाऽऽशुशुक्षणिं
क्षणेन निर्वाप्य परां च निर्वृतिम् ।
प्रयच्छति त्वच्चरणारुणाम्बुज-
द्वयानुरागामृतसिन्धुशीकरः ॥ ३२

विलासविक्रान्तपराऽवरालयं,
नमस्यदार्तिक्षपणे कृतक्षणम् ।
धनं मदीयं तव पादपंकजं
कदा नु साक्षात् करवाणि चक्षुषा ॥ ३३

कदा पुनः शङ्खरथाङ्गकल्पक-
ध्वजारविन्दांकुशवज्रलाञ्छनम् ।
त्रिविक्रम ! त्वच्चरणाम्बुजद्वयं
मदीयमूर्द्धानमलंकरिष्यति ॥ ३४

विराजमानोज्ज्वलपीतवाससं
स्मिताऽतसीसूनसमाऽमलच्छविम् ।
निमग्ननाभिं तनुमध्यमुन्नतं
विशालवक्षःस्थलशोभिलक्षणम् ॥ ३५

चकासतं ज्याकिणकर्कशैः शुभै-
श्चतुर्भिराजानुविलम्बिभिर्भुजैः ।
प्रियावतंसोत्पलकर्णभूषण-
श्लथालकाबंधविमर्दशंसिभिः ॥ ३६

उदग्रपीनांसविलम्बिकुण्डला-
ऽलकावलीबन्धुरकम्बुकन्धरम् ।
मुखश्रिया न्यक्कृतपूर्णनिर्मला-
ऽमृतांशुबिम्बांबुरुहोज्वलश्रियम् ॥ ३७

प्रबुद्धमुग्धाम्बुजचारुलोचनम्
सविभ्रमभ्रू लतमुज्ज्वलाऽधरम् ।
शुचिस्मितं कोमलगण्डमुन्नसं
ललाटपर्यन्तविलम्बितालकम् ॥ ३८

स्फुरत्किरीटाङ्गदहारकण्ठिका
मणीन्द्रकाञ्चीगुणनूपुरादिभिः ।
रथाङ्गशंखासिगदाधनुर्वर-
र्लसत्तुलस्या वनमालयोज्ज्वलम् ॥ ३९

चकर्थ यस्या भवनं भुजान्तरं
तव प्रियं धाम यदीयजन्मभूः ।
जगत्समग्रं यदपांगसंश्रयं
यदर्थमम्भोधिरमन्थ्यबन्धि च ॥ ४०

स्ववैश्वरूप्येण सदाऽनुभूतया-
ऽप्यपूर्ववद्विस्मयमादधानया ।
गुणेन रूपेण विलासचेष्टितैः
सदा तवैवोचितया तव श्रिया ॥ ४१

तया सहासीनमनन्तभोगिनि
प्रकृष्टविज्ञानबलैकधामनि ।
फणामणिव्रातमयूखमण्डल-
प्रकाशमानोदरदिव्यधामनि ॥ ४२

निवासशय्यासनपादुकांशुको-
पधानवर्षातपवारणादिभिः ।
शरीरभेदैस्तव शेषतांगतै-
र्यथोचितं शेष इतीरिते जनैः ॥ ४३

दासः सखा वाहनमासनं ध्वजो,
यस्ते वितानं व्यजनं त्रयीमयः ।
उपस्थितं तेन पुरो गरुत्मता,
त्वदङ्घ्रिसम्मर्दकिणाङ्कशोभिना ॥ ४४

त्वदीयभुक्तोज्झितशेषभोजिना,
त्वया विसृष्टात्मभरेण यद्यथा ।
प्रियेण सेनापतिना निवेदितं,
तथाऽनुजानन्तमुदारवीक्षणैः ॥ ४५

हताऽखिलक्लेशमलैः स्वभावत-
स्त्वदानुकूल्यैकरसैस्तवोचितैः ।
गृहीततत्तत्परिचारसाधनै-
र्निषेव्यमाणं सचिवैर्यथोचितम् ॥ ४६

अपूर्वनानारसभावनिर्भर-
प्रबुद्धया मुग्धविदग्धलीलया ।
क्षणाऽणुवत्क्षिप्तपरादिकालया
प्रहर्षयन्तं महिषीं महाभुजम् ॥ ४७

अचिन्त्यदिव्याद्भुतनित्ययौवन-
स्वभावलावण्यमयाऽमृतोदधिम् ।
श्रियः श्रियं भक्तजनैकजीवितं
समर्थमापत्सखमर्थिकल्पकम् ॥ ४८

भवन्तमेवाऽनुचरन्निरन्तरम्
प्रशान्तनिश्शेषमनोरथान्तरः ।
कदाऽहमैकान्तिकनित्यकिङ्करः
प्रहर्षयिष्यामि सनाथजीवितम् ॥ ४९

धिगशुचिमविनीतं निर्दयं मामलज्जं
परमपुरुष ! योऽहं योगिवर्याग्रगण्यैः ।
विधिशिवसनकाद्यैर्ध्यातुमत्यन्तदूरं
तव परिजनभावं कामये कामवृत्तः ॥ ५०

अपराधसहस्रभाजनं
पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे !
कृपया केवलमात्मसात्कुरु ॥ ५१

अविवेकघनान्धदिङ्मुखे,
बहुधा सन्ततदुःखवर्षिणि ।
भगवन् ! भव दुर्दिने,
पथस्स्खलितं मामवलोकयाच्युत ॥ ५२

न मृषा परमार्थमेव मे
शृणु विज्ञापनमेकमग्रतः ।
यदि मे न दयिष्यसे ततो
दयनीयस्तव नाथ ! दुर्लभः ॥ ५३

तदहं त्वदृते न नाथवान्
मदृते त्वं दयनीयवान्न च ।
विधिनिर्मितमेतदन्वयं
भगवन् पालय मा स्म जीहपः ॥ ५४

वपुरादिषु योऽपि कोऽपि वा
गुणतोऽसानि यथा तथाविधः ।
तदयं तव पादपद्मयो-
रहमद्यैव मया समर्पितः । ५५

मम नाथ ! यदस्ति योऽस्म्यहं,
सकलं तद्धि तवैव माधव !
नियतस्स्वमिति प्रबुद्धधी-
रथवा किन्नु समर्पयामि ते ॥ ५६

अवबोधितवानिमां यथा,
मयि नित्यां भवदीयतां स्वयम् ।
कृपयैवमनन्यभोग्यतां,
भगवन् भक्तिमपि प्रयच्छ मे ॥ ५७

तव दास्यसुखैकसङ्गिनां
भवनेष्वस्त्वपि कीटजन्म मे ।
इतरावसथेषु मास्म भू-
दपि मे जन्म चतुर्मुखात्मना ॥ ५८

सकृत्त्वदाकारविलोकनाशया
तृणीकृताऽनुत्तमभुक्तिमुक्तिभिः ।
महात्मभिर्मामवलोक्यतां नय
क्षणेऽपि ते यद्विरहोऽतिदुस्सहः ॥ ५९

न देहं न प्राणान्न च सुखमशेषाऽभिलषितं
न चात्मानं नान्यत्किमपि तव शेषत्वविभवात् ।
बहिर्भूतं नाथ ! क्षणमपि सहे यातु शतधा
विनाशं तत्सत्यं मधुमथन ! विज्ञापनमिदम् ॥ ६०

दुरन्तस्यानादेरपरिहरणीयस्य महतो
विहीनाचारोऽहं नृपशुरशुभस्यास्पदमपि ।
दयासिन्धो ! बन्धो निरवधिकवात्सल्यजलधे !
तव स्मारं स्मारं गुणगणमितीच्छामि गतभीः ॥ ६१

अनिच्छन्नप्येवं यदि पुनरितीच्छन्निव रज-
स्तमश्छन्नश्छद्मस्तुतिवचनभङ्गीमरचयम् ।
तथापीत्थं रूपं वचनतवलम्ब्याऽपि कृपया
त्वमेवैवंभूतं धरणिधर ! मे शिक्षय मनः ॥ ६२

पिता त्वं माता त्वं दयिततनयस्त्वं प्रिय सुहृत्
त्वमेव त्वं मित्रं गुरुरपि गतिश्चासि जगताम् ।
त्वदीयस्त्वद्भृत्यस्तव परिजनस्त्वद्गतिरहं
प्रपन्नश्चैवं सत्यहमपि तवैवास्मि हि भरः ॥ ६३

जनित्वाहं वंशे महति जगति ख्यातयशसां,
शुचीनां युक्तानां गुणपुरुषतत्त्वस्थितिविदाम् ।
निसर्गादेव त्वच्चरणकमलैकान्तमनसा-
मधोऽधःपापात्मा शरणद ! निमज्जामि तमसि ॥६४

अमर्यादः क्षुद्रश्चलमतिरसूयाप्रसवभूः,
कृतघ्नो दुर्मानी स्मरपरवशो वञ्चनपरः ।
नृशंसः पापिष्ठः कथमहमितो दुःखजलधे-
रपारादुत्तीर्णस्तव परिचरेयं चरणयोः ॥ ६५

रघुवर ! यदभूस्त्वं तादृशो वायसस्य,
प्रणत इति दयालुर्यच्च चैद्यस्य कृष्ण !
प्रतिभवमपराद्धुर्मुग्ध ! सायुज्यदोऽभू-
र्वद किमुपदमागसस्य तेऽस्ति क्षमायाः ॥ ६६

ननु प्रपन्नः सकृदेव नाथ !
तवाहमस्मीति च याचमानः ।
तवानुकम्प्यः स्मरतः प्रतिज्ञां,
मदेकवर्जं किमिदं व्रतन्ते ॥ ६७

अकृत्रिमत्वच्चरणारविन्द-
प्रेमप्रकर्षाऽवधिमात्मवन्तम् ।
पितामहं नाथमुनिं विलोक्य,
प्रसीद मद्वृत्तमचिन्तयित्वा ॥ ६८

यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं, यामुनेयं नमामि तम् ॥ ६९

—०—

अथ वरदवल्लभा स्तोत्रम्

कान्तस्ते पुरुषोत्तमः फणिपतिः शय्यासनं वाहनं
वेदात्मा विहगेश्वरो यवनिका माया जगन्मोहिनी ।
ब्रह्मेशादिसुरव्रजस्सदयितस्त्वद्दासदासीगणः,
श्रीरित्येव च नाम ते भगवति ब्रूमः कथं त्वां वयम् ॥ १

यस्यास्ते महिमानमात्मन इव त्वद्वल्लभोऽपि प्रभु-
र्नाऽलं मातुमियत्तया निरवधिं नित्याऽनुकूलं स्वतः ।
तां त्वां दास इति प्रसन्न इति च स्तोष्याम्यहं निर्भयो,
लोकैकेश्वरि लोकनाथदयिते दान्ते दयां ते विदन् ॥ २

ईषत्त्वत्करुणानिरीक्षणसुधासन्धुक्षणाद्रक्ष्यते,
नष्टं प्राक्तदलाभतस्त्रिभुवनं सम्प्रत्यनन्तोदयम् ।
श्रेयो न ह्यरविन्दलोचनमनःकान्ताप्रसादादृते,
संसृत्यक्षरवैष्णवाध्वसु नृणां संभाव्यते कर्हिचित् ॥ ३

शान्ताऽनन्तमहाविभूतिपरमं यद्ब्रह्मरूपं हरे-
र्मूर्तं ब्रह्म ततोऽपि तत्प्रियतरं रूपं यदत्यद्भुतम् ।
यान्यन्यानि यथासुखं विहरतो रूपाणि सर्वाणि ता-
न्याहुः स्वैरनुरूपरूपविभवैर्गाढोपगूढानि ते ॥ ४

आकारत्रयसम्पन्नामरविन्दनिवासिनीम् ।
अशेषजगदीशित्रीं वन्दे वरदवल्लभाम् ॥ ५

—०—

॥ श्रीमते हयवदनपरब्रह्मणे नमः ॥

श्रीहयग्रीवस्तोत्रम्

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥ १

स्वतःसिद्धं शुद्धस्फटिकमणिभूभृत्प्रतिभटं ।
सुधासध्रीचीभिर्द्युतिभिरवदातत्रिभुवनम् ।
अनन्तैस्त्रय्यन्तैरनुविहितहेषाहलहलं ।
हताशेषावद्यं हयवदनमीडीमहि महः ॥ २

समाहारः साम्नां प्रतिपदमृचां धाम यजुषां
लयः प्रत्यूहानां लहरिविततिर्बोधजलधेः
कथादर्पक्षुभ्यत्कथककुलकोलाहलभवं
हरत्वन्तर्ध्वान्तं हयवदनहेषाहलहलः ॥ ३

प्राची संध्या काचिदन्तर्निशायाः
प्रज्ञादृष्टेरञ्जनश्रीरपूर्वा ।
वक्त्री वेदान्भातु मे वाजिवक्त्रा
वागीशाख्या वासुदेवस्य मूर्तिः ॥ ४

विशुद्धविज्ञानघनस्वरूपं
विज्ञानविश्राणनबद्धदीक्षम् ।
दयानिधिं देहभृतां शरण्यं
देवं हयग्रीवमहं प्रपद्ये ॥ ५

अपौरुषेयैरपि वाक्प्रपञ्चै
रद्यापि ते भूतिमदृष्टपाराम् ।
स्तुवन्नहं मुग्ध इति त्वयैव
कारुण्यतो नाथ कटाक्षणीयः ॥ ६

दाक्षिण्यरम्या गिरिशस्य मूर्ति-
र्देवी सरोजासनधर्मपत्नी ।
व्यासादयोऽपि व्यपदेश्यवाचः
स्फुरन्ति सर्वे तव शक्तिलेशैः ॥ ७

मन्दोऽभविष्यन्नियतं विरिञ्चो
वाचांनिधे ! वञ्चितभागधेयः ।
दैत्यापनीतान्दययैव भूयो-
ऽप्यध्यापयिष्यो निगमान्न चेत्त्वम् ॥ ८

वितर्कडोलां व्यवधूय सत्त्वे
बृहस्पतिं वर्तयसे यतस्त्वम् ।
तेनैव देव त्रिदशेश्वराणा-
मस्पृष्टडोलायितमाधिराज्यम् ॥ ९

अग्नौ समिद्धार्चिषि सप्ततन्तो-
रातस्थिवान्मन्त्रमयं शरीरम् ।
अखंडसारैर्हविषां प्रदानै-
राप्यायनं व्योमसदां विधत्से ॥ १०

यन्मूलमीदृक्प्रतिभाति तत्त्वं
या मूलमाम्नायमहाद्रुमाणाम्
तत्त्वेन जानन्ति विशुद्धसत्त्वा-
स्तामक्षरामक्षरमातृकां ते ॥ ११

अव्याकृताद्व्याकृतवानसि त्वं
नामानि रूपाणि च यानि पूर्वम् ।
शंसन्ति तेषां चरमां प्रतिष्ठां
वागीश्वर त्वां त्वदुपज्ञवाचः ॥ १२

मुग्धेन्दुनिष्यन्दविलोभनीयां
मूर्तिं तवानन्दसुधाप्रसूतिम् ।
विपश्चितश्चेतसि भावयन्ते
वेलामुदारामिव दुग्धसिन्धोः ॥ १३

मनोगतं पश्यति यः सदा त्वां
मनीषिणां मानसराजहंसम् ।
स्वयं पुरोभावविवादभाजः
किं कुर्वते तस्य गिरो यथार्हम् ॥ १४

अपि क्षणार्धं कलयन्ति ये त्वा-
माप्लावयन्तं विशदैर्मयूखैः ।
वाचां प्रवाहैरनिवारितैस्ते
मन्दाकिनीं मन्दयितुं क्षमन्ते ॥ १५

स्वामिन्भवद्ध्यानसुधाभिषेका-
द्वहन्ति धन्याः पुलकानुबन्धम् ।
अलक्षिते क्वापि निरूढमूल-
मङ्गेष्विवानन्दथुमङ्कुरन्तम् ॥ १६

स्वामिन्प्रतीचा हृदयेन धन्या-
स्त्वद्ध्यानचन्द्रोदयवर्धमानम् ।
अमान्तमानन्दपयोधिमन्तः
पयोभिरक्ष्णां परिवाहयन्ति ॥ १७

स्वैरानुभावास्त्वदधीनभावाः
समृद्धवीर्यास्त्वनुग्रहेण ।
विपश्चितो नाथ तरन्ति मायां
वैहारिकीं मोहन पिञ्छिकां ते ॥ १८

प्राङ्निर्मितानां तपसां विपाकाः
प्रत्यग्रनिःश्रेयससंपदो मे ।
समेधिषीरंस्तव पादपद्मे
संकल्पचिन्तामणयः प्रणामाः ॥ १९

विलुप्तमूर्धन्यलिपिक्रमाणां
सुरेन्द्रचूडापदलालितानाम् ।
त्वदङ्घ्रिराजीवरजःकणानां
भूयान्प्रसादो मयि नाथ भूयात् ॥ २०

परिस्फुरन्नूपुरचित्रभानु-
प्रकाशनिर्धूततमोनुषङ्गाम् ।
पदद्वयीं ते परिचिन्महेऽन्तः
प्रबोधराजीवविभातसंध्याम् ॥ २१

त्वत्किंकरालंकरणोचितानां
त्वयैव कल्पान्तरपालितानाम् ।
मञ्जुप्रणादं मणिनूपुरं ते
मञ्जूषिकां वेदगिरां प्रतीमः ॥ २२

संचिन्तयामि प्रतिभादशास्था-
न्संधुक्षयन्तं समयप्रदीपान् ।
विज्ञानकल्पद्रुमपल्लवाभं
व्याख्यानमुद्रामधुरं करं ते ॥ २३

चित्ते करोमि स्फुरिताक्षमालं
सव्येतरं नाथ करं त्वदीयम् ।
ज्ञानामृतोदञ्चनलम्पटानां
लीलाघटीयन्त्रमिवाश्रितानाम् ॥ २४

प्रबोधसिन्धोररुणैः प्रकाशैः
प्रवालसंघातमिवोद्वहन्तम् ।
विभावये देव सपुस्तकं ते
वामं करं दक्षिणमाश्रितानाम् ॥ २५

तमांसि भित्त्वा विशदैर्मयूखैः
संप्रीणयन्तं विदुषश्चकोरान् ।
निशामये त्वां नवपुण्डरीके
शरद्घने चन्द्रमिव स्फुरन्तम् ॥ २६

दिशन्तु मे देव सदा त्वदीया
दयातरङ्गानुचराः कटाक्षाः ।
श्रोत्रेषु पुंसाममृतं क्षरन्तीं
सरस्वतीं संश्रितकामधेनुम् ॥ २७

विशेषवित्पारिषदेषु नाथ
विदग्धगोष्ठीसमराङ्गणेषु ।
जिगीषतो मे कवितार्किकेन्द्रान्
जिह्वाग्रसिंहासनमभ्युपेयाः ॥ २८

त्वां चिन्तयंस्त्वन्मयतां प्रपन्न-
स्त्वामुद्गृणन् शब्दमयेन धाम्ना ।
स्वामिन्समाजेषु समेधिषीय
स्वच्छंदवादाहवबद्धशूरः ॥ २९

नानाविधानामगतिः कलानां
न चापि तीर्थेषु कृतावतारः ।
ध्रुवं तवानाथपरिग्रहाया
नवं नवं पात्रमहं दयायाः ॥ ३०

अकम्पनीयान्यपनीतिभेदै-
रलंकृषीरन्हृदयं मदीयम् ।
शंङ्काकलङ्कापगमोज्ज्वलानि
तत्त्वानि सम्यञ्चि तव प्रसादात् ॥ ३१

व्याख्यामुद्रां करसरसिजैः पुस्तकं शङ्खचक्रे
बिभ्रद्भिन्नस्फटिकरुचिरे पुण्डरीके निषण्णः ।
अम्लानश्रीरमृतविशदैरंशुभिः प्लावयन्मा-
माविर्भूयादनघमहिमा मानसे वागधीशः ॥ ३२

वागर्थसिद्धिहेतोः
पठत हयग्रीवसंस्तुतिं भक्त्या ।
कवितार्किककेसरिणा
वेङ्कटनाथेन विरचितामेताम् ॥

—०—

॥ श्रीः ॥

दशावतार स्तोत्रम् ।

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

देवो नः शुभमातनोतु दशधा निर्वर्तयन्भूमिकां
रङ्गे धामनि लब्धनिर्भररसैरध्यक्षितो भावुकैः ।
यद्भावेषु पृथग्विधेष्वनुगुणान्भावान्स्वयं बिभ्रती
यद्धर्मैरिह धर्मिणी विहरते नानाकृतिर्नायिका ॥ १

निर्मग्नश्रुतिजालमार्गणदशादत्तक्षणैर्वीक्षणै-
रन्तस्तन्वदिवारविन्दगहनान्यौदन्वतीनामपाम् ।
निष्प्रत्यूहतरङ्गरिङ्गणमिथःप्रत्यूढपाथश्छटा-
डोलारोहसदोहलं भगवतो मात्स्यं वपुः पातु नः ॥ २

अव्यासुर्भुवनत्रयीमनिभृतं कण्डूयनैरद्रिणा
निद्राणस्य परस्य कूर्मवपुषो निश्वाससवातोर्मयः ।
यद्विक्षेपणसंस्कृतोदधिपयःप्रेङ्खोलपर्यङ्किका-
नित्यारोहणनिर्वृतो विहरते देवः सहैव श्रिया ॥ ३

गोपायेदनिशं जगन्ति कुहनापोत्री पवित्रीकृत-
ब्रह्माण्डः प्रलयोर्मिघोषगुरुभिर्घोणारवैर्घुर्घुरैः ।
यद्दंष्ट्राङ्कुरकोटिगाढघटनानिष्कम्पनित्यस्थिति-
ब्रह्मस्तम्बमसौदसौ भगवती मुस्तेव विश्वंभरा ॥ ४

प्रत्यादिष्टपुरातनप्रहरणग्रामः क्षणं पाणिजै-
रव्यात्त्रीणि जगन्त्यकुण्ठमहिमा वैकुण्ठकण्ठीरवः ।
यत्प्रादुर्भवनादवन्ध्यजठरा यादृच्छिकाद्वेधसां
या काचित्सहसा महासुरगृहस्थूणा पितामह्यभूत् ॥ ५

व्रीडाविद्धवदान्यदानवयशोनासीरधाटीभट-
स्त्रैयक्षं मुकुटं पुनन्भवतु नस्त्रैविक्रमो विक्रमः ।
यत्प्रस्तावसमुच्छ्रितध्वजपटीवृत्तान्तसिद्धान्तिभिः
स्रोतोभिः सुरसिन्धुरष्टसु दिशासौधेषु दोधूयते ॥ ६

क्रोधाग्निं जमदग्निपीडनभवं संतर्पयिष्यन्क्रमा-
दक्षत्रामपि संततक्ष य इमां त्रिःसप्तकृत्वः क्षितिम् ।
दत्त्वा कर्मणि दक्षिणां क्वचन तामास्कन्द्य सिन्धुं वस-
न्नब्रह्मण्यमपाकरोतु भगवानाब्रह्मकीटं मुनिः ॥ ७

पारावारपयोविशोषणकलापारीणकालानल-
ज्वालाजालविहारहारिविशिखव्यापारघोरक्रमः ।
सर्वावस्थसकृत्प्रपन्नजनतासंरक्षणैकव्रती
धर्मो विग्रहवानधर्मविरतिं धन्वी स तन्वीत नः ॥ ८

फक्कत्कौरवपट्टणप्रभृतयः प्रास्तप्रलम्बादय-
स्तालाङ्कस्य तथाविधा विहृतयस्तन्वन्तु भद्राणि नः ।
क्षीरं शर्करयेव याभिरपृथग्भूताः प्रभूतैर्गुणै-
राकौमारकमस्वदन्त जगते कृष्णस्य ताः केलयः ॥ ९

नाथायैव नमःपदं भवतु नश्चित्रैश्चरित्रक्रमै-
र्भूयोभिर्भुवनान्यमूनि कुहनागोपाय गोपायते ।
कालिन्दीरसिकाय कालियफणिस्फारस्फटावाटिका-
रङ्गोत्सङ्गविशङ्कचंक्रमधुरापर्यायचर्यायते ॥ १०

भाविन्या दशया भवन्निह भवध्वंसाय नः कल्पतां
कल्की विष्णुयशस्सुतः कलिकथाकालुष्यकूलंकषः ।
निःशेषक्षतकण्टके क्षितितले धाराजलौघैर्ध्रुवं
धर्मं कार्तयुगं प्ररोहयति यन्निस्त्रिंशधाराधरः ॥ ११

इच्छामीन विहारकच्छप महापोत्रिन्यदृच्छाहरे
रक्षावामन रोषराम करुणाकाकुत्स्थ हेलाहलिन् ।
क्रीडावल्लव कल्कवाहनदशाकल्किन्निति प्रत्यहं
जल्पन्तः पुरुषाः पुनन्ति भुवनं पुण्यौघपण्यापणाः ॥ १२

विद्योदन्वति वेङ्कटेश्वरकवौ जातं जगन्मङ्गलं
देवेशस्य दशावतारविषयं स्तोत्रं विवक्षेत यः ।
वक्त्रे तस्य सरस्वती बहुमुखी भक्तिः परा मानसे
शुद्धिः कापि तनौः दिशासु दशसु ख्यातिः शुभा जृम्भते ॥ १३

दशावतारस्तोत्रं संपूर्णम् ॥

—:०:—

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

———

॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

———

॥ श्रीः ॥

भगवद्ध्यानसोपानम् ।

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

अन्तर्ज्योतिः किमपि यमिनामञ्जनं योगदृष्टे-
श्चिन्तारत्नं सुलभमिह नः सिद्धिमोक्षानुरूपम् ।
दीनानाथव्यसनशमनं दैवतं दैवतानां
दिव्यं चक्षुः श्रुतिपरिषदां दृश्यते रङ्गमध्ये ॥ १

वेलातीतश्रुतिपरिमलं वेधसां मौलिसेव्यं
प्रादुर्भूतं कनकसरितः सैकते हंसजुष्टे ।
लक्ष्मीभूम्योः करसरसिजैर्लालितं रङ्गभर्तुः
पादाम्भोजं प्रतिफलति मे भावनादीर्घिकायाम् ॥ २

चित्राकारां कटकरुचिभिश्चारुवृत्तानुपूर्वां
काले दृत्यद्रुततरगतिं कान्तिलीलाकलाचीम् ।
जानुच्छायाद्विगुणसुभगां रङ्गभर्तुर्मदात्मा
जङ्घां दृष्ट्वाजननपदवीजाङ्घिकत्वं जहाति ॥ ३

कामारामस्थिरकदलिकास्तम्भसंभावनीयं
क्षौमाश्लिष्टं किमपि कमलाभूमिनीलोपधानम् ।
न्यञ्चत्काञ्चीकिरणरुचिरं निर्विशत्यूरुयुग्मं
लावण्यौघद्वयमिव मतिर्मामिका रङ्गयूनः ॥ ४

संप्रीणाति प्रतिकलमसौ मानसं मे सुजाता
गम्भीरत्वात्क्वचन समये गूढनिक्षिप्तविश्वा ।
नालीकेन स्फुरितरजसा वेधसोनिर्मिमाणा
रम्यावर्तद्युतिसहचरी रङ्गनाथस्य नाभिः ॥ ५

श्रीवत्सेन प्रथितविभवं श्रीपदन्यासधन्यं
मध्यं बाह्वोर्मणिवररुचा रञ्जितं रङ्गधाम्नः ।
सान्द्रच्छायं तरुणतुलसीचित्रया वैजयन्त्या
संतापं मे शमयति धियश्चन्द्रिकोदारहारम् ॥ ६

एकं लीलोपहितमितरं बाहुमाजानुलम्बं
प्राप्ता रङ्गे शयितुरखिलप्रार्थनापारिजातम् ।
दृप्ता सेयं दृढनियमिता रश्मिभिर्भूषणानां
चिन्ताहस्तिन्यनुभवति मे चित्रमालानयन्त्रम् ॥ ७

साभिप्रायस्मितविकसितं चारुबिम्बाधरोष्ठं
दुःखापायप्रणयिनि जने दूरदत्ताभिमुख्यम् ।
कान्तं वक्त्रं कनकतिलकालंकृतं रङ्गभर्तुः
स्वान्ते गाढं मम विलगति स्वागतोदारनेत्रम् ॥ ८

माल्यैरन्तःस्थिरपरिमलैर्वल्लभास्पर्शमान्यैः
कुप्यच्चोलीवचनकुटिलैः कुन्तलैःश्लिष्टमूले ।
रत्नापीडद्युतिशबलिते रङ्गभर्तुः किरीटे
राजन्वत्यः स्थितिमधिगता वृत्तयश्चेतसो मे ॥ ९

पादाम्भोजं स्पृशति भजते रङ्गनाथस्य जंघा-
मूरुद्वन्द्वे विलगति शनैरूर्ध्वमभ्येति नाभिम् ।
वक्षस्यास्ते वलति भुजयोर्मामिकेयं मनीषा
वक्त्राभिख्यां पिबति वहते वासनां मौलिबन्धे ॥ १०

कान्तोदारैरयमिह भुजैः कङ्कणज्याकिणाङ्कै-
र्लक्ष्मीधाम्नः पृथुलपरिघैर्लक्षिताभीतिहेतिः ।
अग्रे किञ्चिद्भुजगशयनः स्वात्मनैवात्मनः सन्
मध्येरङ्गं मम च हृदये वर्तते सावरोधः ॥ ११

रङ्गा स्थाने रसिकमहिते रञ्जिताशेषचित्ते
विद्वत्सेवाविमलमनसा वेङ्कटेशेन क्लृप्तम् ।
अक्लेशेन प्रणिहितधियामारुरुक्षोरवस्थां
भक्तिं गाढां दिशतु भगवद्ध्यानसोपानमेतत् ॥ १२

—०—

॥ भगवद्ध्यानसोपानं संपूर्णम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

॥ श्रीः ॥

गोपालविंशतिः

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

वन्दे बृन्दावनचरं वल्लवीजनवल्लभम् ।
जयन्तीसंभवं धाम वैजयन्तीविभूषणम् ॥ १

वाचं निजाङ्करसिकां प्रसमीक्षमाणो
वक्त्रारविन्दविनिवेशितपाञ्चजन्यः ।
वर्णत्रिकोणरुचिरे वरपुण्डरीके
बद्धासनो जयति वल्लवचक्रवर्ती ॥ २

आम्नायगन्धिरुदितस्फुरिताधरोष्ठ-
मास्राविलेक्षणमनुक्षणमन्दहासम् ।
गोपालडिम्भवपुषं कुहनाजनन्याः
प्राणस्तनंधयमवैमि परं पुमांसम् ॥ ३

आविर्भवत्वनिभृताभरणं पुरस्ता-
दाकुञ्चितैकचरणं निभृतान्यपादम् ।
दध्ना निमन्थमुखरेण निबद्धतालं
नाथस्य नन्दभवने नवनीतनाट्यम् ॥ ४

हर्तुं कुम्भे विनिहितकरः स्वादु हैयङ्गवीनं
दृष्ट्वा दामग्रहणचटुलां मातरं जातरोषाम् ।
पायादीषत्प्रचलितपदो नापगच्छन्न तिष्ठन्
मिथ्यागोपः सपदि नयने मीलयन्विश्वगोप्ता ॥ ५

व्रजयोषिदपाङ्गवेधनीयं
मधुराभाग्यमनन्यभोग्यमीडे ।
वसुदेववधूस्तनंधयं त-
त्किमपि ब्रह्म किशोरभावदृश्यम् ॥ ६

परिवर्तितकंधरं भयेन
स्मितफुल्लाधरपल्लवं स्मरामि ।
विटपित्वनिरासकं कयोश्चि-
द्विपुलोलूखलकर्षकं कुमारम् ॥ ७

निकटेषु निशामयामि नित्यं
निगमान्तैरधुनापि मृग्यमाणम् ।
यमलार्जुनदृष्टबालकेलिं
यमुनासाक्षिकयौवनं युवानम् ॥ ८

पदवीमदवीमसीं विमुक्ते-
रटवीसंपदमम्बुवाहयन्तीम् ।
अरुणाधरसाभिलाषवंशां
करुणां कारणमानुषीं भजामि ॥ ९

अनिमेषनिषेवणीयमक्ष्णो-
रजहद्यौवनमाविरस्तु चित्ते ।
कलहायितकुन्तलं कलापैः
करणोन्मादकविभ्रमं महो मे ॥ १०

अनुयायि मनोज्ञवंशनालै-
रवतु स्पर्शितवल्लवीविमोहैः ।
अनघस्मितशीतलैरसौ मा-
मनुकम्पासरिदम्बुजैरपाङ्गैः ॥ ११

अधराहितचारुवंशनाला
मुकुटालम्बिमयूरपिञ्छमालाः ।
हरिनीलशिलाविभङ्गनीलाः
प्रतिभाः सन्तु ममान्तिमप्रयाणे १२

अखिलानवलोकयामि काला-
न्महिलाधीनभुजान्तरस्य यूनः ।
अभिलाषपदं व्रजाङ्गनाना-
मभिलापक्रमदूरमाभिरूप्यम् ॥ १३

हृदि मुग्धशिखण्डमण्डनो
लिखितः केन ममैष शिल्पिना ।
मदनातुरवल्लवाङ्गना-
वदनाम्भोजदिवाकरो युवा ॥ १४

महसे महिताय मौलिना
विनतेनाञ्जलिमञ्जनत्विषे ।
कलयामि विमुग्धवल्लवी-
वलयाभाषितमञ्जुवेणवे ॥ १५

जयति ललितवृत्तिं शिक्षितो वल्लवीनां
शिथिलवलयशिञ्जाशीतलैर्हस्ततालैः ।
अखिलभुवनरक्षागोपवेषस्य विष्णो-
रधरमणिसुधायामंशवान्वंशनालः ॥ १६

चित्राकल्पः श्रवसि कलयँल्लाङ्गलीकर्णपूरं
बर्होत्तंसस्फुरितचिकुरो बन्धुजीवं दधानः ।
गुञ्जाबद्धामुरसि ललितां धारयन्हारयष्टिं
गोपस्त्रीणां जयति कितवः कोऽपि कौमारहारी ॥ १७

लीलायष्टिं करकिसलये दक्षिणे न्यस्य धन्या-
मंसे देव्याः पुलकरुचिरे संनिविष्टान्यबाहुः ।
मेघश्यामो जयति ललितो मेखलादत्तवेणु-
गुञ्जापीडस्फुरितचिकुरो गोपकन्याभुजंगः ॥ १८

प्रत्यालीढस्थितिमधिगतां प्राप्तगाढाङ्कपालिं
पश्चादीषन्मिलितनयनां प्रेयसीं प्रेक्षमाणः ।
भस्त्रायन्त्रप्रणिहितकरो भक्तजीवातुरव्या-
द्वारिक्रीडानिबिडवसनो वल्लवीवल्लभो नः ॥ १९

वासो हृत्वा दिनकरसुतासंनिधौ वल्लवीनां
लीलास्मेरो जयति ललितामास्थितः कुन्दशाखाम् ।
सव्रीडाभिस्तदनु वसने ताभिरभ्यर्थ्यमाने
कामी कश्चित्करकमलयोरञ्जलिं याचमानः ॥ २०

इत्यनन्यमनसा विनिर्मिता
वेङ्कटेशकविना स्तुतिं पठन् ।
दिव्यवेणुरसिकं समीक्षते
दैवतं किमपि यौवतप्रियम् ॥ २१

॥ गोपालविंशतिः संपूर्णा ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥
॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

॥ श्रीः ॥

श्रीस्तुतिः

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

मानातीतप्रथितविभवां मङ्गलं मङ्गलानां
वक्षः पीठीं मधुविजयिनो भूषयन्तीं स्वकान्त्या ।
प्रत्यक्षानुश्रविकमहिमप्रार्थिनीनां प्रजानां
श्रेयोमूर्तिं श्रियमशरणस्त्वां शरण्यां प्रपद्ये ॥ १

आविर्भावः कलशजलधावध्वरे वापि यस्याः
स्थानं यस्याः सरसिजवनं विष्णुवक्षःस्थलं वा ।
भूमा यस्या भुवनमखिलं देवि दिव्यं पदं वा
स्तोकप्रज्ञैरनवधिगुणा स्तूयसे सा कथं त्वम् ॥ २

स्तोतव्यत्वं दिशति भवती देहिभिः स्तूयमाना
तामेव त्वामनितरगतिः स्तोतुमाशंसमानः ।
सिद्धारम्भः सकलभुवनश्लाघनीयो भवेयं
सेवापेक्षा तव चरणयोः श्रेयसे कस्य न स्यात् ॥ ४

यत्संकल्पाद्भवति कमले यत्र देहिन्यमीषां
जन्मस्थेमप्रलयरचना जङ्गमाजङ्गमानाम् ।
तत्कल्याणं किमपि यमिनामेकलक्ष्यं समाधौ
पूर्णं तेजः स्फुरति भवतीपादलाक्षारसाङ्कम् ॥ ५

निष्प्रत्यूहप्रणयघटितं देवि नित्यानपायं
विष्णुस्त्वं चेत्यनवधिगुणं द्वन्द्वमन्योन्यलक्ष्यम् ।
शेषश्चित्तं विमलमनसा मौलयश्च श्रुतीनां
संपद्यन्ते विहरणविधौ यस्य शय्याविशेषाः ॥ ६

उद्देश्यत्वं जननि भजतोरुज्झितोपाधिगन्धं
प्रत्यग्रूपे हविषि युवयोरेकशेषित्वयोगात् ।
पद्मे पत्युस्तव च निगमैर्नित्यमन्विष्यमाणो
नावच्छेदं भजति महिमा नर्तयन्मानसं नः ॥ ७

पश्यन्तीषु श्रुतिषु परितः सूरिवृन्देन सार्धं
मध्येकृत्य त्रिगुणफलकं निर्मितस्थानभेदम् ।
विश्वाधीशप्रणयिनि सदा विभ्रमद्यूतवृत्तौ
ब्रह्मेशाद्या दधति युवयोरक्षशारप्रचारम् ॥ ८

अस्येशाना त्वमसि जगतः संश्रयन्ती मुकुन्दं
लक्ष्मीः पद्मा जलधितनया विष्णुपत्नीन्दिरेति ।
यन्नामानि श्रुतिपरिपणान्येवमावर्तयन्तो
नावर्तन्ते दुरितपवनप्रेरिते जन्मचक्रे ॥ ९

त्वामेवाहुः कतिचिदपरे त्वत्प्रियं लोकनाथं
किं तैरन्तःकलहमलिनैः किंचिदुत्तीर्य मग्नैः ।
त्वत्संप्रीत्यै विहरति हरौ संमुखीनां श्रुतीनां
भावारूढौ भगवति युवां दंपती दैवतं नः ॥ १०

आपन्नार्तिप्रशमनविधौ बद्धदीक्षस्य विष्णो-
राचख्युस्त्वां प्रियसहचरीमैकमत्योपपन्नाम् ।
प्रादुर्भावैरपि समतनुः प्राध्वमन्वीयसे त्वं
दूरोत्क्षिप्तैरिव मधुरता दुग्धराशेस्तरङ्गैः ॥ ११

धत्ते शोभां हरिमरकते तावकी मूर्तिराद्या
तन्वी तुङ्गस्तनभरनता तप्तजाम्बूनदाभा ।
यस्या गच्छन्त्युदयविलयैर्नित्यमानन्दसिन्धा-
विच्छावेगोल्लसितलहरीविभ्रमं व्यक्तयस्ते ॥ १२

आसंसारं विततमखिलं वाङ्मयं यद्विभूति-
र्यद्भ्रूभङ्गात्कुसुमधनुषः किंकरो मेरुधन्वा ।
यस्यां नित्यं नयनशतकैरेकलक्ष्यो महेन्द्रः
पद्मे तासां परिणतिरसौ भावलेशैस्त्वदीयैः ॥ १३

अग्रे भर्तुः सरसिजमये भद्रपीठे निषण्णा-
मम्भोराशेरधिगतसुधासंप्लवादुत्थितां त्वाम् ।
पुष्पासारस्थगितभुवनैः पुष्कलावर्तकाद्यैः
क्लृप्तारम्भाः कनककलशैरभ्यषिञ्चन्गजेन्द्राः ॥ १४

आलोक्य त्वाममृतसहजे विष्णुवक्षःस्थलस्थां
शापाक्रान्ताः शरणमगमन्सावरोधाः सुरेन्द्राः ।
लब्ध्वा भूयस्त्रिभुवनमिदं लक्षितं त्वत्कटाक्षैः
सर्वाकारस्थिरसमुदया पदं निर्विशन्ति ॥ १५

आर्तत्राणव्रतिभिरमृतासारनीलाम्बुवाहै-
रम्भोजानामुषसि मुषतामन्तरङ्गैरपाङ्गैः ।
यस्यां यस्यां दिशि विहरते देवि दृष्टिस्त्वदीया
तस्यां तस्यामहमहमिकां तन्वते संपदोघाः ॥ १६

योगारम्भत्वरितमनसो युष्मदैकान्त्ययुक्तं
धर्मं प्राप्तुं प्रथममिह ये धारयन्ते धनायाम् ।
तेषां भूमेर्धनपतिगृहादम्बरादम्बुधेर्वा
धारा निर्यान्त्यधिकमधिकं वाञ्छितानां वसूनाम् ॥ १७

श्रेयस्कामाः कमलनिलये चित्रमाम्नायवाचां
चूडापीडं तव पदयुगं चेतसा धारयन्तः ।
छत्रच्छायासुभगशिरसश्चामरस्मेरपार्श्वाः
श्लाघाशब्दश्रवणमुदिताः स्रग्विणः संचरन्ति ॥ १८

ऊरीकर्तुं कुशलमखिलं जेतुमादीनरातीन्-
न्दूरीकर्तुं दुरितनिवहं त्यक्तुमाद्यामविद्याम् ।
अम्ब स्तम्बावधिकजननग्रामसीमान्तरेखा-
मालम्बन्ते विमलमनसो विष्णुकान्ते दयां ते ॥ १९

जाताकाङ्क्षा जननि युवयोरेकसेवाधिकारे
मायालीढं विभवमखिलं मन्यमानास्तृणाय ।
प्रीत्यै विष्णोस्तव च कृतिनः प्रीतिमन्तो भजन्ते
वेलाभङ्गप्रशमनफलं वैदिकं धर्मसेतुम् ॥ २०

सेवे देवि त्रिदशमहिलामौलिमालार्चितं ते
सिद्धिक्षेत्रं शमितविपदां सम्पदां पादपद्मम् ।
यस्मिन्नीषन्नमितशिरसो यापयित्वा शरीरं
वर्तिष्यन्ते वितमसि पदे वासुदेवस्य धन्याः ॥ २१

सानुप्रासप्रकटितदयैः सान्द्रवात्सल्यदिग्धै-
रम्ब स्निग्धैरमृतलहरीलब्धसब्रह्मचर्यैः ।
घर्मे तापत्रयविरचिते गाढतप्तं क्षणं मा-
माकिञ्चन्यग्लपितमनघैरार्द्रयेथाः कटाक्षैः ॥ २२

संपद्यन्ते भवभयतमीभानवस्त्वत्प्रसादा-
द्भावाः सर्वे भगवति हरौ भक्तिमुद्वेलयन्तः ।
याचे किं त्वामहमिह यतः शीतलोदारशीला
भूयो भूयो दिशसि महतां मङ्गलानां प्रबन्धान् ॥ २३

माता देवि त्वमसि भगवान्वासुदेवः पिता मे
जातः सोऽहं जननि युवयोरेकलक्ष्यं दयायाः ।
दत्तो युष्मत्परिजनतया देशिकैरप्यतस्त्वं
किं ते भूयः प्रियमिति किल स्मेरवक्त्रा विभासि ॥ २४

कल्याणानामविकलनिधिः कापि कारुण्यसीमा
नित्यामोदा निगमवचसां मौलिमन्दारमाला ।
सम्पद्दिव्या मधुविजयिनः संनिधत्तां सदा मे
सैषा देवी सकलभुवनप्रार्थनाकामधेनुः ॥ २५

उपचितगुरुभक्तेरुत्थितं वेङ्कटेशा-
त्कलिकलुषनिवृत्त्यै कल्पमानं प्रजानाम् ।
सरसिजनिलयायाः स्तोत्रमेतत्पठन्तः
सकलकुशलसीमाः सार्वभौमा भवन्ति ॥ २६

—०—

॥ श्रीस्तुतिः संपूर्णा ॥

—०—

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरबे नमः ॥

॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

॥ श्रीः ॥

गोदास्तुतिः

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

श्रीविष्णुचित्तकुलनन्दनकल्पवल्लीं
श्रीरङ्गराजहरिचन्दनयोगदृश्याम् ।
साक्षात्क्षमां करुणया कमलामिवान्यां
गोदामनन्यशरणः शरणं प्रपद्ये ॥ १

वैदेशिकः श्रुतिगिरामपि भूयसीनां
वर्णेषु माति महिमा नहि मादृशां ते ।
इत्थं विदन्तमपि मां सहसैव गोदे
मौनद्रुहो मुखरयन्ति गुणास्त्वदीयाः ॥ २

त्वत्प्रेयसः श्रवणयोरमृतायमानां
तुल्यां त्वदीयमणिनूपुरशिञ्जितानाम् ।
गोदे त्वमेव जननि त्वदभीष्टवार्हां
वाचं प्रसन्नमधुरां मम संविधेयाः ॥ ३

कृष्णान्वयेन दधतीं यमुनानुभावं
तीर्थैर्यथावदवगाह्य सरस्वतीं ते ।
गोदे विकस्वरधियां भवतीकटाक्षा-
द्वाचः स्फुरन्ति मकरन्दमुचः कवीनाम् ॥ ४

अस्मादृशामपकृतौ चिरदीक्षितानां-
मह्नाय देवि दयते यदसौ मुकुन्दः ।
तन्निश्चितं नियमितस्तव मौलिदाम्ना
तन्त्रीनिनादमधुरैश्च गिरां निगुम्भैः ॥ ५

शोणाधरेऽपि कुचयोरपि तुङ्गभद्रा
वाचां प्रवाहनिवहेऽपि सरस्वती त्वम् ।
अप्राकृतैरपि रसैर्विरजा स्स्वभावात्
गोदापि देवि कमितुर्ननु नर्मदासि ॥ ६

वल्मीकतः श्रवणतो वसुधात्मनस्ते
जातो बभूव स मुनिः कविसार्वभौमः ।
गोदे किमद्भुतमिदं यदमी स्वदन्ते
वक्त्रारविन्दमकरन्दनिभाः प्रबन्धाः ॥ ७

भोक्तुं तव प्रियतमं भवतीव गोदे
भक्तिं निजां प्रणयभावनया गृणन्तः ।
उच्चावचैर्विरहसंगमजैरुदन्तैः
शृङ्गारयन्ति हृदयं गुरवस्त्वदीयाः ॥ ८

मातः समुत्थितवतीमधिविष्णुचित्तं
विश्वोपजीव्यममृतं वचसा दुहानाम् ।
तापच्छिदं हिमरुचेरिव मूर्तिमन्यां
सन्तः पयोधिदुहितुः सहजां विदुस्त्वाम् ॥ ९

तातस्तु ते मधुभिदः स्तुतिलेशवश्यात्
कर्णामृतैः स्तुतिशतैरनवाप्तपूर्वम् ।
त्वन्मौलिगन्धसुभगामुपहृत्य मालां
लेभे महत्तरपदानुगुणं प्रसादम् ॥ १०

दिग्दक्षिणापि परिपक्त्रिमपुण्यलभ्यात्
सर्वोत्तरा भवति देवि तवावतारात् ।
यत्रैव रङ्गपतिना बहुमानपूर्वं
निद्रालुनापि नियतं निहिताः कटाक्षाः ॥ ११

प्रायेण देवि भवतीव्यपदेशयोगात्
गोदावरी जगदिदं पयसा पुनीते ।
यस्यां समेत्य समयेषु चिरं निवासात्
भागीरथीप्रभृतयोऽपि भवन्ति पुण्याः ॥ १२

नागेशयः सुतनु पक्षिरथः कथं ते
जातः स्वयंवरपतिः पुरुषः पुराणः ।
एवंविधाः समुचितं प्रणयं भवत्याः
संदर्शयन्ति परिहासगिरः सखीनाम् ॥ १३

त्वद्भुक्तमाल्यसुरभीकृतचारुमौले-
र्हित्वा भुजान्तरगतामपि वैजयन्तीम् ।
पत्युस्तवेश्वरि मिथः प्रतिघातलोला
बर्हातपत्ररुचिमारचयन्ति भृङ्गाः ॥ १४

आमोदवत्यपि सदा हृदयङ्गमापि
रागान्वितापि ललितापि गुणोत्तरापि ।
मौलिस्रजा तव मुकुन्दकिरीटभाजा
गोदे भवत्यधरिता खलु वैजयन्ती ॥ १५

त्वन्मौलिदामनि विभोः शिरसा गृहीते
स्वच्छन्दकल्पितसपीतिरसप्रमोदाः ।
मञ्जुस्वना मधुलिहो विदधुः स्वयं ते
स्वायम्बरं कमपि मङ्गलतूर्यघोषम् ॥ १६

विश्वायमानरजसा कमलेन नाभौ
वक्षःस्थले च कमलास्तनचन्दनेन ।
आमोदितोऽपि निगमैर्विभुरङ्घ्रियुग्मे
धत्ते नतेन शिरसा तव मौलिमालाम् ॥ १७

चूडापदेन परिगृह्य तवोत्तरीयं
मालामपि त्वदलकैरधिवास्य दत्ताम् ।
प्रायेण रङ्गपतिरेष बिभर्ति गोदे
सौभाग्यसंपदभिषेकमहाधिकारम् ॥ १८

तुङ्गैरकृत्रिमगिरः स्वयमुत्तमाङ्गै-
र्यं सर्वगन्ध इति सादरमुद्वहन्ति ।
आमोदमन्यमधिगच्छति मालिकाभिः
सोऽपि त्वदीयकुटिलालकवासिताभिः ॥ १९

धन्ये समस्तजगतां पितुरुत्तमाङ्गे-
त्वन्मौलिमाल्यभरसंभरणेन भूयः ।
इन्दीवरस्रजमिवादधति त्वदीया-
न्याकेकराणि बहुमानविलोकितानि ॥ २०

रङ्गेश्वरस्य तव च प्रणयानुबन्धा-
दन्योन्यमाल्यपरिवृत्तिमभिष्टुवन्तः ।
वाचालयन्ति वसुधे रसिकास्त्रिलोकीं
न्यूनाधिकत्वसमताविषयैर्विवादैः ॥ २१

दूर्वादलप्रतिमया तव देवि कान्त्या
गोरोचनारुचिरया च रुचेन्दिरायाः ।
आसीदनुज्झितशिखावलकण्ठशोभं
माङ्गल्यदं प्रणमतां मधुवैरिगात्रम् ॥ २२

अर्च्यं समर्च्य नियमैर्निगमप्रसूनै-
र्नाथं त्वया कमलया च समेयिवांसम् ।
मातश्चिरं निरविशन्निजमाधिराज्यं
मान्या मनुप्रभृतयोऽपि महीक्षितस्ते ॥ २३

आर्द्रापराधिनि जनेऽप्यभिरक्षणार्थं
रङ्गेश्वरस्य रमया विनिवेद्यमाने ।
पार्श्वे परत्र भवती यदि तत्र नासीत्
प्रायेण देवि वदनं परिवर्तितं स्यात् ॥ २४

गोदे गुणैरपनयन्प्रणतापराधान्
भ्रूक्षेप एव तव भोगरसानुकूलः ।
कर्मानुबन्धिफलदानरतस्य भर्तुः
स्वातन्त्र्यदुर्व्यसनमर्मभिदानिदानम् ॥ २५

रङ्गे तटिद्गुणवतो रमयैव गोदे
कृष्णाम्बुदस्य घटितां कृपया सुवृष्ट्या ।
दौर्गत्यदुर्विषविनाशसुधानदीं त्वां
सन्तः प्रपद्य शमयन्त्यचिरेण तापान् ॥ २६

जातापराधमपि मामनुकम्प्य गोदे
गोप्त्री यदि त्वमसि युक्तमिदं भवत्याः ।
वात्सल्यनिर्भरतया जननी कुमारं
स्तन्येन वर्धयति दष्टपयोधरापि ॥ २७

शतमखमणिनीला चारुकल्हारहस्ता
स्तनभरनमिताङ्गी सान्द्रवात्सल्यसिन्धुः ।
अलकविनिहिताभिः स्रग्भिराकृष्टनाथा
विलसतु हृदि गोदा विष्णुचित्तात्मजा नः ॥ २८

इति विकसितभक्तेरुत्थितां वेङ्कटेशात्
बहुगुणरमणीयां वक्ति गोदास्तुतिं यः ।
स भवति बहुमान्यः श्रीमतो रङ्गभर्तु-
श्चरणकमलसेवां शाश्वतीमभ्युपैष्यन् ॥ २९

॥ गोदास्तुतिः सम्पूर्णा ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

—o—

॥ श्रीः ॥

भूस्तुतिः

श्रीमान्वेङ्कटनाथार्यः कविताकिककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

संकल्पकल्पलतिकामवधिं क्षमायाः
स्वेच्छावराहमहिषीं सुलभानुकम्पाम् ।
विश्वस्य मातरमकिंचनकामधेनुं
विश्वंभरामशरणः शरणं प्रपद्ये ॥ १

त्वं व्याहृतिः प्रथमतः प्रणवः प्रियस्ते
संवेदयत्यखिलमन्त्रगणस्तमेव ।
इत्थं प्रतीतविभवामितरेष्विदानीं
स्तोतुं यथावदवने क इवार्हति त्वाम् ॥ २

नित्यं हिताहितविपर्ययबद्धभावे
त्वद्वीक्षणैकविनिवर्त्यबहुव्यपाये ।
मुग्धाक्षरैरखिलधारिणि मोदमाना
मातः स्तनंधयधियं मयि वर्तयेथाः ॥ ३

संकल्पकिंकरचराचरचक्रवालं
सर्वातिशायिनमनन्तशयस्य पुंसः ।
भूमानमात्मविभवैः पुनरुक्तयन्ती
वाचामभूमिरपि भूमिरसि त्वमेका ॥ ४

वेधस्तृणावधि विहारपरिच्छदं ते
विश्वं चराचरतया व्यतिभिद्यमानम् ।
अम्ब त्वदाश्रितदया परिपोषयन्ती
विश्वंभरस्य दयितासि तदेकनामा ॥ ५

सर्वंसहेत्यवनिरित्यचलेति मात-
विश्वंम्भरेति विपुलेति वसुन्धरेति ।
अन्यानि चान्यविमुखान्यभिधानवृत्त्या
नामान्यमूनि कथयन्ति तवानुभावम् ॥ ६

तापान्क्षिपन्प्रसविता सुमनोगणानां
प्रच्छायशीतलतलः प्रदिशन्फलानि ।
त्वत्संगमाद्भवति माधवि लब्धपोषः
शाखाशतैरधिगतो हरिचन्दनोऽसौ ॥ ७

स्मेरेण वर्धितरसस्य मुखेन्दुना ते
निस्पन्दतां विजहतो निजया प्रकृत्या ।
विश्रान्तिभूमिरसि तत्त्वतरङ्गपङ्क्ते-
र्वेलेव विष्णुजलधेरपृथग्भवन्ती ॥ ८

स्वाभाविके वसुमति श्रुतिभिर्विभाव्ये
पत्युर्महिम्नि भवतीं प्रतिपन्नवासाम् ।
शङ्के विमानवहनप्रतिमासमानाः
स्तम्बेरमप्रभृतयोऽपि वहन्ति सत्वाः ॥ ९

संभावयन्मुधुरिपुः प्रणयानुरोधा-
द्वक्षःस्थलेन वरुणालयराजकन्याम् ।
विश्वम्भरे बहुसुखप्रतिपन्नभोगः
शेषात्मना तु भवतीं शिरसा दधाति ॥ १०

क्रीडावराहदयिते कृतिनः क्षितीन्द्राः
संक्रन्दनस्तदितरेऽपिदिशामधीशाः ।
आमोदयन्ति भुवनान्यलिकाश्रितानाा-
मम्ब त्वदङ्घ्रिरजसां परिणामभेदैः ॥ ११

भूतेषु यत्त्वदभिमानविशेषपात्रं
पोषं तदेव भजतीति विभावयन्तः।
भूतं प्रभूतगुणपञ्चकमाद्यमेव
प्रायो निदर्शनतया प्रतिपादयन्ति ॥ १२

कान्तस्तवैष करुणाजलधिः प्रजाना-
माज्ञातिलङ्घनवशादुपजातरोषः।
अह्नाय विश्वजननि क्षमया भवत्या
सर्वावगाहनसहामुपयात्यवस्थाम् ॥ १३

आश्वासनाय जगतां पुरुषे परस्मि-
न्नापन्नरक्षणदशामभिनेतुकामे।
अन्तर्हितेतरगुणादबलास्वभावा-
दौदन्वते पयसि मज्जनमभ्यनैषीः ॥ १४

पूर्वं वराहवपुषा पुरुषोत्तमेन
प्रीतेन भोगिसदने समुदीक्षितायाः।
पादाहताः प्रलयवारिधयस्तवास-
न्नुद्वाहमङ्गलविधेरुचिता मृदङ्गाः ॥ १५

व्योमातिलङ्घिनि विभोः प्रलयाम्बुराशौ
वेशन्तलेश इव मातुमशक्यमूर्तेः।
सद्यः समुद्रवसने सरसैरकार्षी-
रानन्दसागरमपारमपाङ्गपातैः ॥ १६

दंष्ट्राविदारितमहासुरशोणिताङ्कै-
रङ्गैः प्रियस्तव दधे परिरम्भलीलाम्।
सा ते पयोधिजलकेलिसमुत्थितायाः
सैरन्ध्रिकेव विदधे नवमङ्गरागम् ॥ १७

अन्योन्यसंवलनजृम्भिततूर्यघोषैः
संवर्तसिन्धुसलिलैर्विहिताभिषेका ।
एकातपत्रयसि विश्वमिदं गुणैः स्वै-
रध्यास्य भर्तुरधिकोन्नतमंसपीठम् ॥ १८

भर्तुस्तमालरुचिरे भुजमध्यभागे
पर्यायमौक्तिकवती पृषतैः पयोधेः ।
तापानुबन्धशमनी जगतां त्रयाणां
तारापथे स्फुरसि तारकिता निशेव ॥ १९

आसक्तवासवशरासनपल्लवैस्त्वां
संवृद्धये शुभतटिद्गुणजालरम्यैः ।
देवेशदिव्यमहिषीं धृतसिन्धुतोयै-
र्जीमूतरत्नकलशैरभिषिञ्चति द्यौः ॥ २०

आविर्मदैरमरदन्तिभिरुह्यमानां
रत्नाकरेण रुचिरां रशनागुणेन ।
मातस्त्रिलोकजननीं वनमालिनीं त्वां
मायावराहमहिषीमवयन्ति सन्तः ॥ २१

निष्कण्टकप्रशमयोगनिषेवणीयां
छाया विशेषपरिभूतसमस्ततापाम् ।
स्वर्गापवर्गसरणिं भवतीमुशन्ति
स्वच्छन्दसूकरवधूमवधूतपङ्काम् ॥ २२

गण्डोज्ज्वलां गहनकुन्तलदर्शनीयां
शैलस्तनीं तरलनिर्झरलम्बहाराम् ।
श्यामां स्वतस्त्रियुगसूकरगेहिनि त्वं
व्यक्तिं समुद्रवसनामुभयीं बिभर्षि ॥ २३

निःसंशयैर्निगमसीमनि विष्णुपत्नि
प्रख्यापितं भृगुमुखैर्मुनिभिः प्रतीतैः ।
पश्यन्त्यनन्यपरधीरससंस्तुतेन
सन्तः समाधिनयनेन तवानुभावम् ॥ २४

संचोदिता करुणया चतुरः पुमर्था-
न्व्यातन्वती विविधमन्त्रगणोपगीता ।
संचिन्त्यसे वसुमति स्थिरभक्तिबन्धै-
रन्तर्बहिश्च बहुधा प्रणिधानदक्षैः ॥ २५

क्रीडागृहीतकमलादिविशेषचिह्नां
विश्राणिताभयवरां वसुधे सभूतिम् ।
दौर्गत्यदुर्विषविनाशसुधानदीं त्वां
संचिन्तयन् हि लभते धनदाधिकारान् ॥ २६

उद्वेलकल्मषपरंपरितादमर्षा-
दुत्तंसितेन हरिमञ्जलिनाप्यधृष्यम् ।
आकस्मिकोऽयमधिगम्यपतिप्रजाना-
मम्ब त्वदीयकरुणापरिणाम एव ॥ २७

प्रत्येकमब्दनियुतैरपि दुर्व्यपोहा-
त्प्राप्ते विपाकसमये जनितानुतापात् ।
नित्यापराधनिवहाच्चकितस्य जन्तो-
र्गन्तुं मुकुन्दचरणौ शरणं क्षमे त्वम् ॥ २८

त्राणाभिसंधिसुभगेऽपि सदा मुकुन्दे
संसारतन्त्रवहनेन विलम्बमाने ।
रक्षाविधौ तनुभृतामनघानुकम्पा
मातः स्वयं वितनुषे महतीमपेक्षाम् ॥ २९

धर्मद्रुहं सकलदुष्कृतिसार्वभौम-
मात्मानभिज्ञमनुतापलवोज्झितं माम् ।
वैतानसूकरपतेश्चरणारविन्दे
सर्वं सहे ननु समर्पयितुं क्षमा त्वम् ॥ ३०

तापत्रयीं निरवधिं भवती दयार्द्राः
संसारधर्मजनितां सपदि क्षिपन्तः ।
मातर्भजन्तु मधुरामृतवर्षमैत्रीं
मायावराहदयिते मयि ते कटाक्षाः ॥ ३१

पत्युर्दक्षिणपाणिपङ्कजपुटे विन्यस्तपादाम्बुजा
वामं पन्नगसार्वभौमसदृशं पर्यङ्कयन्ती भुजम् ।
पोत्रस्पर्शलसत्कपोलफलका फुल्लारविन्देक्षणा
सा मे पुष्यतु मङ्गलान्यनुदिनं सर्वाणि सर्वंसहा ॥ ३२

अस्येशाना जगत इति या श्रूयते विष्णुपत्नी
तस्याः स्तोत्रं विरचितमिदं वेङ्कटेशेन भक्त्या ।
श्रद्धाभक्तिप्रचयगुरुणा चेतसा संस्तुवानो
यद्यत्कामः सपदि लभते तत्र तत्र प्रतिष्ठाम् ॥ ३३

भूस्तुतिः संपूर्णा

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

अथ नारायणाष्टकम् ।

वात्सल्यादभयप्रदानसमयादार्त्तार्तिनिर्व्वापणा-
दौदार्य्यादघशोषणादगणितश्रेयःपदप्रापणात् ॥
सेव्यः श्रीपतिरेकएव जगतामेतेऽभवन्त्साक्षिणः
प्रह्लादश्च विभीषणश्च करिराट् पाञ्चाल्यहल्या ध्रुवः ॥ १

प्रह्लादास्ति यदीश्वरो वद हरिः सर्वत्र मे दर्शय
स्तम्भे चैवमिति ब्रुवन्तमसुरं तत्राविरासीद्धरिः ॥
वक्षस्तस्य विदारयन्निजनखैर्वात्सल्यमापादय-
न्नार्त्तत्राणपरायणः स भगवान्नारायणो मे गतिः ॥ २

श्रीरामोऽत्र विभीषणोऽयमनघो रक्षोभयादागतः
सुग्रीवानय पालयैनमधुना पौलस्त्यमेवागतम् ॥
इत्युक्त्वाऽभयमस्य सर्वविदितं यो राघवो दत्तवा-
नार्त्तत्राणपरायणः स भगवान्नारायणो मे गतिः ॥ ३

नक्रग्रस्तपदं समुद्धृतकरं ब्रह्मादयो भोस्सुराः
रक्षन्तामिति दीनवाक्यकरिणं देवेष्वशक्तेषु यः ॥
मा भैषीरिति तस्य नक्रहनने चक्रायुधः श्रीधरो
ह्यार्तत्राणपरायणः स भगवान्नारायणो मे गतिः ॥ ४

भोः कृष्णाच्युत भोः कृपालय हरे भोः पाण्डवानां सखे
क्कासि क्कासि सुयोधनाद्यपहृतां भो रक्ष मामातुराम् ॥
इत्युक्तोऽक्षयवस्त्रसंभृततनुं योऽपालद्द्रौपदी-
मार्त्तत्राणपरायणः स भगवान्नारायणो मे गतिः ॥ ५

यत्पादाब्जनखोदकं त्रिजगतां पापौघविध्वंसनं
यन्नामामृतपूरकं च पिबतां संसारसन्तारकम् ।
पाषाणोऽपि यदङ्घ्रिपद्मरजसा शापान्मुनेर्मोचितो
ह्यार्तत्राणपरायणः स भगवान्नारायणो मे गतिः ॥ ६

पित्रा भ्रातरमुत्तमासनगते ह्यौत्तानपादिर्ध्रुवो
दृष्ट्वा तत्सममारुरुक्षुरधिकं मात्राऽवमानं गतः ॥
यं गत्वा शरणं यदाप तपसा हेमाद्रिसिंहासनं
ह्यार्तत्राणपरायणः स भगवान्नारायणो मे गतिः ॥ ७

कावेरीहृदयाभिरामपुलिने पुण्ये जगन्मङ्गले
चन्द्राम्भोजवतीतटे परिसरे धात्रा समाराधिते ॥
श्रीरङ्गे भुजगेन्द्रभोगशयने शेते सदा यः पुमा-
नार्तत्राणपरायणः स भगवान्नारायणो मे गतिः ॥ ८

आर्त्ता विषण्णाः शिथिलाश्च भीता
घोरेषु च व्याधिषु वर्त्तमानाः ॥
संकीर्त्त्य नारायणशब्दमात्रं
विमुक्तदुःखाः सुखिनो भवन्ति ॥ ९

इति श्रीकूरेशस्वामिविरचितं नारायणाष्टकं सम्पूर्णम् ॥

—०—

अथ सुदर्शनाष्टकम् ।

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

प्रतिभटश्रेणिभीषण वरगुणस्तोमभूषण
जनिभयस्थानतारण जगदवस्थानकारण ।
निखिलदुष्कर्मकर्शन निगमसद्धर्मदर्शन ।
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ १

शुभजगद्रूपमण्डन सुरगणत्रासखण्डन
शतमखब्रह्मवन्दित शतपथब्रह्मनन्दित ।
प्रथितविद्वत्सपक्षित भजदहिर्बुध्न्यलक्षित
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ २

स्फुटतटिज्जालपिञ्जर पृथुतरज्वालपञ्जर
परिगतप्रत्नविग्रह पटुतरप्रज्ञदुर्ग्रह ।
प्रहरणग्राममण्डित परिजनत्राणपण्डित
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ ३

निजपदप्रीतसद्गण निरुपधिस्फीतषड्गुण
निगमनिर्व्यूढवैभव निजपरव्यूहवैभव ।
हरिहयद्वेषिदारण हरपुरप्लोषकारण
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ ४

दनुजविस्तारकर्तन जनितमिस्राविकर्तन
दनुजविद्याविकर्तन भजदविद्यानिवर्तन ।
अमरदृष्टस्वविक्रम समरजुष्टभ्रमिक्रम
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ ५

प्रतिमुखालीढबन्धुर पृथुमहाहेतिदन्तुर
विकटमायाबहिष्कृत विविधमालापरिष्कृत ।
स्थिरमहायन्त्रयन्त्रित दृढदयातन्त्रयन्त्रित
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ ६

महितसंपत्सदक्षर विहितसंपत्षडक्षर
षडरचक्रप्रतिष्ठित सकलतत्वप्रतिष्ठित ।
विविधसंकल्पकल्पक विबुधसंकल्पकल्पक
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ ७

भुवननेतस्त्रयीमय सवनतेजस्त्रयीमय
निरवधिस्वादुचिन्मय निखिलशक्ते जगन्मय ।
अमितविश्वक्रियामय शमितविष्वग्भयामय
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ ८

द्विचतुष्कमिदंप्रभूतसारं
पठतांवेङ्कटनायकप्रणीतम् ।
विषमेऽपि मनोरथःप्रधाव-
न्न विहन्येत रथाङ्गधुर्यगुप्तः ॥ ९

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥
श्रीमते निगमान्तमहादेशिकाय नमः ॥

—०—

श्रीमते रामानुजाय नमः ।

अथ वैराग्यपञ्चकम् ।

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

क्षोणीकोणशतांशपालनकलादुर्वारगर्वानल-
क्षुभ्यत्क्षुद्रनरेन्द्रचाटुरचनाधन्यान् न मन्यामहे ।
देवं सेवितुमेव निश्चिनुमहे योऽसौ दयालुः पुरा
धानामुष्टिमुचे कुचेलमुनये धत्ते स्म वित्तेशताम् ॥ १

सिलं किमनलं भवेदनलमौदरं बाधितुं
पयःप्रसृतिपूरकं किमु न धारकं सारसम् ।
अयत्नमलमल्लकं पथि पटच्चरं कच्चरं
भजन्ति विबुधा मुधा ह्यहह कुक्षितः कुक्षितः ॥ २

ज्वलतु जलधिक्रोडक्रीडत्कृपीडभव प्रभा
प्रतिभटपटु ज्वालामालाकुलो जठरानलः ।
तृणमपि वयं सायं संफुल्लमल्लिमतल्लिका
परिमलमुचा वाचा याचामहे न महीश्वरान् ॥ ३

दुरीश्वरद्वारबहिर्वितर्दिका-
दुरासिकायै रचितोऽयमञ्जलिः ।
यदञ्जनाभं निरपायमस्ति मे
धनञ्जयस्यन्दनभूषणं धनम् ॥ ४

शरीरपतनावधि प्रभुनिषेवणापादना-
दबिन्धनधनञ्जयप्रशमदं धनं दन्धनम् ।
धनं जयविवर्धनं धनमुदूढगोवर्धनं
सुसाधनमबाधनं सुमनसां समाराधनम् ॥ ५

नास्ति पित्रार्जितं किंचन्नमया किंचिदर्जितम् ।
अस्ति मे हस्तिशैलाग्रे वस्तु पैतामहं धनम् ॥

इति श्रीसर्वतंत्रस्वतन्त्रवेदान्तदेशिकाचार्यकृतं
वैराग्यपञ्चकं समाप्तम्

कविताकिंकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥
॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

॥ श्रीः ॥

न्यासदशकम् ।

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

अहं मद्रक्षणभरो मद्रक्षणफलं तथा ।
न मम श्रीपतेरेवेत्यात्मानं निक्षिपेद्बुधः ॥ १

न्यस्याम्यकिंचनः श्रीमन्ननुकूलोऽन्यवर्जितः ।
विश्वासप्रार्थनापूर्वमात्मरक्षाभरं त्वयि ॥ २

स्वामिन् स्वशेषं स्ववशं स्वभरत्वेन निर्भरम् ।
स्वदत्तस्वधिया स्वार्थं स्वस्मिन्न्यस्यसि मां स्वयम् ॥ ३

श्रीमन्नभीष्टवरद त्वामस्मि शरणं गतः ।
एतद्देहावसाने मां त्वत्पादं प्रापय स्वयम् ॥ ४

त्वच्छेषत्वे स्थिरधियं त्वत्प्राप्त्येकप्रयोजनम् ।
निषिद्धाकाम्यरहितं कुरु मां नित्यकिंकरम् ॥ ५

देवी भूषणहेत्यादिजुष्टस्य भगवंस्तव ।
नित्यं निरपराधेषु कैंकर्येषु नियुङ्क्ष्व माम् ॥ ६

मां मदीयं च निखिलं चेतनाचेतनात्मकम् ।
स्वकैंकर्योपकरणं वरद स्वीकुरु स्वयम् ॥ ७

त्वदेकरक्षस्य मम त्वमेव करुणाकर ।
न प्रवर्तय पापानि प्रवृत्तानि निवर्तय ॥ ८

अकृत्यानां च करणं कृत्यानां वर्जनं च मे ।
क्षमस्व निखिलं देव प्रणतार्तिहर प्रभो ॥ ९

श्रीमन्नियतपञ्चाङ्गं मद्रक्षणभरार्पणम् ।
अचीकरत्स्वयं स्वस्मिन्नतोऽहमिह निर्भरः ॥ १०

इति श्री न्यासदशकम् सम्पूर्णम् ।

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्त महादेशिकाय नमः ॥

वरदराजपञ्चाशत्

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

द्विरदशिखरिसीम्ना सद्मवान्पद्मयोने-
स्तुरगसवनवेद्यां श्यामलो हव्यवाहः ।
कलशजलधिकन्यावल्लरीकल्पशाखी
कलयतु कुशलं नः कोऽपि कारुण्यराशिः ॥ १

यस्यानुभावमधिगन्तुमशक्नुवन्तो
मुह्यन्त्यभङ्गुरधियो मुनिसार्वभौमाः ।
तस्यैव ते स्तुतिषु साहसमश्नुवानः
क्षन्तव्य एष भवता करिशैलनाथ ॥ २

जानन्ननादि विहितानपराधवर्गान्
स्वामिन्भयात्किमपि वक्तुमहं न शक्तः ।
अव्याजवत्सल तथापि निरङ्कुशं मां
वात्सल्यमेव भवतो मुखरीकरोति ॥ ३

किं व्याहरामि वरद स्तुतये कथं वा
खद्योतवत्त्वल्पलघुसंकुचितप्रकाशः ।
तन्मे समर्पय मतिं च सरस्वतीं च
त्वामञ्जसा स्तुतिपदैर्यदहं धिनोमि ॥ ४

मच्छक्तिमात्रगणने किमिहास्ति शक्यं
शक्येन वा तव करीश किमस्ति साध्यम् ।
यद्यस्ति साधय मया तदपि त्वया वा
किं वा भवेद्भवति किंचिदनीहमाने ॥ ५

स्तोत्रं मया विरचितं त्वदधीनवाचा
त्वत्प्रीतये वरद यत्तदिदं न चित्रम् ।
आवर्जयन्ति हृदयं खलु शिक्षकाणां
मंजूनि पंजरशकुन्तविजल्पितानि ॥ ६

यं चक्षुषामविषयं हयमेधयज्वा
द्राघीयसा सुचरितेन ददर्श वेधाः ।
तं त्वां करीश करुणापरिणामतस्ते
भूतानि हन्त निखिलानि निशामयन्ति ॥ ७

तत्तत्पदैरुपहितेऽपि तुरङ्गमेधे
शक्रादयो वरद पूर्वमलब्धभागाः ।
अध्यक्षिते मखपतौ त्वयि चक्षुषैव
हैरण्यगर्भहविषां रसमन्वभूवन् ॥ ८

सर्गस्थितिप्रलयविभ्रमनाटिकायां
शैलूषवद्विविधवेषपरिग्रहं त्वाम् ।
संभावयन्ति हृदयेन करीश धन्याः
संसारवारिनिधिसंतरणैकपोतम् ॥ ९

प्राप्तोदयेषु वरद त्वदनुप्रवेशात्-
पद्मासनादिषु शिवादिषु कंचुकेषु ।
तन्मात्रदर्शनविलोभितशेमुषीका-
स्तादात्म्यमूढमतयो निपतन्त्यधीराः ॥ १०

मध्ये विरिंचिशिवयोर्विहितावतारः
ख्यातोऽसि तत्समतया तदिदं न चित्रम् ।
मायावशेन मकरादिशरीरिणं त्वां
तानेव पश्यति करीश यदेष लोकः ॥ ११

ब्रह्मेति शंकर इतीन्द्र इति स्वराडि-
त्यात्मेति सर्वमिति सर्वचराचरात्मन् ।
हस्तीश सर्ववचसामवसानसीमां
त्वां सर्वकारणमुशन्त्यनपायवाचः ॥ १२

आशाधिपेषु गिरिशेषु चतुर्मुखेष्व-
प्यव्याहता विधिनिषेधमयी तवाज्ञा ।
हस्तीश नित्यमनुपालनलङ्घनाभ्यां
पुंसां शुभाशुभमयानि फलानि सूते ॥ १३

त्रातापदि स्थितिपदं भरणं प्ररोह-
श्छाया करीश सरसानि फलानि च त्वम् ।
शाखागतत्रिदशवृन्दशकुन्तकानां
किं नाम नासि महतां निगमद्रुमाणाम् ॥ १४

सामान्यबुद्धिजनकाश्च सदादिशब्दा-
स्तत्त्वान्तरभ्रमकृतश्च शिवादिवाचः ।
नारायणे त्वयि करीश वहन्त्यनन्य-
मन्वर्थवृत्तिपरिकल्पितमैककण्ठ्यम् ॥ १५

संचिन्तयन्त्यखिलहेयविपक्षभूतं
शान्तोदितं शमवता हृदयेन धन्याः ।
नित्यं परं वरद सर्वगतं सुसूक्ष्मं-
निष्पन्दनन्दथुमयं भवतः स्वरूपम् ॥ १६

विश्वातिशायि सुखरूप यदात्मकस्त्वं
व्यक्तिं करीश कथयन्ति तदात्मिकां ते ।
येनाधिरोहति मतिस्त्वदुपासकानां
सा किं त्वमेव तव वेति वितर्कडोलाम् ॥ १७

मोहान्धकारविनिवर्तनजागरूके
दोषा दिवापि निरवग्रहमेधमाने ।
त्वत्तेजसि द्विरदशैलपतेऽविमृष्टे
श्लाघ्येत संतमसपर्व सहस्रभानोः ॥ १८

रूढस्य चिन्मयतया हृदये करीश
स्तम्बानुकारिपरिणामविशेषभाजः ।
स्थानेषु जाग्रति चतुर्ष्वपि सत्त्ववन्तः
शाखाविभागचतुरे तव चातुरात्म्ये ॥ १९

नागाचलेश निखिलोपनिषन्मनीषा-
मञ्जूषिकामरकतं परिचिन्वतां त्वाम् ।
तन्वी हृदि स्फुरति कापि शिखा मुनीनां
सौदामिनीव निभृता नवमेघगर्भा ॥ २०

औदन्वते महति सद्मनि भासमाने
श्लाघ्ये च दिव्यसदने तमसः परस्मिन् ।
अन्तः कलेवरमिदं सुषिरं सुसूक्ष्मं
जातं करीश कथमादरणास्पदं ते ॥ २१

बालाकृतेर्वटपलाशमितस्य यस्य
ब्रह्माण्डमण्डलमभूदुदरैकदेशे ।
तस्यैव तद्वरद हन्त कथं प्रभूतं
वाराहमास्थितवतो वपुरद्भुतं ते ॥ २२

भक्तस्य दानवशिशोः परिपालनाय
भद्रां नृसिंहकुहनामधिजग्मुषस्ते ।
स्तम्भैकवर्जमधुनापि करीश नूनं
त्रैलोक्यमेतदखिलं नरसिंहगर्भम् ॥ २३

क्रामन् जगत्कपटवामनतामुपेत-
स्त्रेधा करीश स भवान्निदधे पदानि ।
अद्यापि जन्तव इमे विमलेन यस्य
पादोदकेन विधृतेन शिवा भवन्ति ॥ २४

येनाचलप्रकृतिना रिपुसंक्षयार्थी
वारां निधिं वरद पूर्वमलङ्घ्यस्त्वम् ।
तं वीक्ष्य सेतुमधुनापि शरीरवन्तः
सर्वे षडूर्मिबहुलं जलधिं तरन्ति ॥ २५

इत्थं करीश दुरपह्नवदिव्यभव्य-
रूपान्वितस्य विबुधादिविभूतिसाम्यात् ।
केचिद्विचित्रचरितान्भवतोऽवतारान्
सत्यान्दयापरवशस्य वदन्ति सन्तः ॥ २६

सौशील्यभावितधिया भवता कथंचित्-
संछादितानपि गुणान्वरद त्वदीयान् ।
प्रत्यक्षयन्त्यविकलं तव संनिकृष्टाः
पत्युस्त्विषामिव पयोदवृतान्मयूखान् ॥ २७

नित्यं करीश तिमिराविलदृष्टयोऽपि
सिद्धाञ्जनेन भवतैव विभूषिताक्षाः ।
पश्यन्त्युपर्युपरि संचरतामदृश्यं
मायानिगूढमनपायमहानिधिं त्वाम् ॥ २८

सद्यस्त्यजन्ति वरद त्वयि बद्धभावाः
पैतामहादिषु पदेष्वपि भावबन्धम् ।
कस्मै स्वदेत सुखसंचरणोत्सुकाय
कारागृहे कनकशृङ्खलयापि बन्धः ॥ २९

हस्तीश दुःखविषदिग्धफलानुबन्धि-
न्याब्रह्मकीटमपराहतसंप्रयोगे ।
दुष्कर्मसंचयवशाद्दुरतिक्रमे नः
प्रत्यस्त्रमञ्जलिरसौ तव निग्रहास्त्रे ॥ ३०

त्वद्भक्तिपोतमवलम्बितुमक्षमाणां
पारं परं वरद गन्तुमनीश्वराणाम् ।
स्वैरं लिलङ्घयिषतां भववारिराशिं
त्वामेव गन्तुमसि सेतुरभङ्गुरस्त्वम् ॥ ३१

अश्रान्तसंसरणघर्मनिपीडितस्य
भ्रान्तस्य मे विषयभोगमरीचिकासु ।
जीवातुरस्तु निरवग्रहमेधमानो
देव त्वदीयकरुणामृतदृष्टिपातः ॥ ३२

अन्तः प्रविश्य भगवन्नखिलस्य जन्तो-
रासेदुषस्तव करीश भृशं दवीयान् ।
सत्यं भवेयमधुनापि स एव भूयः
स्वाभाविकी तव दया यदि नान्तरायः ॥ ३३

अज्ञातनिर्गममनागमवेदिनं मा-
मन्धं न किंचिदवलम्बनमश्नुवानम् ।
एतावतीं गमयितुः पदवीं दयालोः
शेषाध्वलेशनयने क इवातिभारः ॥ ३४

भूयोऽपि हन्त वसतिर्यदि मे भवित्री
याम्यासु दुर्विषहवृत्तिषु यातनासु ।
सम्यग्भविष्यति ततः शरणागतानां
संरक्षितेति बिरुदं वरद त्वदीयम् ॥ ३५

पर्याकुलं महति दुःखपयोनिधौ मां
पश्यन्करीश यदि जोषमवस्थितस्त्वम् ।
स्फारेक्षणेऽपि मिषति त्वयि निर्निमेषं
पारे करिष्यति दया तव दुर्निवारा ॥ ३६

किं वा करीश कृपणे मयि रक्षणीये
धर्मादिबाह्यसहकारिगवेषणेन ।
नन्वस्ति विश्वपरिपालनजागरूकः
संकल्प एव भवतो निपुणः सहायः ॥ ३७

निर्यन्त्रणं परिणमन्ति न यावदेते
नीरन्ध्रदुष्कृतभवा दुरितप्ररोहाः ।
तावन्न चेत्त्वमुपगच्छसि शार्ङ्गधन्वा
शक्यं त्वयापि न हि वारयितुं करीश ॥ ३८

यावन्न पश्यति निकाममर्मर्षणो मां
भ्रूभंगभीषणकरालमुखः कृतान्तः ।
तावत्पतन्तु मयि ते भगवन्दयालो-
रुन्निद्रपद्मकलिकामधुराः कटाक्षाः ॥ ३९

स त्वं स एव रभसो भवदौपवाह्य-
श्चक्रं तदेव शितधारमहं च पाल्यः ।
साधारणे त्वयि करीश समस्तजन्तो-
र्मातङ्गमानुषभिदा न विशेषहेतुः ॥ ४०

निर्वापयिष्यति कदा करिशैलधामन्
दुर्वारकर्मपरिपाकमहादवाग्निम् ।
प्राचीनदुःखमपि मे सुखयन्निव त्वत्-
पादारविन्दपरिचाररसप्रवाहः ॥ ४१

मुक्तः स्वयं सुकृतदुष्कृतशृङ्खलाभ्या-
मर्चिर्मुखैरधिकृतैरतिवाहिताध्वा ।
स्वच्छन्दकिंकरतया भवतः करीश
स्वाभाविकं प्रति लभेय महाधिकारम् ॥ ४२

त्वं चेत्प्रसीदसि तवास्मि समीपतश्चेत्-
त्वय्यस्ति भक्तिरनघा करिशैलनाथ ।
संसृज्यते यदि च दासजनस्त्वदीयः
संसार एष भगवन्नपवर्ग एव ॥ ४३

आहूयमानमनपायविभूतिकामै-
रालोकलुप्तजगदान्ध्यमनुस्मरेयम् ।
आलोहितांशुकमनाकुलहेतिजालं
हैरण्यगर्भहयमेधहविर्भुजं त्वाम् ॥ ४४

भूयो भूयः पुलकनिचितैरङ्गकैरेधमानाः
स्थूलस्थूलान्नयनमुकुलैर्बिभ्रतो बाष्पबिन्दून् ।
धन्याः केचिद्वरद भवतः संसदं भूषयन्तः
स्वान्तैरन्तर्विनयनिभृतैः स्वादयन्ते पदं ते ॥ ४५

वरद तव विलोकयन्ति धन्या
मरकतभूधरमातृकायमाणम् ।
व्यपगतपरिकर्मवारवाणं
मृगमदपङ्कविशेषनीलमङ्गम् ॥ ४६

अनिभृतपरिरम्भैराहितामिन्दिरायाः
कनकवलयमुद्रां कण्ठभागे दधानः ।
फणिपतिशयनीयादुत्थितस्त्वं प्रभाते
वरद सततमन्तर्मानसं संनिधेयाः ॥ ४७

तुरगविहगराजस्यन्दनान्दोलिकादि-
ष्वधिकमधिकमन्यामात्मशोभां दधानम् ।
अनवधिकविभूतिं हस्तिशैलेश्वरं त्वा-
मनुदिनमनिमेषैर्लोचनैर्निर्विशेयम् ॥ ४८

निरन्तरं निर्विशतस्त्वदीय-
मस्पृष्टचिन्तापदमाभिरूप्यम् ।
सत्यं शपे वारणशैलनाथ
वैकुण्ठवासेऽपि न मेऽभिलाषः ॥ ४९

व्यातन्वाना तरुणतुलसीदामभिः स्वामभिख्यां
मातङ्गाद्रौ मरकतरुचिं पुष्णती मानसे नः ।
भोगैश्वर्यप्रियसहचरैः कापि लक्ष्मीकटाक्षै-
र्भूयः श्यामा भुवनजननी देवता संनिधत्ताम् ॥ ५०

इति विहितमुदारं वेङ्कटेशेन भक्त्या
श्रुतिसुभगमिदं यः स्तोत्रमङ्गीकरोति ।
करिशिखरिविटङ्कस्थायिनः कल्पवृक्षा-
द्भवति फलमशेषं तस्य हस्तापचेयम् ॥ ५१

॥ वरदराजपञ्चाशत् संपूर्णा ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

श्रीमतेनिगमान्तमहागुरवेनमः ।।

हरिदिनतिलकम्

नित्ये काम्ये च धर्मे नियमगुणविधिप्राप्तमार्गे निजाना-
माज्ञानुज्ञाक्रमे तद्विहरणमुपधीकृत्य गोपायते यः ।
तस्मिन्कस्मिँश्चिदाद्ये हरिदिनतुलसीद्वादशीभिः प्रसाद्ये
भद्राणामेकसेतौ भवतु भगवति श्रीसखे भावना नः ।। १

त्रेधाधिक्यादिभेदाद्भवति तु नवधा तादृशी द्वादशी नः
शुद्धाविद्धेति चाष्टादशतनुरुदिता सद्भिरेकादशी सा ।
आद्यायामुत्तरत्र व्रतविधिरुभयोस्स्याद्व्यवस्थाथषट्सु
प्राच्यां द्वन्द्वे सतुर्ये परमिह नियतिस्सात्रिकेन्त्यत्रिके प्राक् ।।२

द्वादश्युक्ता सुधात्मा विषमिति दशमी द्विस्स्पृगेकादशी सा
ग्राह्याधिक्येसुधाया इति जगदुरिमामाहुरेके सकामे ।
वृद्धद्वादश्यभावे त्वियमिति च कला द्वन्द्वमेकापि वृद्धिः
सन्दिग्धेतूत्तरस्यां व्रतमुपवसनं पारणोक्ता परस्याम् ।। ३

उक्ता नाड्यश्चतस्रस्त्वरुणसमुदयस्तत्र वेधे दशम्याः
कर्तव्यो नोपवासः फलमिह हि वरं मोहिनी पर्यगृह्णात् ।
वेधः पश्चात् यदास्यात्सवितुरुदयतस्तत्फलं दानवानाम्
प्रोक्तारुचप्रत्यवाया बहव इह तथाप्यादृता क्वापिविद्धा ।। ४

पौराणिक्यातु रुक्माङ्गदचरितमुखैः प्राप्तगत्या पदव्या
शुद्धा सिद्धान्तयन्तः कतिचन कृतिनः सर्वथोज्झन्ति विद्धाम् ।
युक्तं तन्मास्मभूद्वा मुनिभिरभिहिता द्वादशी च व्रतार्हाः
रक्षेत्तेनापिमुख्यस्वदिवसविधिनानन्यभक्तान्हरिस्ताः ।। ५

शुक्ला या तूपवासस्तदितरविषये केवलास्यादभुक्तिः
कर्तव्येत्त्येवमाहुः कतिचनग्रहिणां सूत्रिणाभित्यमात्रम् ।
एतद्विष्णुव्रतस्येतरविषयमिति प्रोचुरन्येस्फुटोक्तेः
द्विस्पृक्चेत् द्वादशीस्यादनुपवसनतः क्वापिनक्तंत्विहोक्तम् ॥ ६

एकादश्यामभुक्तिस्मृतिरपिविविधैस्सन्नियम्येतवाक्यैः ।
विद्धायास्त्याज्यतोक्तेः क्वचिदनुमतितः क्वापिविद्धापवादात् ।
वैधित्त्वेकादशीस्यादितिजहदजहल्लक्षणातोव्रतार्हा
चातुर्मास्यादिभेदे पुनरपिविधयो गौरवव्यञ्जनार्हाः ॥ ७

पत्न्यासिद्धेऽथवारप्रभृतिषुवचनैर्येषुयेषूपवासः
तत्राप्येकादशी चेद्व्रत मिदमनघं प्रक्रमोक्तन्नशेषे ।
अष्टाङ्गेज्यावतामप्युपवसनदिने लुप्तमन्त्यन्निषेधा
देवं प्राणाग्निहोत्रंप्रथममुपगतेऽप्येवमन्तेप्रयोज्यम् ॥ ८

सिद्ध्यत्यश्नन्तएवेत्यपि यदनुवदन्त्याहिताग्न्यादिवर्गे
तत्तुस्याद्ग्राससंख्यानियतिविहतयेनव्रतत्यागहेतुः ।
भुक्तेऽपिस्यान्नदोषः क्वचिदपिविषयेबालवृद्धातुरादौ
शक्यैश्चिन्ता जपाद्यैः प्रभुरनघदयस्तैरपिप्रीणनीयः ॥ ९

सूतौशावेचकार्योविधिबलनियतः स्नानपूर्वोपवासो
नार्चादिस्तत्रनित्येशुचिभिरथपरैः कारयेत्काम्य रूपे ।
शावाद्यन्तेतुकुर्याच्छकनसमुचितं स्नानपूर्वप्रदानम्
मध्येचेद्दर्शपूर्णश्रुतिमुखविधिवत्कारयेद्वाथकुर्यात् ॥ १०

अप्रक्रान्तेविधेयव्रतयजनमुखस्थानसर्वप्रकारे
स्यात्प्रक्रान्तस्यनाश प्रभृतिहि भगवान् कर्मयोगेन्यषेधीत् ।
भंगेचास्यव्रतस्यात्रिदिनमुपवसेत् कारयेन्मुण्डनंवा
मौण्ड्यञ्चैतच्छिखावर्जितमिदमखिलं निष्कृतिस्तत्रतुस्यात् ११

तन्त्रं तत्रोपवासान्तर परिपतने काम्यतोवान्यतो वा
तद्वत्प्राणाग्निहोत्रं प्रतिदिननियतं तंत्रितं पारणादौ।
कालाल्पत्वेतदर्चाभवतिलघुतरानित्यकर्माणिचैवं
तत्तत्कालेविदध्यात्स्वसमयनियतंकारयेद्वायथार्हम् ॥ १२

नानर्हैर्भाषणीयं शमयतिसुकृतंमन्त्रपूर्वैस्तथाच
प्राश्नीयात्पारणादौमुनिदलतुलसीपत्रधात्रीफलानि।
शक्तौजागर्तुरात्रावपिहरिचरणध्यानसंकीर्तनाद्यैः
प्रारम्भे पारणेचस्मृतमिहमुनिभिर्मन्त्रपुष्पार्पणादि ॥ १३

काँस्यंमांस्संमसूरश्वणकमधुपुरी कालशाकादिवर्गान्
अन्यान्नंकोद्रवादीन्यतिघृतमपिचात्यष्टिमुज्झेद्दशम्याम्।
ताम्बूलंदन्तकाष्ठं निधुवनमसकृद्वारिपानादिजह्यात्
एकादश्यांदिवाचस्वपनमशकनाद्याश्रया भीमनीतिः ॥ १४

द्वादश्यां द्वादशोज्झेद्विवदनमनृतंमैथुनंमांसतैल-
द्यूतव्यायामहिंसास्त्रपनमपिदिवाकाँस्यभुक्तिक्रुधश्च।
निर्माल्योल्लंघनश्चव्रतहतिगसकंस्यान्निषेधेनिषेकं
कालाप्राप्तौप्रवृत्तेव्रतमिदमविदुर्नित्यकाम्यप्रकारम् ॥ १५

किञ्चोक्तंमद्यपानान्निपततिनरकेतस्यपातैवशक्त-
स्त्वेकादश्यन्नकामः सहनिजपितृभिः नारकेमज्जतीति।
वाराहश्वादिविट्प्राशनजनितमघं प्राहुरत्रान्नभोक्तुः
भुक्तिस्तत्राश्नतश्चस्मृतमिहहिमहापाप्मनामास्पदंतत् ॥ १६

आतिष्ठेत्तासुयुक्तस्तिथिषुविधिवलाच्छ्राद्धमन्यन्निषिद्धं
प्राक्सामान्यापवादाद्दृतुगतिनियतिः सन्तति स्थापनार्था ।
एकैकात्यंतलंश्यात्विहतुनृषुचतुर्भुक्तिवर्जंत्विहोक्तम्
श्रेयस्सिद्ध्यै स्वतःश्रीहरिदिनतिलकंशेषभूभृत्प्रसादात् ॥

इति श्रीकवितार्किकसिंहस्यसर्वतन्त्रस्वतन्त्रस्य
श्रमद्वेङ्कटनाथस्यवेदान्ताचार्यस्य कृतिषु
हरिदिनतिलकम् सम्पूर्णम्

वेगासेतु स्तोत्रम्

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

एकं वेगवतीमध्ये हस्तिशैले च दृश्यते ।
उपाय फल भावेन स्वयं व्यक्तंपरं महः ॥ १

ईष्टे गमयितुं पारमेष सेतुरभङ्गुरः ।
यत्र सारस्वतं स्रोतो विश्राम्यति विशृङ्खलम् ॥ २

जयति जगदेकसेतु-
वेंगवतीमध्यलक्षितो देवः ।
प्रशमयति यः प्रजानां
प्रथितान्संसारजलधिकल्लोलान् ॥ ३

विभातु मे चेतसि विष्णुसेतु-
र्वेगापगावेगविघातहेतुः ।
अम्भोजयोनेर्यदुपज्ञमासी-
दभङ्गरक्षा हयमेधदीक्षा ॥ ४

चतुराननसप्ततन्तुगोप्ता
सरितं वेगवतीमसौ निरुन्धन् ।
परिपुष्यति मङ्गलानि पुंसां
भगवद्भक्तिमतां यथोक्तकारी ॥ ५

श्रीमान्पितामहवधूपरिचर्यमाणः
शेते भुजङ्गशयने स महाभुजङ्गः ।
प्रत्यादिशन्ति भवसंचरणं प्रजानां
भक्तानुगन्तुरिह यस्य गतागतानि ॥ ६

प्रशमितहयमेधव्यापदं पद्मयोनेः
श्रितजनपरतन्त्रं शेषभोगे शयानम् ।
शरणमुपगताः स्मः शान्तनिःशेषदोषं
शतमखमणिसेतुं शाश्वतं वेगवत्याः ॥ ७

शरणमुपगतानां सोऽयमादेशकारी
शमयति परितापं संमुखः सर्वजन्तोः ।
शतगुणपरिणामः संनिधौ यस्यनित्यं
वरवितरणभूमा वारणाद्रीश्वरस्य ॥ ८

काञ्चीभाग्यं कमलनिलयाचेतसोऽभीष्टसिद्धिः
कल्याणानां निधिरविकलः कोऽपि कारुण्यराशिः ।
पुण्यानां नः परिणतिरसौ भूषयन्भोगिशय्यां
वेगासेतुर्जयति विपुलो विश्वरक्षैकहेतुः ॥ ९

वेगासेतोरिदं स्तोत्रं वेङ्कटेशेन निर्मितम् ।
ये पठन्ति जनास्तेषां यथोक्तं कुरुते हरिः ॥ १०

वेगासेतुस्तोत्रं संपूर्णम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः ॥

अष्टभुजाष्टकम्

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

गजेन्द्ररक्षात्वरितं भवन्तं
ग्राहैरिवाहं विषयैर्विकृष्टः ।
अपारविज्ञानदयानुभाव-
माप्तं सतामष्टभुजं प्रपद्ये ॥ १

त्वदेकशेषोऽहमनात्मतन्त्र-
स्त्वत्पादलिप्सा दिशता त्वयैव ।
असत्समोऽप्यष्टभुजास्पदेश
सत्तामिदानीमुपलम्भितोऽस्मि ॥ २

स्वरूपरूपास्त्रविभूषणाद्यैः
परत्वचिन्तां त्वयि दुर्निवाराम् ।
भोगे मृदूपक्रमतामभीप्सन्-
शीलादिभिर्वारयसीव पुंसाम् ॥ ३

शक्तिं शरण्यान्तरशब्दभाजां
सारं च संतोल्य फलान्तराणाम् ।
त्वद्दास्यहेतोस्त्वयि निर्विशङ्कं
न्यस्तात्मनां नाथ बिभर्षि भारम् ॥ ४

अभीतिहेतोरनुवर्तनीयं
नाथ त्वदन्यं न विभावयामि ।
भयं कुतः स्यात्त्वयि सानुकम्पे
रक्षा कुतः स्यात्त्वयि जातरोषे ॥ ५

त्वदेकतन्त्रं कमलासहाय
  स्वेनैव मां रक्षितुमर्हसि त्वम् ।
त्वयि प्रवृत्ते मम किं प्रयासैस्त्व-
  य्यप्रवृत्ते मम किं प्रयासैः ॥ ६

समाधिभङ्गेष्वपि संपतत्सु
  शरण्यभूते त्वयि बद्धकक्ष्ये ।
अपत्रपे सोढुमकिञ्चनोऽहं
  दूराधिरोहं पतनं च नाथ ॥ ७

प्राप्ताभिलाषं त्वदनुग्रहान्मां
  पद्मानिषेव्ये तव पादपद्मे ।
आदेहपातादपराधदूर-
  मात्मान्तकैङ्कर्यरसं विधेयाः ॥ ८

प्रपन्नजनपाथेयं प्रपित्सूनां रसायनम् ।
श्रेयसे जगतामेतच्छ्रीमदष्टभुजाष्टकम् ॥ ९

शरणागतसंत्राणत्वराद्विगुणबाहुना ।
हरिणा वेङ्कटेशीया स्तुतिः स्वीक्रियतामियम् ॥ १०

—०—

॥ अष्टभुजाष्टकं संपूर्णम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः ॥

कामासिकाष्टकम्

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

श्रुतीनामुत्तरं भागं वेगवत्याश्च दक्षिणम् ।
कामादधिवसञ्जीयात्कश्चिदद्भुतकेसरी ॥ १

तपनेन्द्वग्निनयनस्तापानपचिनोतु नः ।
तापनीयरहस्यानां सारः कामासिकाहरिः ॥ २

आकण्ठमादिपुरुषं
कण्ठीरवमुपरि कुण्ठितारातिम् ।
वेगोपकण्ठसङ्गात्-
विमुक्तवैकुण्ठबहुमतिमुपासे ॥ ३

बन्धुमखिलस्य जन्तो-
र्बन्धुरपर्यङ्कबन्धरमणीयम् ।
विषमविलोचनमीडे
वेगवतीपुलिनकेलिनरसिंहम् ॥ ४

स्वस्थानेषु मरुद्गणान्नियमयन्स्वाधीनसर्वेन्द्रियः
पर्यङ्कस्थिरधारणाप्रकटितप्रत्यङ्मुखावस्थितिः ।
प्रायेण प्रणिपेदुषः प्रभुरसौ योगं निजं शिक्षयन्
कामानातनुतादशेषजगतां कामासिकाकेसरी ॥ ५

विकस्वरनखस्वरुक्षतहिरण्यवक्षःस्थली
निरर्गलविनिर्गलद्रुधिरसिन्धुसंध्यायिताः ।
अवन्तु मदनासिकामनुजपञ्चवक्त्रस्य मा-
महंप्रथमिकामिथःप्रकटिताहवा बाहवः ॥ ६

सटापटलभीषणे सरभसाट्टहासोद्भटे
स्फुरत्क्रुधि परिस्फुटभ्रुकुटिकेऽपि वक्त्रे कृते ।
कृपा कपटकेसरिन्दनुजडिम्भदत्तस्तना
सरोजसदृशा दृशा व्यतिविषज्य ते व्यज्यते ॥७

त्वयि रक्षति रक्षकैः किमन्यै-
स्त्वयि चारक्षति रक्षकैः किमन्यैः ।
इति निश्चितधीः श्रयामि नित्यं
नृहरे वेगवतीतटाश्रयं त्वाम् ॥ ८

इत्थं स्तुतः सकृदिहाष्टभिरेष पद्यैः
श्रीवेङ्कटेशरचितैस्त्रिदशेन्द्रवन्द्यः ।
दुर्दान्तघोरदुरितद्विरदेन्द्रभेदी
कामासिकानरहरिर्वितनोतु कामान् ॥ ९

॥ कामासिकाष्टकं संपूर्णम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥
श्रीमते निगमान्तमहादेशिकाय नमः ॥

षोडशायुधस्तोत्रम्

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

—: ० :—

स्वसंकल्पकलाकल्पैरायुधैरायुधेश्वरः ।
जुष्टः षोडशभिर्दिव्यैर्जुषतां वः परः पुमान् । १

यदायत्तं जगच्चक्रं कालचक्रं च शाश्वतम् ।
पातु वस्त्वपरं चक्रं चक्ररूपस्य चक्रिणः ॥ २

यत्प्रसूतिशतैरासन्द्रुमाः परशुलाञ्छिताः ।
स दिव्यो हेतिराजस्य परशुः परिपातु वः ॥ ३

हेलया हेतिराजेन यस्मिन्दैत्याः समुद्धृते ।
शकुन्ता इव धावन्ति स कुन्तः पालयेत वः ॥ ४

दैत्यदानवमुख्यानां दण्ड्यानां येन दण्डनम् ।
हेतिदण्डेशदण्डोऽसौ भवता दण्डयेद्द्विषः ॥ ५

अनन्यान्वयभक्तानां रुन्धन्नाशामतङ्गजान् ।
अनङ्कुशविहारो वः पातु हेतीश्वराङ्कुशः ॥ ६

संभूय शलभायन्ते यत्र पापानि देहिनाम् ।
स पातु शतवक्त्राग्निहेतिर्हेतीश्वरस्य वः ॥ ७

अविद्यां स्वप्रकाशेन विद्यारूपश्छिनत्ति यः ।
स सुदर्शननिस्त्रिंशः सौतु वस्तत्त्वदर्शनम् ॥ ८

क्रियाशक्तिगुणो विष्णोर्यो भवत्यतिशक्तिमान् ।
अकुण्ठशक्तिः सा शक्तिरशक्तिं वारयेत वः ॥ ९

तारत्वं यस्य संस्थाने शब्दे च परिदृश्यते ।
प्रभोः प्रहरणेन्द्रस्य पाञ्चजन्यः स पातु वः ॥ १०

यं सात्त्विकमहंकारमामनन्त्यक्षसायकम् ।
अव्याद्वश्चक्ररूपस्य तद्धनुः शार्ङ्गधन्वनः ॥ ११

आयुधेन्द्रेण येनैव विश्वसर्गो विविच्यते ।
स वः सौदर्शनः कुर्यात्पाशः पाशविमोचनम् ॥ १२

विहारो येन देवस्य विश्वक्षेत्रकृषीवलः ।
व्यज्यते तेन सारेण नासीरविजयोऽस्तु वः ॥ १३

आयुधानामहं वज्रमित्यगीयत यः स वः ।
अव्याद्धेतीशवज्रोऽसावदधीच्यस्थिसंभवः ॥ १४

विश्वसंहृतिशक्तिर्या विश्रुता बुद्धिरूपिणी ।
सा वः सौदर्शनी भूयाद्गदप्रशमनी गदा ॥ १५

यात्यतिक्षोदशालित्वं मुसलो येन तेन वः ।
हेतीशमुसलेनाशु भिद्यतां मोहमौसलम् ॥ १६

शूलिदृष्टमनोर्वाच्यो येन शूलयति द्विषः ।
भवतां तेन भवतात्त्रिशूलेन विशूलता ॥ १७

अस्त्रग्रामस्य कृत्स्नस्य प्रसूतिं यं प्रचक्षते ।
सोव्यात्सुदर्शनो विश्वमायुधः षोडशायुधः ॥ १८

श्रीमद्वेङ्कटनाथेन श्रेयसे भूयसे सताम् ।
कृतेयमायुधेन्द्रस्य षोडशायुधसंस्तुतिः ॥ १९

षोडशायुधस्तुतिः संपूर्णा

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः ॥

॥ श्रीः ॥

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।

वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

न्यासतिलकम्

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे ।

वृणीमहे च तत्राद्यौ दंपती जगतां पती ॥ १

प्रायः प्रपदने पुंसां पौनःपुन्यं निवारयन् ।

हस्तः श्रीरङ्गभर्तुर्मामव्यादभयमुद्रितः ॥ २

अनादेर्निःसीम्नो दुरितजलधेर्यन्निरुपमं

विदुः प्रायश्चित्तं यदुरघुधुरीणाशयविदः ।

तदारम्भे तस्या गिरमवदधानेन मनसा

प्रपद्ये तामेकां श्रियमखिलनाथस्य महिषीम् ॥ ३

महेन्द्राग्नाविष्णुप्रभृतिषु महत्त्वप्रभृतिवत्-

प्रपत्तव्ये तत्त्वे परिणमितवैशिष्ट्यविभवाम् ।

अधृष्यत्वं धृत्वा कमितुरभिगम्यत्वजननीं

श्रियं शीतापाङ्गामहमशरणो यामि शरणम् ॥ ४

स्वतःसिद्धः श्रीमानमितगुणभूमा करुणया

विधाय ब्रह्मादीन्वितरति निजादेशमपि यः ।

प्रपत्त्या साक्षाद्वा भजनशिरसा वापि सुलभं

मुमुक्षुर्देवेशं तमहमधिगच्छामि शरणम् ॥ ५

वृन्दानि यः स्ववशयन्व्रजसुन्दरीणां

वृन्दावनान्तरभुवां सुलभो बभूव ।

श्रीमानशेषजनसंग्रहणाय शेते

रङ्गे भुजङ्गशयने स महाभुजङ्गः ॥ ६

रङ्गास्तीर्णभुजङ्गपुंगववपुःपर्यङ्कवर्यं गतौ
सर्गस्थित्यवसानकेलिरसिकौ तौ दंपती नः पती ।
नाभीपङ्कजशायिनः श्रुतिसुखैरन्योन्यबद्धस्मितौ
डिम्भस्याम्बुजसंभवस्य वचनैरोंतत्सदित्यादिभिः ॥ ७

घनकरुणारसौघभरितां परितापहरां
नयनमहश्छटां मयि तरङ्गय रङ्गपते ।
दुरितहुताशनस्फुरितदुर्दमदुःखमषी-
मलिनितविश्वसौधदुरपह्नववर्णसुधाम् ॥ ८

दुर्मोचोद्भटकर्मकोटिनिबिडोऽप्यादेशवश्यः कृतो
बाह्यैर्नैव विमोहितोऽस्मि कुदृशां पक्षैर्न विक्षोभितः ।
यो माहानसिको महान्यतिपतेर्नीतश्च तत्पौत्रजा-
नाचार्यानिति रङ्गधुर्य मयि ते स्वल्पावशिष्टो भरः ॥ ९

आर्तेष्वाशुफला तदन्यविषयेऽप्युच्छिन्नदेहान्तरा
वह्न्यादेरनपेक्षणात्तनुभृत्तां सत्यादिवद्व्यापिनी ।
श्रीरङ्गेश्वर यावदात्मनियतत्वत्पारतन्त्र्योचिता
त्वय्येव त्वदुपायधीरपिहितस्वोपायभावास्तु मे ॥ १०

त्वय्याचार्यैर्विनिहितभरास्तावका रङ्गनाथ
त्वत्कैंकर्यप्रवणमनसस्त्वद्गुणास्वादमत्ताः ।
त्वय्येकस्मिन्नपि विजहतो मुक्तवत्साधनत्वं
त्वच्छेषत्वस्वरसरसिकाः सूरयो मे स्वदन्ताम् ॥ ११

कल्पस्तोमेऽप्यपास्तत्वदितरगतयोऽशक्तिधीभक्तिभूम्ना
रङ्गेश प्रातिकूल्यक्षरणपरिणमन्निर्विघातानुकूल्याः ।
त्रातारं त्वामभेद्याच्छरणवरणतो नाथ निर्विघ्नयन्त-
स्त्वन्निक्षिप्तात्मरक्षां प्रति रभसजुषः स्वप्रवृत्तिं त्यजन्ति ॥ १२

त्यक्तोपायव्यपायाँस्तदुभयकरणे सत्रपान्सानुतापान्
भूयोऽपि त्वत्प्रपत्त्या प्रशमितकलुषान्हन्त सर्वं सहस्त्वम् ।
रङ्गिन्न्यासान्तरङ्गाखिलजनहितताागोचरत्वन्निदेश
प्रोतिप्राप्तस्ववर्णाश्रमशुभचरितान्पासि धन्याननन्यान् ॥ १३

शोकास्पदांशमथनः श्रयतां भवाब्धौ
रागास्पदांशसहजं न रुणत्सि दुःखम् ।
नो चेदमी जगति रङ्गधुरीण भूयः
क्षोदिष्ठभोगरसिकास्तव न स्मरेयुः ॥ १४

हेतुर्वैधे विमर्शे भजनवदितरत्किंत्वनुष्ठानकाले
वेद्यत्वद्रूपभेदो विविध इह स तूपायतान्यानपेक्षा ।
रङ्गिन्प्रारब्धभङ्गात्फलमधिकमनावृत्तिरुक्तेष्टिवत्स्या-
न्नानाशब्दादिभेदात्प्रपदनभजने सूचिते सूत्रकारैः ॥ १५

भक्तौ रङ्गपते यथा खलु पशुच्छागादिवद्वेदन-
ध्यानोपासनदर्शनादिवचसामिच्छन्त्यभिन्नार्थताम् ।
व्यक्त्यैक्याच्छरणागतिप्रपदनत्यागात्मनिक्षेपण-
न्यासाद्येषु तथैव तन्त्रनिपुणैः पर्यायता स्मर्यते ॥ १६

विश्वासायासभूम्ना न्यसनभजनयोर्गौरवे को विशेष-
स्तत्सद्भावेऽपि धर्मान्तर इव घटते कर्तृभेदाद्विकल्पः ।
तद्धे दोरङ्गशायिन्ननितरगतिताद्युत्थशोकातिरेकात्-
सद्विद्यादौ विकल्पस्त्वभिमतिभिदया तेन तत्रैकराश्यम् ॥ १७

ध्रुवमधिकृतिभेदात्कर्मवद्रङ्गशायिन्
फलति फलमनेकं त्वत्पदे भक्तिरेका ।
शरणवरणवाणी सर्वहेतुस्तथासौ
कृपणभजननिष्ठा बुद्धिदौर्बल्यकाष्ठा ॥ १८

कर्तव्यं सकृदेव हन्त कलुषं सर्वं ततो नश्यति
ब्रह्मेशादिसुदुर्लभं पदमपि प्राप्यं मया द्रागिति ।
विश्वासप्रतिबन्धि चिन्तनमिदं पर्यस्यति न्यस्यतां
रङ्गाधीश रमापतित्वसुभगं नारायणत्वं तव ॥ १९

धीकर्मभक्तिरहितस्य कदाप्यशक्त्या
रंगेश भावकलुषप्रणतिद्वयोक्तेः ।
मन्ये बलं प्रबलदुष्कृतशालिनो मे
त्वन्मूलदेशिककटाक्षनिपातमाद्यम् ॥ २०

अन्धोऽनन्धग्रहणवशगो याति रङ्गेश यद्वत्-
पंगुर्नौकाकुहरनिहितो नीयते नाविकेन ।
भुङ्क्ते भोगानविदितनृपः सेवकस्यार्भकादि-
स्त्वत्संप्राप्तौ प्रभवति तथा देशिको मे दयालुः॥ २१

उक्त्वा धनञ्जयविभीषणलक्ष्यया ते
प्रत्याय्य लक्ष्मणमुनेर्भवता वितीर्णम् ।
श्रुत्वा वरं तदनुबन्धमदावलिप्ते
नित्यं प्रसीद भगवन्मयि रङ्गनाथ ॥ २२

सकृदपि विनतानां सर्वदे सर्वदेहि-
न्युपनिषदभिधेये भागधेये विधेये ।
विरमति न कदाचिन्मोहतो हा हतोऽहं
विषमविषयचिन्तामेदुरा मे दुराशा ॥ २३

यावज्जीवं जगति नियता देहयात्रा भवित्री
त्यक्ताः सर्वे त्रिचतुरदिनग्लानभोगा नभोगाः ।
दत्ते रङ्गी निजमपि पदं देशिकादेशकांक्षी
किं ते चिन्ते परमभिमतं खिद्यसे यत्पुनस्त्वम् ॥ २४

अपि मुहुरपराधैरप्रकम्प्यानुकम्पे
वहति महति योगक्षेमवृन्दं मुकुन्दे ।
मदकलुषमनीषावज्रलेपावलेपा-
ननुगुणयितुमीहे न प्रभूनप्रभूतान् ॥ २५

मातर्भारति मुञ्च मानुषचटून्हे देह लब्धैरलं
लुब्धद्वारदुरासिकापरिभवैस्तोषं जुषेथा मनः ।
वाचः सीमनि रङ्गधामनि महानन्दोन्नमद्भूमनि
स्वामिन्यात्मनि वेङ्कटेश्वरकवेः स्वेनार्पितोऽयं भरः ॥ २६

दास्यं लास्यवतानुसृत्य मनसा रङ्गेश्वर त्वत्पदे
नित्यं किं करवाण्यहं न तु पुनः कुर्यां कदर्याश्रयाम् ।
मीलच्चक्षुषि वेल्लितभ्रुणि मुहुर्दत्तावमानाक्षरे
भीमे कस्यचिदाढ्यकस्य वदने भिक्षाविलक्षां दशम् ॥ २७

त्वय्येकाञ्जलिकिंकरे तनुभृतां निर्व्याजसर्वंसहे
कल्याणात्मनि रङ्गनाथ कमलाकान्ते मुकुन्दे स्थिते ।
स्वामिन्पाहि दयस्व देव कुशलिञ्जीव प्रभो भावये
त्यालापानवलेपिषु प्रलपितुं जिह्रेति जिह्वा मम ॥ २८

त्वयि सति रङ्गधुर्य शरणागतकामदुघे
निरुपधिकप्रवाहकरुणापरिणाहवति ।
परिमितदेशकालफलदान्कलदाकृतिकान्
कथमधिकुर्महे विधिशिवप्रमुखानमुकान् ॥ २९

ओमित्यभ्युपगम्य रङ्गनृपतेऽनन्योचितां शेषतां
स्वातन्त्र्यादिमयीमपोह्य महतीमाद्यामविद्यास्थितिम् ।
नित्यासंख्यविसीमभूतिगुणयोर्यायामनायासतः
सेवासंपदमिन्दिरेश युवयोरैकान्तिकात्यन्तिकीम् ॥ ३०

आचार्याद्रङ्गधुर्य द्वयसमधिगमे लब्धसत्तं तदात्वे
विश्लिष्टाश्लिष्टपूर्वोत्तरदुरितभरं यापितारब्धदेहम् ।
नीतं त्वत्कैस्त्वया वा निरवधिकदयोद्भूतबोधादिरूपं
त्वद्भोगैकस्वभावं दयितमनुचरं त्वत्कृते मां कुरुष्व ॥ ३१

विधानं रङ्गेशादधिगतवतो वेङ्कटकवेः
स्फुरद्वर्णं वक्त्रे परिकलयतां न्यासतिलकम् ।
इहामुत्राप्येष प्रणतजनचिन्तामणिगिरिः
स्वपर्यङ्के सेवां दिशति फणिपर्यङ्करसिकः ॥ ३२

॥ न्यासतिलकं सम्पूर्णम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

॥ श्रीः ॥

न्यासविंशतिः

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

सिद्धं सत्संप्रदाये स्थिरधियमनघं श्रोत्रियं ब्रह्मनिष्ठं
सत्त्वस्थं सत्यवाचं समयनियतया साधुवृत्त्या समेतम् ।
डम्भासूयादिमुक्तं जितविषयगणं दीर्घबन्धुं दयालुं
स्खालित्ये शासितारं स्वपरहितपरं देशिकं भूष्णुरीप्सेत् ॥ १

अज्ञानध्वान्तरोधादघपरिहरणादात्मसाम्यावहत्वा-
ज्जन्मप्रध्वंसिजन्मप्रदगरिमतया दिव्यदृष्टिप्रभावात् ।
निष्प्रत्यूहानृशंस्यान्नियतरसतया नित्यशेषित्वयोगा-
दाचार्यः सद्भिरप्रत्युपकरणधिया देववत्स्यादुपास्यः ॥२

सद्बुद्धिः साधुसेवी समुचितचरितस्तत्त्वबोधाभिलाषी
शुश्रूषुस्त्यक्तमानः प्रणिपतनपरः प्रश्नकालप्रतीक्षः ।
शान्तो दान्तोऽनसूयः शरणमुपगतः शास्त्रविश्वासशाली
शिष्यः प्राप्तः परीक्षां कृतविदभिमतं तत्त्वतः शिक्षणीयः ॥३

स्वाधीनाशेषसत्तास्थितियतनफलं विद्धि लक्ष्मीशमेकं
प्राप्यं नान्यं प्रतीया न च शरणतया कंचिदन्यं वृणीयाः ।
एतस्मादेव पुंसां भयमितरदपि प्रेक्ष्य मोज्झीस्तदाज्ञा-
मित्येकान्तोपदेशः प्रथममिह गुरोरेकचित्तेन धार्यः ॥ ४

मोक्षोपायार्हतैवं भवति भवभृतां कस्यचित्क्वापि काले
तद्वद्भक्तिप्रपत्त्योरधिकृतिनियमस्तादृशा स्यान्नियत्या।
शक्ताशक्तादितत्तत्पुरुषविषयतः स्थाप्यते तद्व्यवस्था
यच्चाहुस्तद्विकल्पः सम इति कतिचित्तत्फलस्याविशेषात्॥५

सानुक्रोशे समर्थे प्रपदनमृषिभिः स्मर्यतेऽभीष्टसिद्ध्यै
लोकेप्येतत्प्रसिद्धं न च विमतिरिह प्रेक्ष्यते क्वापि तन्त्रे।
तस्मात्कैमुत्यसिद्धं भगवति तु भरन्यासविद्यानुभावं
धर्मस्थेयाश्च पूर्वे स्वकृतिषु बहुधा स्थापयांचक्रुरेवम्॥ ६

शास्त्रप्रामाण्यवेदी ननु विधिविषये निर्विशङ्कोऽधिकारी
विश्वासस्याङ्गभावे पुनरिह विदुषा किं महत्त्वं प्रसाध्यम्।
मैवं घोरापराधैः सपदि गुरुफले न्यासमात्रेण लभ्ये
शङ्का पार्ष्णिग्रहार्हा शमयितुमुचिता हेतुभिस्तत्तदर्हैः॥ ७

नेहाभिक्रान्तिनाशो न च विमतिरिह प्रत्यवायो भवेदि-
त्युक्तं कैमुत्यनीत्या प्रपदनविषये योजितं शास्त्रविद्भिः।
तस्मात्क्षेत्रे तदर्हे सुविदितसमयैर्देशिकैः सम्यगुप्तं
मन्त्राख्यं मुक्तिबीजं परिणतिवशतः कल्पते सत्फलाय॥८

न्यासः प्रोक्तोऽतिरिक्तं तप इति कथितः स्वध्वरश्चास्य कर्ता-
हिर्बुध्न्योऽप्यन्ववादीदगणि दिविषदामुत्तमं गुह्यमेतत्।
साक्षान्मोक्षाय चासौ श्रुत इह तु मुधा बाधशङ्का गुणाढ्ये
तन्निष्ठो ह्यन्यनिष्ठान्प्रभुरतिशयितुं कोटिकोट्यंशतोऽपि॥९

नानाशब्दादिभेदादिति तु कथयता सूत्रकारेण सम्यङ्-
न्यासोपासे विभक्ते यजनहवनवच्छब्दभेदादभाक्तात्।
आख्यारूपादिभेदः श्रुत इतरसमः किंच भिन्नोऽधिकारः
शीघ्रप्राप्त्यादिभिः स्याज्जगुरिति च मधूपासनादौ व्यवस्थाम् १०

यत्किंचिद्रक्षणीयं तदवननिपुणे न्यस्यतोऽकिंचनस्य
प्रस्पष्टं लोकदृष्ट्याप्यवगमित इह प्रार्थनाद्यङ्गयोगः ।
तस्मात्कर्माङ्गकत्वं व्यपनयति परापेक्षणाभाववादः
साङ्गे त्वष्टाङ्गयोगव्यवहृतिनियतः षड्विधत्वोपचारः ॥ ११

पञ्चाप्यङ्गान्यभिज्ञाः प्रणिजगुरविनाभावभाञ्जि प्रपत्तेः
कैश्चित्संभावितत्वंयदिह निगदितं तत्प्रपत्त्युत्तरं स्यात् ।
अङ्गेष्वङ्गित्ववादः फलकथनमिह द्वित्रिमात्रोक्तयश्च
प्राशस्त्यं तत्र तत्र प्रणिदधति ततः सर्ववाक्यैककण्ठ्यम् ॥ १२

रक्षापेक्षा स्वसाध्यप्रणयवति भरन्यास आज्ञादिदक्षे
दृष्टा नात्र प्रपत्तिव्यवहृतिरिह तन्मेलने लक्षणं स्यात् ।
गेहागत्यादिमात्रे निपपतु शरणागत्यभिख्योपचारा-
द्यद्वा नैकार्थभावाद्भवति हि विविधः पालनीयत्वहेतुः ॥ १३

आत्मात्मीयस्वरूपन्यसनमनुगतं यावदर्थं मुमुक्षो-
स्तत्त्वज्ञानात्मकं तत्प्रथममथ विधेः स्यादुपाये समेतम् ।
कैंकर्याख्ये पुमर्थेऽप्यनुषजति तदप्यर्थनाहेतुभावा-
त्स्वाभीष्टानन्यसाध्यावधिरिह तु भरन्यासभागोऽङ्गिभूतः ॥ १४

न्यासादेशेषु धर्मत्यजनवचनतोऽकिंचनाधिक्रियोक्ता
कार्पण्यं वाङ्गमुक्तं भजनवदितरापेक्षणं वाप्यपोढम् ।
दुःसाधेच्छोद्यमौ वा क्वचिदुपशमितावन्यसंमेलने वा
ब्रह्मास्त्रन्याय उक्तस्तदिह न विहतो धर्म आज्ञादिसिद्धः ॥ १५

आदेष्टुं स्वप्रपत्तिं तदनुगुणगुणाद्यन्वितं स्वं मुकुन्दो
मामित्युक्त्वैकशब्दं वदति तदुचितं तत्र तात्पर्यमूह्यम् ।
तत्प्राप्यप्रापकैक्यं सकलफलदतां न्यासतोऽन्यानपेक्षां
प्राधान्याद्यं च किंचित्प्रथयति स परं श्रीसखे मुक्त्युपाये ॥ १६

स्वाभीष्टप्राप्तिहेतुः स्वयमिह पुरुषैः स्वीकृतः स्यादुपायः
शास्त्रे लोके च सिद्धः स पुनरुभयथा सिद्धसाध्यप्रभेदात् ।
सिद्धोपायस्तु मुक्तौ निरवधिकदयः श्रीसखः सर्वशक्तिः
साध्योपायस्तु भक्तिर्न्यसनमिति पृथक्तद्वशीकारसिद्ध्यै ॥ १७

अत्यन्ताकिंचनोऽहं त्वदपचरणतः संनिवृत्तोऽद्य नाथ
त्वत्सेवैकान्तधीः स्यां त्वमसि शरणमित्यध्यवस्यामि गाढम् ।
त्वं मे गोपायिता स्यास्त्वयि निहितभरोऽस्म्येवमित्यर्पितात्मा
यस्मै स न्यस्तभारः सकृदथ तु सदा न प्रयस्येत्तदर्थम् ॥ १८

त्यक्त्वोपायानपायानपि परमजहन्मध्यमां स्वार्हवृत्तिं
प्रायश्चित्तं च योग्यं विगतऋणततिर्द्वन्द्ववात्यां तितिक्षुः ।
भक्तिज्ञानादिवृद्धिं परिचरणगुणान्सत्समृद्धिं च युक्त्या
नित्यं याचेदनन्यस्तदपि भगवतस्तस्य यद्वाऽऽप्तवर्गात् ॥१९

आज्ञाकैंकर्यवृत्तिष्वनघगुरुजनप्रक्रियानेमिवृत्तिः
स्वार्हानुज्ञातसेवाविधिषु च शकने यावदिष्टं प्रवृत्तः ।
कर्म प्रारब्धकार्यं प्रपदनमहिमध्वस्तशेषं द्विरूपं
भुक्त्वा स्वाभीष्टकाले विशति भगवतः पादमूलं प्रपन्नः ॥ २०

श्रुत्या स्मृत्यादिभिश्च स्वयमिह भगवद्वाक्यवर्गैश्च सिद्धां
स्वातन्त्र्ये पारतन्त्र्येऽप्यनितरगतिभिः सद्भिरास्थीयमानाम् ।
वेदान्ताचार्य इत्थं विविधगुरुजनग्रन्थसंवादवत्या
विंशत्या न्यासविद्यांव्यवृणुत सुधियां श्रेयसे वेङ्कटेशः ॥ २१

संसारावर्तवेगप्रशमनशुभदृग्देशिकप्रेक्षितोऽहं
संत्यक्तोऽन्यैरुपायैरनुचितचरितेष्वद्य शान्ताभिसंधिः।
निःशङ्कस्तत्त्वदृष्ट्या निरवधिकदयं प्राप्य संरक्षकं त्वां
न्यस्यत्वत्पादपद्मे वरद निजभरं निर्भरो निर्भयोऽस्मि॥ २२

॥ न्यासविंशतिः संपूर्णा ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

॥ श्रीमते निगमान्तमहादेशिकाय नमः॥

————

अथ अभीतिस्तवः प्रारम्भः

श्रीमते रामानुजाय नमः ।

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

—:*०*०*:—

अभीतिरिह यज्जुषां यदवधीरितानां भयं
भयाभयविधायिनो जगति यन्निदेशे स्थिताः ।
तदेतदतिलङ्घितद्रुहिणशंभुशक्रादिकं
रमासखमधीमहे किमपिरङ्गधुर्यं महः ॥ १

दयाशिशिरताशया मनसि मे सदा जागृयुः
श्रियाध्युषितवक्षसः श्रितमरुद्वृधासैकताः ।
जगद्दुरितघस्मरा जलधिडिम्भडम्भस्पृशः
सकृत्प्रणतरक्षणप्रथितसंविदः संविदः ॥ २

यदद्यमितबुद्धिना बहुतमोहभाजा मया
गुणग्रथितकायवाङ्मनसवृत्तिवैचित्र्यतः ।
अतर्कितहिताहितक्रमविशेषमारभ्यते
तदप्युचितमर्चनं परिगृहाण रङ्गेश्वर ॥ ३

मरुत्तरणिपावकत्रिदशनाथकालादयः
स्वकृत्यमधिकुर्वते त्वदपराधतो बिभ्यतः ।
महत्किमपि वज्रमुद्यतमिवेति यच्छ्रूयते
तरत्यनघतद्भयं य इह तावकः स्तावकः ॥ ४

भवन्तमिह यः सुधीर्नियतचेतनाचेतनं
पनायति नमस्यति स्मरति वक्ति पर्येति वा ।
गुणं कमपि वेत्ति वा तव गुणेशगोपायितुः
कदाचन कुतश्चन क्वचन तस्य न स्याद्भयम् ॥ ५

स्थिते मनसि विग्रहे गुणिनि धातुसाम्ये सति
स्मरेदखिलदेहिनं य इह जातुचित्त्वामजम् ।
तयैव खलु संधया तमथ दीर्घनिद्रावशं
स्वयं विहितसंस्मृतिर्नयसि धाम नैश्श्रेयसम् ॥ ६

रमादयित रङ्गभूरमण कृष्ण विष्णो हरे
त्रिविक्रम जनार्दन त्रियुगनाथ नारायण ।
इतीव शुभदानि यः पठति नामधेयानि ते
न तस्य यमवश्यता नरकपातभीतिः कुतः ॥ ७

कदाचिदपि रङ्गभूरसिक यत्र देशे वशी
त्वदेकनियताशयस्त्रिदशवन्दितो वर्तते ।
तदक्षततपोवनं तव च राजधानी स्थिरा
सुखस्य सुखमास्पदं सुचरितस्य दुर्गं महत् ॥ ८

त्रिवर्गपथवर्तिनां त्रिगुणलङ्घनोद्योगिनां
द्विषत्प्रमथनार्थिनामपि च रङ्गदृश्योदयाः ।
स्खलत्समयकातरीहरणजागरूकाः प्रभो
करग्रहणदीक्षिताः क इह ते न दिव्या गुणाः ॥ ९

बिभेति भवभृत् प्रभो त्वदुपदेशतीव्रौषधात्
कदध्वरसदुर्विषे बडिषभक्षवत् प्रीयते ।
अपथ्यपरिहारधीविमुखमित्थमाकस्मिकी
तमप्यवसरे क्रमादवति वत्सला त्वद्दया ॥ १०

अपार्थ इति निश्चतः प्रहरणादियोगस्तव
स्वयं वहसि निर्भयस्तदपि रङ्गपृथ्वीपते ।
स्वरक्षणमिवाभवत्प्रणतरक्षणं तावकं
यदात्थ परमार्थविन्नियतमन्तरात्मेति ते ॥ ११

लघिष्ठसुखसंगतैः स्वकृतकर्मनिर्वर्तितैः
कलत्रसुतसोदरानुचरबन्धुसंबन्धिभिः ।
धनप्रभृतिकैरपि प्रचुरभीतिभेदोत्तरै-
र्नबिभ्रति धृतिं विभो त्वदनुभूतिभोगार्थिनः ॥ १२

नवक्तुमपि शक्यते नरकगर्भवासादिकं
वपुश्च बहुधातुकं निपुणचिन्तने तादृशम् ।
त्रिविष्टपसुखं तथा तव पदस्य देदीप्यतः
किमत्र न भयास्पदं भवति रङ्गपृथ्वीपते ॥ १३

भवन्ति सुखभेदतो भयनिदानमेव प्रभो
शुभाशुभविकल्पिता जगति देशकालादयः ।
इति प्रथितसाध्वसे मयि दयिष्यसे त्वं न चेत्
क इत्थमनुकम्पिता त्वदनुकम्पनीयश्च कः ॥ १४

सकृत्प्रपदनस्पृशामभयदाननित्यव्रती
नच द्विरभिभाषसे त्वमिति विश्रुतः स्वोक्तितः ।
यथोक्तकरणं विदुस्तव तु यातुधानादयः
कथं वितथमस्तु तत् कृपणसार्वभौमे मयि ॥ १५

अनुक्षणसमुत्थिते दुरतिवारिधौ दुस्तरे
यदि क्वचन निष्कृतिर्भवति सापि दोषाविला ।
तदित्थमगतौ मयि प्रतिविधानमाधीयतां
स्वबुद्धिपरिकल्पितं किमपि रङ्गधुर्य त्वया ॥ १६

विषादबहुलादहं विषयवर्गतो दुर्जया-
द्बिभेमि वृजिनोत्तरस्त्वदनुभूतिविच्छेदतः ।
मया नियतनाथवानयमिति त्वमर्थापयन्
दयाधन जगत्पते दयितरङ्ग संरक्ष माम् ॥ १७

निसर्गनिरनिष्टता तव निरम्हसः श्रूयते
ततस्त्रियुगसृष्टिवद्भवति संहृतिः क्रीडितम् ।
तथापि शरणागतप्रणयभङ्गभीतो भवान्
मदिष्टमिह यद्भवेत्किमपि मास्म तज्जीहपत् ॥ १८

कयाधुसुतवायसद्विरदपुङ्गवद्रौपदी-
विभीषणभुजङ्गमव्रजगणाम्बरीषादयः ।
भवत्पदसमाश्रिता भयविमुक्तिमापुर्यथा
लभेमहि तथा वयं सपदि रङ्गधुर्य त्वया ॥ १९

भयं शमय रङ्गधाम्न्यनितराभिलाषस्पृशां
श्रियं बहुलय प्रभो श्रितविपक्षमुन्मूलय ।
स्वयं समुदितं वपुस्तव निशामयन्तस्सदा
वयं त्रिदशनिर्वृतिं भुवि मुकुन्द विन्देमहि ॥ २०

श्रियः परिवृढे त्वयि श्रितजनस्य संरक्षके
सदद्भुतगुणोदधाविति समर्पितोऽयं भरः ।
प्रतिक्षणमतः परं प्रथय रङ्गधामादिषु
प्रभुत्वमनुपाधिकं प्रथितहेतिभिर्हेतिभिः ॥ २१

कलिप्रणिधिलक्षणैः कलितशाक्यलोकायतै-
स्तुरुष्कयवनादिभिर्जगति जृम्भमाणं भयम् ।
प्रकृष्टनिजशक्तिभिः प्रसभमायुधैः पञ्चभिः
क्षितित्रिदशरक्षकैः क्षपय रङ्गनाथ क्षणात् ॥ २२

दितिप्रभवदेहभिद्दहनसोमसूर्यात्मकं
तमः प्रमथनं प्रभो समुदितास्त्रवृन्दं स्वतः ।
स्ववृत्तिवशवर्तितत्रिदशवृत्तिचक्रं पुनः
प्रवर्त्तयतु धाम्नि ते महति धर्मचक्रस्थितिम् ॥ २३

मनुप्रभृतिमानिते महति रङ्गधामादिके
दनुप्रभवदारुणैर्दरमुदीर्यमाणं परैः ।
प्रकृष्टगुणकः श्रिया वसुधया च सन्धुक्षितः
प्रयुक्तकरुणोदधे प्रशमयस्वशक्त्या स्वयम् ॥ २४

भुजङ्गमविहङ्गमप्रवरसैन्यनाथाः प्रभो
तथैव कुमुदादयो नगरगोपुरद्वारपाः ।
अचिन्त्यबलविक्रमास्त्वमिव रङ्गसंरक्षका
जितं त इति वादिनो जगदनुग्रहे जाग्रति ॥ २५

विधिस्त्रिपुरमर्दनस्त्रिदशपुङ्गवः पावको
यमप्रभृतयोऽपि यद्विमतरक्षणे न क्षमाः ।
रिरिक्षिषति यत्र च प्रतिभयं न किञ्चित् क्वचित्
स नः प्रतिभटान् प्रभो शमय रङ्गधामादिके ॥ २६

सकैटभतमोरविर्मधुपरागझञ्झामरु-
द्धिरण्यगिरिदारणस्त्रुटितकालनेमिद्रुमः ।
किमत्र बहुना भजद्भवपयोधिमुष्टिंधय-
स्त्रिविक्रम भवत्क्रमः क्षिपतु मंक्षुरङ्गद्विषः ॥ २७

यतिप्रवरभारतीरसभरेण नीतं वयः
प्रफुल्लपलितं शिरः परमिह क्षमं प्रार्थये ।
निरस्तरिपुसंभवे क्वचन रङ्गमुख्ये विभो
परस्परहितैषिणां परिसरेषु मां वर्तय ॥ २८

प्रबुद्धगुरुवीक्षणप्रथित वेङ्कटेशोद्भवा-
मिमामभयसिद्धये पठत रङ्गभर्तुः स्तुतिम् ।
भयं त्यजत भद्रमित्यभिदधत्सवः केशवः
स्वयं घनघृणानिधिर्गुणगणेन गोपायति ॥ २९

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्क-टनाथस्य श्रीमद्वेदान्ताचार्यस्य कृतिषु अभीतिस्तवः समाप्तः ॥ ३०

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः ॥

गरुडदण्डकः

नमः पन्नगनद्धाय वैकुण्ठवशवर्तिने ।
श्रुतिसिन्धुसुधोत्पादमन्दराय गरुत्मते ॥

गरुडमखिलवेदनीडाधिरूढं द्विषत्पीडनोत्कण्ठिता-कुण्ठवैकुण्ठपीठीकृतस्कन्धमीडे स्वनीडागतिप्रीतरुद्रासुकी-र्तिस्तनाभोगगाढोपगूढस्फुरत्कण्टकव्रातवेधव्यथावेपमानद्वि-जिह्वाधिपाकल्पविष्फार्यमाणस्फटावाटिकारत्नरोचिश्छटा-राजिनीराजितं कान्तिकल्लोलिनीराजितम् ॥

जय गरुड सुपर्ण दर्वीकराहार देवाधिपाहारहारिन् दिवौकस्पतिक्षिप्तदम्भोलिधाराकिणाकल्प, कल्पान्तवातू-लकल्पोदयानल्पवीरायितोद्यच्चमत्कारदैत्यारिजैत्रध्वजारोह-निर्धारितोत्कर्ष, संकर्षणात्मन् गुरुत्मन् मरुत्पञ्चकाधीश सत्यादिमूर्ते न कश्चित्समस्ते नमस्ते पुनस्ते नमः ॥

नम इदमजहत्सपर्याय पर्यायनिर्यातपक्षानिलास्फाल-नोद्वेलपाथोधिवीचीचपेटाहतागाधपातालभांकारसंक्रुद्धना-गेन्द्रपीडासृणीभावभास्वन्नखश्रेणये चण्डतुण्डाय नृत्यद्भु-जङ्गभ्रुवे, वज्रिणे दंष्ट्रया तुभ्यमध्यात्मविद्या विधेया विधेया भवद्दास्यमापादयेथा दयेथाश्च मे ॥

मनुरनुगतपक्षिवक्त्रस्फुरत्तारकस्तावकश्चित्रभानुप्रिया-शेखरस्त्रायतां नस्त्रिवर्गापवर्गप्रसूतिः, परव्योमधामन् वलद्वे-षिदर्पज्वलद्वालखिल्यप्रतिज्ञावतीर्ण स्थिरां तत्त्वबुद्धिं परां भक्तिधेनुं, जगन्मूलकन्दे मुकुन्दे महानन्ददोग्ध्रीं दधीथा मुधाकामहीनामहीनामहीनान्तक ॥

षट्त्रिंशद्गणचरणो नरपरिपाटीनवीनगुम्भगुणः ।
विष्णुरथदण्डकोऽयं विघटयतु विपक्षवाहिनीव्यूहम् ॥

विचित्रसिद्धिदः सोऽयं वेङ्कटेशविपश्चिता ।
गरुडध्वजतोषाय गीतो गरुडदण्डकः ॥

॥ गरुडदण्डकः संपूर्णः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः ॥

—०—

गरुडपञ्चाशत्

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

—:०:—

अङ्गेष्वानन्दमुख्यश्रुतिशिखरिमिलद्दण्डकं गण्डपूर्वं
प्रागेवाभ्यस्य षट्सु प्रतिदिशमनघं न्यस्य शुद्धास्त्रबन्धाः ।
पक्षिव्यत्यस्तपक्षद्वितयमुखपुटप्रस्फुटोदारतारं
मन्त्रं गारुत्मतं तं हुतवहदयिताशेखरं शीलयामः ॥ १

वेदः स्वार्थाधिरूढो बहिरबहिरभिव्यक्तिमभ्येति यस्यां
सिद्धिः सांकर्षणी सा परिणमति यया सापवर्गत्रिवर्गा ।
प्राणस्य प्राणमन्यं प्रणिहितमनसो यत्र निर्धारयन्ति
प्राची सा ब्रह्मविद्या परिचितगहना पातु गारुत्मती नः ॥ २

नेत्रं गायत्रमूचे त्रिवृदिति च शिरो नामधेयं यजूंषि
छन्दाँस्यङ्गानि धिष्णयात्मभिरजनि शफैर्विग्रहो वामदेव्यम् ।
यस्य स्तोमात्मनोऽसौ बृहदितरगरुत्ताद्दशास्नायपुच्छः
स्वाच्छन्द्यं नः प्रसूतां श्रुतिशतशिखराभिष्टुतात्मा गरुत्मान् ॥ ३

यो यं धत्ते स्वनिष्ठं वहनमपि वरः स्पर्शितो येन यस्मै
यस्माद्यस्याहवश्रीर्विदधति भजनं यत्र यत्रेति सन्तः ।
प्रायो देवः स इत्थं हरिगरुडभिदाकल्पितारोहवाह-
स्वाभाव्यः स्वात्मभव्यः प्रदिशतु शकुनिर्ब्रह्मसब्रह्मतां नः ॥ ४

एको विष्णोर्द्वितीयस्त्रिचतुरविदितं पञ्चवर्णीरहस्यं
षाड्गुण्यस्मेरसप्तस्वरगतिरणिमाद्यष्टसंपन्नवात्मा ।
देवो दर्वीकरारिर्दशशतनयनारातिसाहस्रलक्षै
र्विक्रीडत्पक्षकोटिर्विघटयतु भयं वीतसंख्योदयो नः ॥५

सत्याद्यैः सात्वतादिप्रथितमहिमभिः पञ्चभिर्व्यूहभेदैः
पंचाभिख्यो निरुन्धन्भवगरलभवं प्राणिनां पंचभावम् ।
प्राणापानादिभेदात्प्रतितनु मरुतो दैवतं पंचवृत्तेः
पंचात्मा पंचधासौ पुरुष उपनिषद्घोषितस्तोषयेन्नः ॥ ६

श्लिष्यद्भोगीन्द्रभोगे श्रुतिनिकरनिधौ मूर्तिभेदे स्वकीये
वर्णव्यक्तीर्विचित्राः परिकलयति यो वक्त्रबाहूरुपादैः ।
प्राणः सर्वस्य जन्तोः प्रकटितपरमब्रह्मभावः स इत्थं
क्लेशं छिन्दन्खगेशः सपदि विपदि नः सन्निधिः संनिधत्ताम् ॥७

अग्रे तिष्ठन्नुदग्रो मणिमुकुर इवानन्यदृष्टेर्मुरारेः
पायान्मायाभुजङ्गीविषमविषभयाद्गाढमस्मान्गरुत्मान् ।
क्षुभ्यत्क्षीराब्धिपाथः सहभवगरलस्पर्शशङ्की स शङ्के
छायां धत्ते यदीयां हृदि हरिहृदयारोहधन्यो मणीन्द्रः ॥ ८

इति गरुडपञ्चाशति परव्यूहवर्णकः प्रथमः ॥

—:०:०:—

आहर्तारं सुधाया दुरधिगममहाचक्रदुर्गास्थिताया
जेतारं वज्रपाणेः सह विबुधगणैराहवे बाहुवेगात् ।
विष्णौ संप्रीयमाणे वरविनिमयतो विश्वविख्यातकीर्तिं
देवं यासूत सासौ दिशतु भगवती शर्म दाक्षायणी नः ॥ ९

वित्रासाद्वीतिहोत्रं प्रथममधिगतैरन्तिके मन्दधाम्ना
भूयस्तेनैव सार्धं भयभरतरलैर्वन्दितो देववृन्दैः ।
कल्पान्तक्षोभदक्षं कथमपि कृपया संक्षिपन्धाम चण्डं
भित्वाण्डं निर्जिहानो भवभयमिह नः खण्डयत्वण्डजेन्द्रः ॥ १०

क्षुण्णक्षोणीधराणि क्षुभितचतुरकूपारतिम्यद्गरुन्ति
त्रुट्यत्तारासराणि स्थपुटितविबुधस्थानकानि क्षिपेयुः।
पातालब्रह्मसौधावधिविहितमुधावर्तनान्यस्मदार्तिं
ब्रह्माण्डस्यान्तराले बृहति खगपतेरर्भकक्रीडितानि॥ ११

संविच्छस्त्रं दिशन्त्या सह विजयचमूराशिषः प्रेषयन्त्या
संबध्नन्त्या तनुत्रं सुचरितमशनं पक्वणं निर्दिशन्त्या।
एनोऽस्मद्वैनतेयो नुदतु विनतया क्लृप्तरक्षाविशेषः
कद्रूसंकेतदास्यक्षपणपणसुधालक्ष्मभैक्षं जिघृक्षुः॥ १२

विक्षेपैः पक्षतीनामनिभृतगतिभिर्वादितव्योमतूर्यो
वाचालाम्भोधिवीचीवलय विरचितालोकशब्दानुबन्धः।
दिक्कन्याकीर्यमाण क्षरदुडुनिकरव्याजलाजाभिषेको
नाकोन्माथाय गच्छन्नरकमपि स मे नागहन्ता निहन्तु॥ १३

ऋक्षाक्षक्षेपदक्षो मिहिरहिमकरोत्तालतालाभिघाती
वेलावाःकेलिलोलो विविधघनघटाकन्दुकाघातशीलः।
पायान्नः पातकेभ्यः पतगकुलपतेः पक्षविक्षेपजातो
वातः पातालहेलापटहपटुरवारम्भसंरम्भधीरः॥ १४

किं निर्घातः किमर्कः परिपतति दिवः किं समिद्धोऽयमौर्वः
किंस्वित्कार्तस्वराद्रिर्ननु विदितमिदं व्योमवर्त्मा गरुत्मान्।
आसीदत्याजिहीर्षत्यभिपतति हरत्यत्ति हा तात हाम्बे-
त्यालापोद्युक्तभिल्लाकुलजठरपुटः पातु नः पत्त्रिनाथः॥ १५

आसृक्वाक्तैरसृग्भिर्दुरुपरमतृषाशातनी शातदंष्ट्रा-
कोटीलोटत्करोटीविकटकटकटारावघोरावतारा।
भिन्द्यात्साधं पुलिन्द्या सपदि परिहतब्रह्मगा जिह्मगारे-
रुद्वेल्लद्भिल्लपल्लीनिगरणकरणा पारणा कारणा नः॥१६

स्वच्छन्दस्वर्गिवृन्दप्रथमतममहोत्पातनिर्घातघोरः
स्वान्तध्वान्तं निरुन्ध्याद्भुतधरणिपयोराशिराशीविपारेः।
प्रत्युद्यद्भिल्लपल्लीभटरुधिरसरिल्लोलकल्लोलमाला
हालानिर्वेशहेलाहलहलबहुलो हर्षकोलाहलो नः ॥ १७

सान्द्रक्रोधानुबन्ध्यात्सरसि नखमुखे पादपे गण्डशैले
तुण्डाग्रे कण्ठरन्ध्रे तदनु च जठरे निर्विशेषं युयुत्सू।
अव्यादस्मानभव्याद विदितनखरश्रेणिदंष्ट्रानिवेशौ
जीवग्राहं गृहीत्वा कमठकरटिनौ भक्षयन्पक्षिमल्लः॥ १८

अल्पः कल्पान्तलीलानटमुकुटसुधासूतिखण्डो बहूनां
निःसारस्त्वद्भुजाद्रेरनुभवतु मुधा मन्थनं त्वेष सिन्धुः।
राकाचन्द्रस्तु राहोः स्वमिति कथयतः प्रेक्ष्य कद्रूकुमारान्
सान्तर्हासं खगेन्द्रः सपदि हतसुधस्त्रायतामायतान्नः॥ १९

आरादभ्युत्थितैरावतममितजवोदश्वदुच्चैःश्रवस्कं
जातक्षोभं विमथ्नन्दिशि दिशि दिविषद्वाहिनीशं क्षणेन।
भ्राम्यन्सव्यापसव्यं सुमहति मिषति स्वर्गिसार्थे सुधार्थं
प्रेङ्खन्नेत्रः श्रियं न प्रकटयतु चिरं पक्षवान्मन्थशैलः ॥२०

अस्थानेषु ग्रहाणामनियतविहितानन्तवक्रातिचारा
विश्वोपाधिव्यवस्थाविगमविलुलितप्रागवागादिभेदाः।
द्वित्राः सुत्रामभक्तग्रहकलहविधावण्डजेन्द्रस्य चण्डाः
पक्षोत्क्षेपा विपक्षक्षपणसरभसाः शर्म मे निर्मिमीरन् ॥२१

तत्तत्प्रत्यर्थिसारावधिविहित मृषारोपगन्धो रुपान्धै-
रेकः क्रीडन्ननेकैः सुरपतिसुभटैरक्षतो रक्षतान्नः।
अन्योन्याबद्धलक्षापहरणविहितामन्दमात्सर्यतुङ्गै-
रङ्गैरेव स्वकीयैरहमहमिकया मानितो वैनतेयः ॥ २२

अस्तव्योमान्तमन्तर्हितनिखिलहरिन्मण्डलं चण्डभानो-
लुण्टाकैर्यैरकाण्डे जगदखिलमिदं-शर्वरी वर्वरीति ।
प्रेङ्खोलत्स्वर्गगोलस्खलदुडुनिकरस्कन्धबन्धान्निरुन्धन्
रंहोभिस्तैर्मदंहो हरतु तरलितब्रह्मसद्मा गरुत्मान् ॥ २३

यः स्वाङ्गे संगरान्तर्गरुदनिललवस्तम्भिते जम्भशत्रौ
कुण्ठास्त्रे सन्नकण्ठं प्रणयति पवये पक्षलेशं दिदेश ।
सोऽस्माकं संविधत्तां सुरपतिपृतनाद्वन्द्वयुद्धैकमल्लो
माङ्गल्यं वालखिल्यद्विजवरतपसां कोऽपि मूर्तो विवर्तः ॥ २४

रुद्रान्विद्राव्य सेन्द्रान्हुतवहसहितं गन्धवाहं गृहीत्वा
कालं निष्काल्य धूत्वा निर्ऋतिधनपती पाशिनं क्लेशयित्वा ।
सर्पाणां छान्बिकानाममृतमयपणप्रापणप्राप्तदर्पो
निर्बाधं क्वापि सर्पन्नपहरतु हरेरौपवाह्यो मदंहः ॥ २५

—:०:०:—

गरुडपञ्चाशति अमृतहरणवर्णको द्वितीयः

भुग्नभ्रूभ्रूकुटीभृद्भ्रमदमितगरुत्क्षोभितक्ष्मान्तरिक्ष-
श्चक्राक्षो वक्रतुण्डः खरतरनखरः क्रूरदंष्ट्राकरालः ।
पायादस्मानपायाद्भयभरविगलद्दन्दशूकेन्द्रशूकः
शौरेः संक्रन्दनादिप्रतिभटपृतनाक्रन्दनः स्यन्दनेन्द्रः ॥ २६

अर्यम्णा धुर्ययोक्त्रग्रहणभयभृता सान्वितोऽनूरुबन्धात्-
कोदण्डज्यां जिघृक्षेदिति चकितधिया शङ्कितः शंकरेण ।
तल्पे कल्पेत मा ते मतिरिति हरिणाप्यादरेणानुनीतः
पक्षीन्द्रस्त्रायतां नः फणधरमहिषीपत्रभङ्गापहारी ॥ २७

छायातार्क्ष्यानहीनां फणमणिमुकुरश्रेणिविस्पष्टबिम्बां-
स्त्राणापेक्षाधृतस्वप्रतिकृतिमनसा वीक्ष्य जातानुकम्पः।
तेषां दृष्ट्वाथ चेष्टाः प्रतिगरुडगणाशङ्कया तुङ्गरोषः
सर्पन्दर्पोद्धतो नः शमयतु दुरितं सर्पसन्तानहन्ता ॥२८

उच्छ्वासाकृष्टताराग णघटितमृषामौक्तिकाकल्पशिल्पः
पक्षव्याधूतपाथोनिधिकुहरगुहागर्भदत्तावकाशः।
दृष्टिं दंष्ट्राग्रदूतीं पृथुषु फणभृतां प्रेषयन्नुत्तमांगे-
ष्वङ्गैरङ्गानि रुन्धन्नवतु पिपतिषुः पत्रिणामग्रणीर्नः ॥२९

आ वेधः सौधशृङ्गादनुपरतगतेरा भुजङ्गेन्द्रलोका-
च्छ्रेणीबन्धं वितन्वन्क्षणपरिणमितालातपातप्रकारः।
पायान्नः पुण्यपापप्रचयमयपुनर्गर्भकुम्भीनिपातात्-
पातालस्यान्तराले बृहति खगपतेर्निर्विघातो निपातः॥३०

प्रत्यग्राकीर्णतत्तत्फणमणिनिकरं शङ्कुलाकोटिवक्रं
तुण्डाग्रं संक्षुवानः कुलगिरिकठिने कर्परे कूर्मभर्तुः।
पातालक्षेत्रपक्वद्विरसनपृतनाशालिविच्छेदशाली
शैलीं नः सप्तशैलीलघिमदरभसः सौतु साध्वीं सुपर्णः ॥३१

पर्यस्यत्पन्नगीनां युगपदसमयानर्भकान्गर्भकोशा-
दुब्रह्मस्तम्बप्रकम्पव्यतिषजदखिलोदन्वदुन्निद्रघोषम्।
चक्षुश्चक्षुःश्रुतीनां सपदि बधिरयत्पातु पत्रीश्वरस्य
क्षिप्रक्षिप्तक्ष्माभृत्क्षणघटितनभःस्फोटमास्फोटितं नः॥३२

तोयस्कन्धो न सिन्धोः समघटत मिथः पक्षविक्षेपभिन्नः
पातालं न प्रविष्टं पृथुनि च विवरे रश्मिभिस्तिग्मरश्मेः।
तावद्ग्रस्ताहिवक्त्रक्षरितविषमषीपङ्ककस्तूरिकाङ्कः
प्रत्यायातः स्वयूथ्यैः स्थित इति विदितः पातु पत्रीश्वरो नः॥३३

वद्धस्पर्धैरिव स्वैर्बहुभिरभिमुखैरेककण्ठं स्तुवाने
तत्तद्विश्वोपकारप्रणयिसुरगणप्रार्थितप्राणरक्षे ।
पायान्नः प्रत्यहं ते कमपि विषधरं प्रेषयामीति भीते
संधित्सौ सर्पराजे सकरुणमरुणानन्तरं धाम दिव्यम् ॥ ३४

क्वाप्यस्थ्ना शर्करढ्यं क्वचन घनतरासृक्छटाशीधुदिग्धं
निर्मोकैः क्वापि कीर्णं विषयमपरतो मण्डितं रत्नखण्डैः ।
अध्यारूढैः स्ववारेष्वहमहमिकया वध्यवेषं दधानैः
काले खेलन्भुजङ्गैः कलयतु कुशलं काद्रवेयान्तको नः ॥ ३५

—: ० :—

गरुडपञ्चाशति नागदमनवर्णकस्तृतीयः ॥

—: ० :—

वामे वैकुण्ठशय्याफणिपतिकटको वासुकिर्ब्रह्मसूत्रो
रक्षेन्नस्तक्षकेण ग्रथितकटितटश्चारुकार्कोटहारः ।
पद्मं कर्णेऽपसव्ये प्रथिमवति महापद्ममन्यत्र बिभ्र-
च्चूडायां शङ्खपालं गुलिकमपि भुजे दक्षिणे पक्षिमल्लः ॥ ३६

वर्त्याभस्वस्तिकाग्रस्फुरदरुणशिखादीप्ररत्नप्रदीपै-
र्बध्नद्भिस्तापमन्तर्बहुलविषमषीगन्धतैलाभिपूर्णैः ।
नित्यं नीराजनार्थैर्निजफणफलकैर्घूर्णमानानि तूर्णं
भोगैरापूरयेयुर्भुजगकुलरिपोर्भूषणानीषणां नः ॥ ३७

अङ्गप्रत्यङ्गलीनामृतरसविसरस्पर्शलोभादिवान्त
स्त्रासाद्ग्रासानुबन्धादिव सहजमिथोवैरशङ्कोत्तरङ्गात् ।
रुद्रागाढोपगूढोच्छ्वसननिबिडितस्थानयोगादिवास्म-
द्भद्रायस्युर्भजन्तो भगवति गरुडे गाढतां गूढपादः ॥ ३८

कोटीरे रत्नकोटिप्रतिफलिततया नैकधा भिन्नमूर्ति-
र्वल्मीकस्थान्स्वयूथ्यानभित इव निजैर्वेष्टनैः कल्पसरक्षः।
क्षेमं नः सौतु हेमाचलविधृतशरन्मेघलेखानुकारी
रोचिश्चूडालचूडामणिरुरगरिपोरेष चूडाभुजङ्गः ॥३९

द्राघीयः कर्णपाशश्रुतिपरिभवनव्रीलयेव स्वभोगं
संक्षिप्याश्नन्समीरं दरविनतमुखो निश्वसन्मन्दमन्दम्।
आसीदद्गण्डभित्तिप्रतिफलनमिषात्क्वापि गूढं विविक्षुः
क्षिप्रं दोषान्क्षिपेन्नः खगपतिकुहनाकुण्डलः कुण्डलीन्द्रः ॥४०

बालाग्रग्रन्थिबन्धग्रथितपृथुशिरोरत्नसंदर्शनीयो
मुक्ताशुभ्रोदराभो हरिमणिशकलश्रेणिदृश्येतरांशः।
विष्वग्दम्भोलिधाराव्रणकिणविषमोत्तम्भनस्तब्धवृत्ति-
र्व्यालाहारस्य हृद्यो हरतु स मदघं हारदर्वीकरेन्द्रः ॥४१

वैकक्ष्यस्रग्विशेषच्छुरणपरिणमच्छस्त्रबन्धानुबन्धो
वक्षः पीठाधिरूढो भुजगदमयितुर्ब्रह्मसूत्रायमाणः।
अश्रान्तस्वैरनिद्राविरचितविविधोच्छ्वासनिश्वासवेग-
क्षामोच्छ्नाकृतिर्नः क्षपयतु दुरितं कोऽपि कद्रूकुमारः ॥४२

श्लिष्यद्द्रासुकीर्तिस्तनतटघुसृणालेपसंक्रान्तसार-
स्फारामोदाभिलाषोन्नमितपृथुफणाचक्रवालाभिरामः।
प्रायः प्रेयः पटीरद्रुमविटपधियाश्लिष्टपक्षीन्द्रबाहु-
र्व्याहन्यादस्मदीयं वृजिनभरमसौ वृन्दशो दन्दशूकः ॥४३

ग्रस्तानन्तर्निविष्टान्फणिन इव शुचा गाढमाश्लिष्य दुःख्यन्
क्षुण्णानेकः स्वबन्धून्क्षुधमिव कुपितः पीडयन्वेष्टनेन।
व्यालस्ताक्ष्योदरस्थो विपुलगलगुहावाहिफूत्कारवात्या-
पौनःपुन्येन हन्यात्पुनरुदरगुहागेहवास्तव्यतां नः॥ ४४

गाढासक्तो गरुत्मत्कटितटनिकटे रक्तचण्डातकाङ्के
फक्कत्काञ्चीमहिम्ना फणिमणिमहसा लोहिताङ्गो भुजङ्गः ।
सत्त्वासांसिद्धिकं नः सपदि बहुविधं कर्मबन्धं निरुन्ध्या-
द्विन्ध्याद्र्यालीनसंध्याघन घटिततटित्कान्तिचातुर्यधुर्यः ॥ ४५

—०—

गरुड़पञ्चाशति परिष्कारवर्णकश्चतुर्थः ॥

—:०:०:—

वेगोत्तानं वितानं व्यजनमनुगुणं वैजयन्ती जयन्ती
मित्रं नित्याभ्यमित्रं युधि विजयरथो युग्ययोगानपेक्षः ।
दासो निष्पर्युदासो दनुतनयभिदो निःसहायः सहायो
दोधूयेतास्मदीयं दुरितमधरितारातिपक्षः स्वपक्षैः ॥ ४६

उक्षा दक्षान्तकस्य स्खलित वलजितःकुञ्जरः खञ्जरीतिः
क्लान्तो धातुः शकुन्तोऽनुग इति दयया सामिरुद्धस्यदोऽपि ।
ग्राहत्रस्तद्विपेन्द्रक्षतिभयचकिताकुण्ठवैकुण्ठचिन्ता-
नासीरोदारमूर्तिर्नरकविहयते स्ताद्विहङ्गेश्वरो नः । ४७

वेगोद्वेलः सुवेलः किमिदमिति मिथो मन्त्रितो वानरेन्द्रै-
र्मायामानुष्यलीलामभिनयति हरौ लब्धसेवाविशेषः ।
वैदेहीकर्णपूरस्तबकसुरभिणा यः समाश्लेषि दोष्णा
तृष्णापारिप्लवानां स भवतु गरुडो दुःखवारिप्लवो नः ॥ ४८

दुग्धोदन्वत्प्रभूतः स्वकमहिमपृथुर्विष्णुना कृष्णनाम्ना
पिञ्छाकल्पानुकल्पः समघटि सुदृढो यत्प्रदिष्टः किरीटः ।
वीरो वैरोचनास्त्रव्रणकिणगुणितोनग्रनिर्घातघातः
संघातं सर्पघाती स हरतु महतामस्मदत्याहितानाम् ॥ ४९

रुन्ध्यात्संवर्तसंध्याघनपटलकनत्पक्षविक्षेपहेला-
वातूलास्फालतूलाञ्चलनिचयतुलाधेयदैतेयलोकः ।
आस्माकैः कर्मपाकैरभिगतमहितानीकमप्रत्यनीकै-
र्दीव्यन्दिव्यापदानैर्दनुजविजयिनो वैजयन्तीशकुन्तः ॥ ५०

यत्पक्षस्था त्रिवेदी त्रिगुणजलनिधिर्लङ्घ्यते यद्गुणज्ञै-
र्वर्गस्त्रैवर्गिकाणां गतिमिह लभते नाथवद्यत्सनाथः ।
त्रैकाल्योपस्थितात्स त्रियुगनिधिरघादायतात्रायतां न
स्त्रातानेकस्त्रिधाम्नस्त्रिदशरिपुचमूमोहनो वाहनेन्द्रः ॥ ५१

सैका पञ्चाशतं यामतनुत विनतानन्दनं नन्दयिष्यन्
कृत्वा मौलौ तदाज्ञां कविकथकघटाकेसरी वेङ्कटेशः ।
तामेतां शीलयन्तः शमितविषधरव्याधिदैवाधिपीडाः
काङ्क्षापौरस्त्यलाभाः कृतमितरफलैस्तार्क्ष्यकल्पा भवन्ति ॥ ५२

—:*०*०*:—

गरुडपञ्चाशति अद्भुतवर्णकः पञ्चमः ॥

—:०:—

गरुडपञ्चाशत्संपूर्णा ॥

—०—

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः ॥

देवनायकपञ्चाशत्

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

—:०:—

प्रणतसुरकिरीटप्रान्तमन्दारमाला-
विगलितमकरन्दस्निग्धपादारविन्दः ।
पशुपतिविधिपूज्यः पद्मपत्रायताक्षः
फणिपतिपुरनाथः पातु मां देवनाथः ॥ १

देवाधिनाथकमलापृतनेशपूर्वां
दीप्तान्तरां वकुलभूषणनाथमुख्यैः ।
रामानुजप्रभृतिभिः परिभूषिताग्रां
गोष्ठीं जगन्ति गुरुपंक्तिमहं प्रपद्ये ॥ २

दिव्ये दयाजलनिधौ दिविषन्नियन्तु
स्तीर्थं निदर्शितवतस्त्रिजगन्निषेव्यम् ।
प्राचः कवीन्निगमसंमितसूनृतोक्तीन्
प्राचेतसप्रभृतिकान्प्रणमाम्यभीक्ष्णम् ॥ ३

मातस्त्वमम्बुरुहवासिनि किंचिदेत-
द्विज्ञाप्यते मयि कुरुष्व तथा प्रसादम् ।
आकर्णयिष्यति यथा विबुधेश्वरस्ते
श्रेयानसौ पृथुकजल्पितवन्मदुक्तिम् ॥ ४

निर्विश्यमानविभवं निगमोत्तमाङ्गैः
स्तोतुं क्षमं मम च देवपते भवन्तम् ।
गावः पिबन्तु गणशः कलशाम्बुराशिं
किं तेन तर्णकगणास्तृणमाददानाः ॥ ५

अज्ञातसीमकमनन्तगरुत्मदाद्यै-
स्तं त्वां समाधिनियतैरपि सामि दृष्टम् ।
तुष्टूषतो मम मनोरथसिद्धिदायी
दासेषु सत्य इति धारय नामधेयम् ॥ ६

विश्राणयन्मम विशेषविदामनिन्द्या-
मन्तर्वर्तीं गिरमहीन्द्रपुराधिराज ।
स्तव्यः स्तवप्रिय इतीव तपोधनोक्तं
स्तोतेति च त्वदभिधानमवन्ध्यय त्वम् ॥ ७

संरक्षणीयममराधिपते त्वयैव
दूरं प्रयातमपि दुस्त्यजगाढबन्धम् ।
आकृष्टवानसि भवाननुकम्पमानः
सूत्रानुबद्धशकुनिक्रमतः स्वयं माम् ॥ ८

व्यामोहिता विविधभोगमरीचिकाभि-
र्विश्रान्तिमद्य लभते विबुधैकनाथ ।
गम्भीरपूर्णमधुरं मम धीर्भवन्तं
ग्रीष्मे तटाकमिव शीतमनुप्रविष्टा ॥ ९

दिव्ये पदे जलनिधौ निगमोत्तमाङ्गे
स्वान्ते सता सवितृमण्डलमध्यभागे ।
ब्रह्माचले च बहुमानपदे मुनीनां
व्यक्तिं तव त्रिदशनाथ वदन्ति नित्याम् ॥ १०

तीर्थैर्वृतं वृजिनदुर्गतिनाशनार्हैः
शेषक्ष्माविहगराजविरिञ्चजुष्टैः ।
नाथ त्वया नतजनस्य भवौषधेन
प्रख्यातमौषधगिरिं प्रणमन्ति देवाः ॥ ११

स्वाधीनविश्वविभवं भगवन्विशेषा-
त्त्वां देवनायकमुशन्ति परावरज्ञाः ।
प्रायः प्रदर्शयितुमेतदिति प्रतीम-
स्त्वद्भक्तिभूषितधियामिह देव भावम् ॥ १२

तत्त्वानि यानि चिदचित्प्रविभागवन्ति
त्रय्यन्तवृद्धगणितानि सितासितानि ।
दीव्यन्ति तान्यहिपुरन्दरधामनाथ
दिव्यास्त्रभूषणतया तव विग्रहेऽस्मिन् ॥ १३

भूषायुधैरधिगतं निजकान्तिहेतो-
र्भुक्तं प्रियाभिरनिमेषविलोचनाभिः ।
प्रत्यङ्गपूर्णमुपमासुभगं वपुस्ते
दृष्ट्वा दृशौ विबुधनाथ न तृप्यतो मे ॥ १४

वेदेषु निर्जरपते निखिलेष्वधीतं
व्यासादिभिर्बहुमतं तव सूक्तमग्र्यम् ।
अङ्गान्यमूनि भवतः सुभगान्यधीते
विश्वं विभो जनितवन्ति विरिञ्चपूर्वम् ॥ १५

देवेश्वरत्वमिह दर्शयितुं क्षमस्ते
नाथ त्वयापि शिरसा विधृतः किरीटः ।
एकीकृतद्युमणिबिम्बसहस्रदीप्ति
र्निर्मूलयन्मनसि मे निविडं तमिस्रम् ॥ १६

मुग्धस्मितामृतशुभेन मुखेन्दुना ते
संगम्य संसरणसंज्वरशान्तये नः ।
संपद्यते विबुधनाथ समाधियोग्या
शर्वर्यसौ कुटिलकुन्तलकान्तिरूपा ॥ १७

बिम्बाधरं विकचपङ्कजलोचनं ते
लम्बालकं ललितकुण्डलदर्शनीयम् ।
कान्तं मुखं कनककैतककर्णपूरं
स्वान्तं विभूषयति देवपते मदीयम् ॥ १८

लब्धातिथौ क्वचिदियं रजनीकरेण
लक्ष्मीः स्थिरा सुरपते भवतो ललाटे ।
यत्स्वेदबिन्दुकणिकोद्गतबुद्बुदान्त-
स्त्र्यक्षः पुरा स पुरुषोऽजनि शूलपाणिः ॥ १९

लावण्यवर्षिणि ललाटतटे घनाभे
बिभ्रत्तटिद्गुणविशेषमिवोर्ध्वपुण्ड्रम् ।
विश्वस्य निर्जरपते तमसावृतस्य
मन्ये विभावयसि माङ्गलिकप्रदीपम् ॥ २०

आहुः श्रुतिं विबुधनायक तावकीना-
माशागणप्रसवहेतुमधीतवेदाः ।
आकर्णिते तदियमार्तरवे प्रजाना-
माशाः प्रसाधयितुमादिशति स्वयं त्वाम् ॥ २१

कन्दर्पलाञ्छनतनुस्त्रिदशैकनाथ
कान्तिप्रवाहरुचिरे तव कर्णपाशे ।
पुष्यत्यसौ प्रतिमुखस्थितिदर्शनीया
भूषामयी मकरिका विविधान्विहारान् ॥ २२

नेतुं सरोजवसतिर्निजमाधिराज्यं
नित्यं निशामयति देवपते भ्रुवौ ते ।
एवं न चेदखिलजन्तुविमोहनार्हा
किं मातृका भवति कामशरासनस्य ॥ २३

आलक्ष्यसत्त्वमतिवेलदयोत्तरङ्ग-
मभ्यर्थिनामभिमतप्रतिपादनार्हम् ।
स्निग्धायतं प्रथिमशालि सुपर्वनाथ
दुग्धाम्बुधेरनुकरोति विलोचनं ते ॥ २४

विश्वाभिरक्षणविहारकृतक्षणैस्ते
वैमानिकाधिप विडम्बितमुग्धपद्मैः ।
आमोदवाहिभिरनामयवाक्यगर्भै-
रार्द्रीभवाम्यमृतवर्षनिर्भरपाङ्गैः ॥ २५

नित्योदितैर्निगमनिःश्वसितैस्तवैषा
नासा नभश्चरपते नयनाब्धिसेतुः ।
आम्रेडितप्रियतमामुखपद्मगन्धै-
राश्वासिनी भवति संप्रति मुह्यतो मे ॥ २६

आरुण्यपल्लवितयौवनपारिजात-
माभीरयोषिदनुभूतममर्त्यनाथ ।
वंशेन शङ्खपतिना च निषेवितं ते
बिम्बाधरं स्पृशति रागवती मतिर्मे ॥ २७

पद्मालयावलयदत्तसुजातरेखे
त्वत्कान्तिमेचकितशङ्खनिभे मतिर्मे ।
विस्मेरभावरुचिरा वनमालिकेव
कण्ठे गुणीभवति देवपते त्वदीये ॥ २८

आजानुलम्बिभिरलंकृतहेतिजालै-
र्ज्याघातराजिरुचिरैर्जितपारिजातैः ।
चित्राङ्गदैस्त्रिदशपुंगव जातसङ्गा
त्वद्बाहुभिर्मम दृढं परिरभ्यते धीः ॥ २९

नीलाचलोदितनिशाकरभास्कराभे
शान्ताहिते सुरपते तव शङ्खचक्रे ।
पाणेरमुष्य भजतामभयप्रदस्य
प्रत्यायनं जगति भावयतः स्वभूम्ना ॥ ३०

अक्षोभणीयकरुणाम्बुधिविद्रुमाभं
भक्तानुरञ्जनममर्त्यपते त्वदीयम् ।
नित्यापराधचकिते हृदये मदीये
दत्ताभयं स्फुरति दक्षिणपाणिपद्मम् ॥ ३१

दुर्दान्तदैत्यविशिखक्षतपत्रभङ्गं
वीरस्य ते विबुधनायक बाहुमध्यम् ।
श्रीवत्सकौस्तुभरमावनमालिकाङ्कं
चिन्तानुभूय लभते चरितार्थतां नः ॥ ३२

वर्णक्रमेण विबुधेश विचित्रिताङ्गी
स्मेरप्रसूनसुभगावनमालिकेयम् ।
हृद्या सुगन्धिरजहत्कमलामणीन्द्रा
नित्या तव स्फुरति मूर्तिरिव द्वितीया ॥ ३३

आर्द्रं तमोमथनमाश्रिततारकं ते
शुद्धं मनः सुमनसाममृतं दुहानम् ।
तत्तादृशं विबुधनाथ समृद्धकामं
सर्गेष्विदं भवति चन्द्रमसा प्रसूतिः ॥ ३४

विश्वं निगीर्य विबुधेश्वर जातकार्श्यं
मध्यं वलित्रयविभाव्यजगद्विभागम् ।
आमोदिनाभिनलिनस्थविरिञ्चिभृङ्ग-
माकल्पयत्युदरबन्ध इवाशयो मे ॥ ३५

नाकौकसां प्रथमतामधिकुर्वते ते
नाभीसरोजरजसां परिणामभेदाः ।
आराधयद्भिरिह तैर्भवतः समीची
वीरोचिताविबुधनायक इत्यभिख्या ॥ ३६

पीताम्बरेण परिवारवती सुजाता
दास्ये निवेशयति देवपते दृशौ मे ।
विन्यस्तसव्यकरसङ्गमजायमान-
रोमाञ्चरम्यकिरणा रशना त्वदीया ॥ ३७

स्त्रीरत्नकारणमुपात्ततृतीयवर्णं
दैत्येन्द्रवीरशयनं दयितोपधानम् ।
देवेश यौवनगजेन्द्रकराभिराम-
मूरीकरोतु भवदूरुयुगं मनो मे ॥ ३८

लावण्यपूरललितोर्ध्वपरिभ्रमाभं
लक्ष्मीविहारमणिदर्पणबद्धसख्यम् ।
गोपाङ्गणेषु कृतचङ्क्रमणं तवैत-
ज्जानुद्वयं सुरपते न जहाति चित्तम् ॥ ३९

दूत्ये दुकूलहरणे व्रजसुन्दरीणां
दैत्यानुधावनविधावपि लब्धसाह्यम् ।
कन्दर्पकाहलनिषङ्गकलाचिकाभं
जङ्घायुगं जयति देवपते त्वदीयम् ॥ ४०

पाषाणनिर्मिततपोधनधर्मदारं
भस्मन्युपाहितनरेन्द्रकुमारभावम् ।
संवाहितं त्रिदशनाथ रमामहीभ्यां
सामान्यदैवतमुशन्ति पदं त्वदीयम् ॥ ४१

आवर्जिताभिरनुषज्य निजांशुजालै-
र्देवेश दिव्यपदपद्मदलायिताभिः ।
अन्याभिलाषपरिलोलमिदं मदीय-
मङ्गीकृतं हृदयमङ्गुलिभिः स्वयं ते ॥ ४२

पङ्कान्यसौ मम निहन्ति महस्तरङ्गै-
र्गङ्गाधिकां विदधती गरुडस्रवन्तीम् ।
नाकौकसा मणिकिरीटगणैरुपास्या
नाथ त्वदीयपदयोर्नखरत्नपङ्क्तिः ॥ ४३

वज्रध्वजाङ्कुशसुधाकलशातपत्र-
कल्पद्रुमाम्बुरुहतोरणशङ्खचक्रैः ।
मत्स्यादिभिश्च विबुधेश्वर मण्डितं ते
मान्यं पदं भवतु मौलिविभूषणं नः ॥ ४४

चित्रं त्वदीयपदपद्मपरागयोगा-
द्योगं विनापि युगपद्विलयं प्रयान्ति ।
विष्वञ्चि निर्जरपते शिरसि प्रजानां
वेधःस्वहस्तलिखितानि दुरक्षराणि ॥ ४५

ये जन्मकोटिभिरुपार्जितशुद्धधर्मा-
स्तेषां भवच्चरणभक्तिरतीव भोग्या ।
त्वज्जीवितैस्त्रिदशनायक दुर्लभैस्तै-
रात्मानमप्यकथयः स्वयमात्मवन्तम् ॥ ४६

निष्किंचनत्वधनिना विबुधेश येन
न्यस्तः स्वरक्षणभरस्तव पादपद्मे ।
नानाविधप्रथितयोगविशेषधन्या
नार्हन्ति तस्य शतकोटितमांशकक्ष्याम् ॥ ४७

आत्मापहाररसिकेन मयैव दत्त-
मन्यैरधार्यमधुना विबुधैकनाथ ।
स्वीकृत्य धारयितुमर्हसि मां त्वदीयं
चोरोपनीतनिजनूपुरवत्स्वपादे ॥ ४८

अज्ञानवारिधिमपायधुरंधरं मा-
माज्ञाविभञ्जनमकिंचनसार्वभौमम् ।
विन्दन्भवान्विबुधनाथ समस्तवेदी
किं नाम पात्रमपरं मनुते कृपायाः ॥ ४९

प्रह्लादगोकुलगजेन्द्रपरीक्षिदाद्या-
स्त्रातास्त्वया ननु विपत्तिषु तादृशीषु ।
सर्वं तदेकमपरं मम रक्षणं ते-
संतोल्यतां त्रिदशनायक किं गरीयः ॥ ५०

वात्याशतैर्विषयरागतया विवृत्तै-
र्व्याघूर्णमानमनसं विबुधाधिराज ।
नित्योपतप्त इति मां निजकर्मधर्मै-
र्निर्वेशय स्वपदपद्ममधुप्रवाहम् ॥ ५१

जय विबुधपते त्वं दर्शिताभीष्टदानः
सह सरजिसवासामेदिनीभ्यां वशाभ्याम् ।
नलवनमिव मृद्नन्पापराशिं नतानां
गरुडसरिदनूपे गन्धहस्तीव दीव्यन् ॥ ५२

निरवधिगुणजातं नित्यनिर्दोषमाद्यं
नरकमथनदक्षं नाकिनामेकनाथम् ।
विनतविषयसत्यं वेङ्कटेशः कविस्त्वां
स्तुतिपदमधिगच्छञ्छोभते सत्यवादी ॥ ५३

॥ देवनायकपञ्चाशत् संपूर्णा ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः ॥

अच्चुअसअअम्

॥ अच्युतशतकम् ॥

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

णमह तिअसाण णाहं
सच्चं दासाण अच्चुअं ठिरजोइम् ।
गलुलणइतडतमालं
अहिन्दणअरोसहाअलेक्कगइन्दम् ॥ १

नमत त्रिदशानां नाथं
सत्यं दासानामच्युतं स्थिरज्योतिः ।
गरुडनदीतटतमाल-
महीन्द्रनगरौषधाचलैकगजेन्द्रम् ॥ १

किंकरसच्च थुई तुह
सअंभुगेहिणिबिलासवाहित्तिमई ।
फणिआ बालेण मए
पञ्जरसुअजप्पिअं व कुणउ पसाअम् ॥ २

किङ्करसत्य स्तुतिस्तव
स्वयंभूगेहिनीविलासव्याहृतिमयी ।
फणिता बालेन मया
पञ्जरशुकजल्पितमिव करोतु प्रसादम् ॥ २

मलिणं वि भासिअं मह
किंकरसच्च तुह किंत्तिजोण्हापसरे ।
लग्गं लहउ विसुद्धिं
रच्छासलिलं व तिवहआसोत्तगअम् ॥ ३

मलिनमपि भाषितं मम
किङ्करसत्य तव कीर्तिज्योत्स्नाप्रसरे ।
लग्नं लभतां बिशुद्धिं
रथ्यासलिलमिव त्रिपथगास्रोतोगतम् ॥ ३

तत्थरिणएण ठविआ
सोहउ तिअसाण णाह तुज्झ समाए ।
वन्दित्तणमहिआणं
मज्झम्मि सुईण बालिसा मज्झ थुई ॥ ४

त्रस्तरिनयेन स्थापिता
शोभतां त्रिदशानां नाथ तव समाजे ।
वन्दित्वमहितानां मध्ये
श्रुतीनां बालिशा मम स्तुतिः ॥ ४

अम्हगुरूणं अच्चुअ
जीहासीहासणम्मि लद्धपइट्ठो ।
पडिवाइअपरमट्ठो
वारेसि अपण्डिअत्तणं अम्हाणम् ॥ ५

अस्मद्गुरूणामच्युत
जिह्वासिंहासने लब्धप्रतिष्ठः ।
प्रतिपादितपरमार्थो
वारयस्यपण्डितत्वमस्माकम् ॥ ५

हिअएसु देसिआणं
  जण्हइलहरीसु पुण्णचन्दो व्व फुडो ।
कलुसजलेसु व हंसो
  कसाअकबुरेसु ठासि अच्चुअ ण खणम् ॥ ६

हृदयेषु देशिकानां
  जाह्नवीलहरीषु पूर्णचन्द्र इव स्फुटः ।
कलुषजलेष्विव हंसः
  कषायकर्बुरेषु तिष्ठस्यच्युत न क्षणम् ॥ ६

आअममेत्तपमाणो
  आगोविअणं पआसणिअमाहप्पो ।
सद्दहिअहिअअसुलहो
  दूरं मुअसि णअसच्च डोलाअन्ते ॥ ७

आगममात्रप्रमाण
  आगोपीजनं प्रकाशनिजमाहात्म्यः ।
श्रद्धितहृदयसुलभो
  दूरं मुञ्चसि नतसत्य दोलायमानान् ॥ ७

सइ खविअसअलहेअं
  सरणागअसच्च सच्चणाणाणन्दनम् ।
उल्लङ्घिअतिविहन्तं
  उवणिसआणं सआइ गाअन्ति तुमम् ॥ ८

सदाक्षपितसकलहेयं
  शरणागतसत्य सत्यज्ञानानन्दम् ।
उल्लङ्घितत्रिविधान्त
  मुपनिषदां शतानि गायन्ति त्वाम् ॥ ८

कुणसि ण कीरसि केण वि
ठावेसि ण संठविज्जसि अणण्णठिओ ।
हरसि णिहिलं ण हीरसि
अहिन्दणअरिन्द अणहजोइफुरन्तो ॥ ९

करोषि न क्रियसे केनापि
स्थापयसि न संस्थाप्यसेऽनन्यस्थितः ।
हरसि निखिलं न ह्रियसे
अहीन्द्रनगरेन्द्रानघज्योतिस्स्फुरन् ॥ ९

अणुपमिअस्स वि अच्चुअ
सत्ती तुह सअलधारणाइवहुत्ता ।
तेण पडिवत्थुपुण्णो
सुव्वसि अपडिहअणिअठिई सव्वगओ ॥ १०

अणुप्रमितस्याप्यच्युत
शक्तिस्तव सकलधारणादिप्रभूता ।
तेन प्रतिवस्तुपूर्णः
श्रूयसेऽप्रतिहतनिजस्थितिःसर्वगतः ॥ १०

सअलाण धरणाणिअमण
सामित्तणणिअमसंठिओ सव्वतणू ।
सुव्वसि अच्चुअ सव्वो
सइ दंसिअकज्जकारणत्तणकब्बुरो ॥ ११

सकलानां धरणनियमन-
स्वामित्वनियमसंस्थितः सर्वतनुः ।
श्रूयसेऽच्युत सर्वः सदा
दर्शितकार्यकारणत्वकर्बुरः ॥ ११

पुरिसपहाणसरीरो
भुवणाणं होसि अच्चुअ उवाआणम् ।
णिअसंकप्पसणाहो
वहसि णिमित्तत्तणं वि अब्भुअसत्ती ॥ १२

पुरुषप्रधानशरीरो
भुवनानां भवस्यच्युतोपादानम् ।
निजसंकल्पसनाथो
वहसि निमित्तत्वमप्यद्भुतशक्तिः ॥ १२

विसमगुणङ्कुरपअरे
जलं व सामण्णकारणं तुह केली ।
णिअकम्मसत्तिणिअआ
अच्चुअ बम्हाइठावरन्तविसेसा ॥ १३

विषमगुणाङ्कुरप्रकरे
जलमिव सामान्यकारणं तव केलिः ।
निजकर्मशक्तिनियता
अच्युत ब्रह्मादिस्थावरान्तविशेषाः ॥ १३

पुरीसा तुज्झ विहूई
अच्चुअ लच्छीअ इत्थिआसण्णाओ ।
णत्थि परं तुज्झाणं
सा वि सिरी होइ तुज्झ किं उण इअरम् ॥१४

पुरुषास्तव विभूति-
रच्युत लक्ष्म्याःस्त्रीसंज्ञाः ।
नास्ति परं युवयोः
सापि श्रीर्भवति तव किं पुनरितरत् ॥ १४

ण हु तुह सरिसब्भहिआ
णाह तुमं एव्व सव्वलोअसरण्णो ।
ए आव णाणसारं
इअ मुणिउं तिअसणाह इअरविइन्ता ॥ १५

न खलु तव सदृशाभ्यधिकाः
नाथ त्वमेव सर्वलोकशरण्यः ।
एतावज्ज्ञानसार-
मिति ज्ञातुं त्रिदशनाथेतरविचिन्ता ॥ १५

भाइ फणिन्दउराहिव
पडिवालन्तेसु पाअडवहुत्तफला ।
अवि दुहिणप्पमुहेहिं
आणत्ती तुह अलङ्घणिज्जपहावा ॥ १६

भाति फणिन्द्रपुराधिप
प्रतिपालयत्सु प्रकटप्रभूतफला ।
अपि द्रुहिणप्रमुखैराज्ञप्ति-
स्तवालङ्घनीयप्रभावा ॥ १६

णिअमविहीण पउत्ती
सव्वाण वि दाससच्च उद्दिसिअ तुमम् ।
सद्धणिमन्तिअबम्हण-
समाहिसिद्धं लहन्ति तिअसा भुत्तिम् ॥ १७

नियमविधीनां प्रवृत्तिः
सर्वेषामपि दाससत्योद्दिश्य त्वाम् ।
श्राद्धनिमन्त्रितब्राह्मण-
समाधिसिद्धां लभन्ते त्रिदशा भुक्तिम् ॥ १७

आरज्झतिअसविलए
अच्चुअ णिच्चं ण ठासि जइ णाम तुमम् ।
कम्माण कप्पिआणं
काहिइ कप्पन्तरेसु को णिव्वेसम् ॥ १८

आराध्यत्रिदशविलये-
ऽच्युत नित्यं न तिष्ठसि यदि नाम त्वम् ।
कर्मणां कल्पितानां
करिष्यति कल्पान्तरेषु को निर्वेशम् ॥ १८

कप्पेसि कंखिआइं
कप्पदुमो व्व सिरिकञ्चणलआसहिओ ।
णअसच्च सइफलाइं
णिअछाहिणिहिण्णणिच्चतावतिहुवणो ॥ १९

कल्पयसि काङ्क्षितानि
कल्पद्रुम इव श्रीकाञ्चनलता सहितः ।
नतसत्य सदाफलानि
निजच्छायानिर्भिन्ननित्यतापत्रिभुवनः ॥ १९

सअलाअमाण णिट्ठा
सअलसुराणं वि अन्तरो अप्पाणो ।
सअलफलाण पसूई
सअलजणाणं समो खुणअसच्च तुमम् ॥ २०

सकलागमानां निष्ठा
सकलसुराणामप्यन्तर आत्मा ।
सकलफलानां प्रसूतिः
सकलजनानां समः खलु नतसत्य त्वम् ॥ २०

इअ सव्वाण समाणो
सच्चठिओ दाससच्च सइ परिपुण्णो ।
कह वहसि पक्खवाअं
पण्डवपमुहेसु पेसणं वि सहन्तो ॥ २१

इति सर्वषां समानः
सत्यस्थितो दाससत्य सदा परिपूर्णः ।
कथं वहसि पक्षपातं
पाण्डवप्रमुखेषु प्रेषणमपि सहमानः ॥ २१

विसमम्मि कम्ममग्गे
विपरिखलंताण विब्भलिअकरणाणम् ।
णाह णिहिलाण अण्णो
णत्थि तुमाहि णअसच्च हत्थालम्बो ॥ २२

विषमे कर्ममार्गे
विपरिस्खलतां विह्वलितकरणानाम् ।
नाथ निखिलानामन्यो
नास्ति त्वन्नतसत्य हस्तालम्बः ॥ २२

णाणस्स को अविसओ
अच्चुअ कलुणाअ तुज्झ को दूरठिओ ।
सत्तीअ को अइभरो
ता खु उवाओ तुमं चिअ सअं सिद्धो ॥ २३

ज्ञानस्य कोऽविषयो-
ऽच्युत करुणायास्तव को दूरस्थितः ।
शक्तेः कोऽतिभर-
स्तस्मात्खलूपायस्त्वमेव स्वयं सिद्धः ॥ २३

संकप्पकण्णहारो
    किंकरसच्च भवसाअरे अइगहिरे ।
अणहो तुमं खु पोओ
    अप्पाण किवासमीरणेण पउत्तो ॥ २४

सङ्कल्पकर्णधारः
    किङ्करसत्य भवसागरेऽतिगभीरे ।
अनघस्त्वं खलु पोत
    आत्मनः कृपासमीरणेन प्रयुक्तः ॥ २४

अच्चुअ ण देन्ति मोक्खं
    ईसरभावेण भाविआ इअरसुरा ।
रत्तिं परिवट्टेउं लक्खं
    आलेक्खदिणअराण वि ण खमम् ॥ २५

अच्युत न ददति मोक्ष-
    मीश्वरभावेन भाविता इतरसुराः ।
रात्रिं परिवर्तयितुं
    लक्षमालेख्यदिनकराणामपि न क्षमम् ॥ २५

अमअरससाअरस्स व
    अहिन्दउरणाह णिम्मलमहग्घाइम् ।
तीरन्ति ण विगणेउं
    अणण्णसुलहाइ तुज्झ गुणरअणाइम् ॥ २६

अमृतरससागरस्येवा-
    हीन्द्रपुरनाथ निर्मलमहार्घाणि ।
तीर्यन्ते न विगणयितु-
    मनन्यसुलभानि तव गुणरत्नानि ॥ २६

भूसिअसुइसीमन्तो
    भुअइन्दउरेस सव्वगुणसीमन्तो ।
खविअतिसामलमोहो
    मुणीण हिअएसु फुरसि सामलमोहो ॥ २७

भूषितश्रुतिसीमन्तो
    भुजगेन्द्रपुरेश सर्वगुणसीमान्तः ।
क्षपिततृषामलमोहो
    मुनीनां हृदयेषु स्फुरसि श्यामलमयूखः ॥ २७

सुहलक्खणसिरिवच्छो
    सोहसि णिम्मुत्तविरहखणसिरिवच्छो ।
रणदेवणसविहगओ
    उद्धुणगलुलणइतीरवणसविहगओ २८

शुभलक्षणश्रीवत्सः
    शोभसे निर्मुक्तविरहक्षणश्रीवत्सः ।
रणदेवनसविहगः
    उद्भटगरुडनदीतीरवनसविधगतः ॥ २८

अकुमारजोव्वणठिअं
    अहिन्दउरणाह अहिमअं अणुरूवम् ।
णिच्चं सहावसिद्धं
    सुव्वइ सूरिमहिअं सुहं तुह रूवम् ॥ २९

अकुमारयौवनस्थित-
    महीन्द्रपुरनाथाभिमतमनुरूपम् ।
नित्यं स्वभावसिद्धं
    श्रूयते सूरिमहितं सुखं तव रूपम् ॥ २९

तिउणं तस्स विआरा
अच्चुअ पुरिसोत्ति आअमगणिज्जन्ता ।
अत्था तुह खु समत्ता
परम्मि रूपम्मि भूसणत्थसरूवा ॥ ३०

त्रिगुणं तस्य विकारा
अच्युत पुरुष इत्यागमगण्यमानाः ।
अर्थास्तव खलु समस्ताः
परस्मिन्रूपे भूषणास्त्रस्वरूपाः ॥ ३०

णिन्ति तुमाओ अच्चुअ
णिक्खविअविवक्खणिट्ठुरपरक्कमणा ।
संठविअपरमधम्मा
साहुपरित्ताणसप्फला ओआरा ॥ ३१

निर्यन्ति त्वत्तोऽच्युत
निक्षपितविपक्षनिष्ठुरपराक्रमणाः ।
संस्थापितपरमधर्माः
साधुपरित्राणसत्फला अवताराः ॥ ३१

हरिमणिसरिच्छणिअरुइ-
हरिआअन्तभुअइन्दवुरपेरन्तो ।
काले दासजणाणं
कण्हघणो होसि दिण्णकालुण्णरसो ॥ ३२

हरिमणिसदृक्षनिजरुचि-
हरितायमानभुजगेन्द्रपुरपर्यन्तः ।
काले दासजनानां
कृष्ण घनो भवसि दत्तकारुण्यरसः ॥ ३२

गलुलणइकच्छरण्णे
लक्खिज्जसि लच्छिमहिकरेणुमणहरो ।
दीसन्तबहुलदाणो
दिसागइन्दो व्व खुडिअदणुइन्ददुमो ॥ ३३

गरुडनदीकच्छारण्ये
लक्ष्यसे लक्ष्मीमहीकरेणुमनोहरः ।
दृश्यमानबहुलदानो
दिशागजेन्द्र इव खण्डितदनुजेन्द्रद्रुमः ॥ ३३

मुहचन्दमोलिदिणअर-
मज्झठिओ तुज्झ चिउरभारन्धारो ।
अघडिअघडणासत्तिं
सच्चं ठावेइ दाससच्च समग्गम् ॥ ३४

मुखचन्द्रमौलिदिनकर-
मध्यस्थितस्तव चिकुरभारान्धकारः ।
अघटितघटनाशक्तिं
सत्यं स्थापयति दाससत्य समग्राम् ॥ ३४

परिहसिअपुण्णचन्दं
पद्धमसरिच्छप्पसण्णलोअणजुअलम् ।
संकप्पिअदुरिआइं वि
सम्हरिअं हरइ दाससच्च तुह मुहम् ॥ ३५

परिहसितपूर्णचन्द्रं
पद्मसदृक्षप्रसन्नलोचनयुगलम् ।
संकल्पितदुरितान्यपि
संस्मृतं हरति दाससत्य तव मुखम् ॥ ३५

माहप्पं तुह महिअं
    मङ्गलिअं तुलसिकोत्थुहप्पमुहाणम् ।
अच्चुअ ठिरवणमालं
    बच्छं दंसेइ लच्छिलक्खणसुहअम् ॥ ३६

माहात्म्यं तव महितं
    माङ्गलिकं तुलसीकौस्तुभप्रमुखाणाम् ।
अच्युत स्थिरवनमालं
    वत्सं दर्शयति लक्ष्मीलक्षणसुभगम् ॥ ३६

णिव्विसइ णिच्चतावो
    देवअणो देवणाअअ विहिप्पमुहो ।
सीअलसन्तबहुत्तं
    छाहिं तुह विउलबाहुकप्पदुमाणम् ॥ ३७

निर्विशति नित्यतापो
    देवजनो देवनायक बिधिप्रमुखः ।
शीतलशान्तप्रभूतां
    छायां तव विपुलबाहुकल्पद्रुमाणाम् ॥ ३७

संकप्पचन्दखोहिअ-
    तिउणोअहिविउलबुब्बुअप्पअरेहिम् ।
बम्हण्डेहि वि भरिअं-
    किंकरसच्च तुह कीस णु किसं उअरम् ॥ ३८

संकल्पचन्द्रक्षोभित-
    त्रिगुणोदधि विपुलबुद्बुदप्रकरैः ।
ब्रह्माण्डैरपि भरितं
    किंकरसत्य तव कस्मान्नु कृशमुदरम् ॥ ३८

णाहिरुहं तुह णलिणं
 भुअईसरण अरणाह सोहइ सुहअम् ।
मज्झठिअबम्हभमरं
 वच्छासणलच्छिपाअवीढसरिच्छम् ॥ ३९

नाभिरुहं तव नलिनं
 भुजगेश्वरनगरनाथ शोभते सुभगम् ।
मध्यस्थितब्रह्मभ्रमरं
 वत्सासनलक्ष्मीपादपीठसदृक्षम् ॥ ३९

दिढपीडिअमहुकइढव-
 सोणिअपडलपरिपाडलम्बरघडिआ ।
राअइ अच्चुअ मुहला
 रइणाहगइन्दसिंखला तुह रसणा ॥ ४०

दृढपीडितमधुकैटभ-
 शोणितपटल परिपाटलाम्बरघटिता ।
राजत्यच्युत मुखरा
 रतिनाथगजेन्द्रशृङ्खला तव रशना ॥ ४०

दासाण सच्चा दीसइ
 दाणववीराण दीहणिद्दासअणम् ।
तुह उअरट्ठिअतिहुवण-
 पासा अक्खम्भसच्छअं ऊरुजुअम् ॥ ४१

दासानां सत्य दृश्यते
 दानववीराणां दीर्घनिद्राशयनम् ।
तवोदरस्थितत्रिभुवन-
 प्रासादस्तम्भ सच्छायमूरुयुगम् ॥ ४१

जाणुमणिदप्पणेण अ
    जङ्घामरगअकलाइआए अ धणिआ
अच्चुअ ण मुअइ कन्ती
    लच्छी व सरोअलञ्छणे तुह चलणे ॥ ४२

जानुमणिदर्पणेन च
    जङ्घामरकतकलाचिकया च धन्या
अच्युत न मुञ्चति कान्ति-
    र्लक्ष्मीरिव सरोजलाञ्छनौ तव चरणौ ॥ ४२

सुइसीमन्तपसूणं
    सोहइ णअसच्च तुज्झ सव्वसरण्णम् ।
कमणखणजणिअसुरणइ-
    पस मिअतेल्लोक्कपाअअं पअपउमम् ॥ ४३

श्रुतिसीमन्तप्रसूनं
    शोभते नतसत्य तव सर्वशरण्यम् ।
क्रमणक्षणजनितसुरनदी
    प्रशमितत्रैलोक्यपातकं पदपद्मम् ॥ ४३

इअ तिहुवणेक्कमूलं
    आसादेन्ति अण हा अमअसाउरसम् ।
ओसहिमहिहरपासे
    उइअं तु ओसहिं व दासरुआणम् ॥ ४४

इति त्रिभुवनैकमूल-
    मास्वादयन्त्यनघा अमृतस्वादुरसम् ।
ओषधिमहीधरपार्श्वे
    उदितं त्वामौषधमिव दासरुजाम् ॥ ४४

सिद्धञ्जणं व सामं
तुज्झ तणुं णिअविलोअणेसु खिवन्ता ।
अच्चुअ लच्छिणिवासं
खिच्चणिऊढं णिहिं व पेच्छन्ति तुमम् ॥ ४५

सिद्धाञ्जनमिव श्यामां
तव तनुं निजविलोचनेषु क्षिपन्तः ।
अच्चुत लक्ष्मीनिवासं
नित्यनिगूढं निधिमिव पश्यन्ति त्वाम् ॥ ४५

विहडिअणिबिडन्धारो
घडन्तजोई तिलोअएक्कगहवई ।
दिट्ठिगओ जाण तुमं
णमन्तसच्च ण हु ताण मोहतिआमा ॥ ४६

विघटितनिबिडान्धकारो
घटमानज्योतिस्त्रिलोकैकग्रहपतिः ।
दृष्टिगतो येषां त्वं
नमत्सत्य न खलु तेषां मोहत्रियामा ॥ ४६

विसअरसम्मि सुवन्ता
विआरजणणेहि विअ णहु विक्रीरन्ता ।
जीवन्तमुक्कसरिसा
अच्चुअ दीसन्ति पावणा तुह भत्ता ॥ ४७

विषयरसे स्वपन्तो
विकारजननैरपि च न खलु विक्रियमाणाः ।
जीवन्मुक्तसदृशा
अच्चुत दृश्यन्ते पावनास्तव भक्ताः ॥ ४७

गन्धव्वणअरसिविणअ
असारिच्छाणं सिरीण बणसरिआणम् ।
ण सुमरइ तुम्हगहिओ-
सरणागअसच्छसइमओ जीअगओ ॥ ४८

गन्धर्वनगरस्वप्न-
सदृक्षाणां श्रियां वनसरिताम् ।
न स्मरति त्वद्गृहीतः
शरणागतसत्य सदामदो जीवगजः । ४८

ण महेन्ति णाणवन्ता
तरङ्गडिण्डीरबुब्बुअसरिच्छाइम् ।
विहिपमुहाण पआइं
घणकन्दलिकन्द कअलिखम्भसमाइम् ॥ ४९

न महयन्ति ज्ञानवन्त-
स्तरङ्गडिण्डीरबुद्बुदसदृक्षाणि ।
विधिप्रमुखाणां पदानि
घनकन्दलिकन्दकदलीस्तम्भसमानि ॥ ४९

पुलइअसपरसहावा
पुरिसा घेत्तूण सामिणो तुह सीलम् ।
णाह णअसच्च सघिणा
ण मुअन्ति कहं वि सव्वजणसोहद्दम् ॥ ५०

दृष्टस्वपरस्वभावाः
पुरुषा गृहीत्वा स्वामिनस्तव शीलम् ।
नाथ नतसत्य सघृणा
न मुञ्चन्ति कथमपि सर्वजनसौहार्दम् ॥ ५०

माणमएसामच्छर-
डम्भासूआभआमरिसलोहमुहा ।
दीसन्ति ण मोहसुआ
दोसा दासाण सच्चतुह भत्ताणम् ॥ ५१

मानमदेर्ष्यामत्सर-
दम्भासूयाभयामर्षलोभमुखाः ।
दृश्यन्ते न मोहसुता
दोषा दासानां सत्य तव भक्तानाम् ॥ ५१

जाण मई इहरमुही
कालो सअलो वि ताण कलिवित्थारो ।
जे तुह पअम्मि पवणा
णत्थि कली णाअवइणअरवइ ताणम् ॥ ५२

येषां मतिरितरमुखी
कालः सकलोऽपि तेषां कलिविस्तारः ।
ये तव पदे प्रवणा
नास्ति कलिर्नागपतिनगरपते तेषाम् ॥ ५२

अच्चासण्णविणासा
अच्चुअ पेच्छन्ति तावए भत्तअणे ।
मोक्खरुईण सुमग्गे
मूढा दिअहअरमण्डलम्मि व छिद्दम् ॥ ५३

अत्यासन्नविनाशा
अच्युत पश्यन्ति तावके भक्तजने ।
मोक्षरुचीना सुमार्गे
मूढा दिवसकरमण्डल इव च्छिद्रम् ॥ ५३

णितुडिअदुम्माणघणा
णिम्मलगुण घडिअतारअपब्भारा ।
भासन्तभत्तिजोण्हा
णअसच्च फुरन्ति णहणिहा तुह भत्ता ॥ ५४

निस्त्रुटितदुर्मानघना
निर्मलगुणघटिततारकाप्राग्भाराः ।
भासमानभक्तिज्योत्स्ना
नतसत्य स्फुरन्ति नभोनिभास्तवभक्ताः ॥ ५४

णहु जमविसअम्मि गई
ण असच्च पअम्बुअं तुह पवण्णाणम ।
खलिआणवि जहजोग्गं
सिक्खा सुद्धन्तकिंकराण व लहुई ॥ ५५

न खलु यमविषये गति-
र्नतसत्य पदाम्बुजं तव प्रपन्नानाम् ।
स्खलितानामपि यथायोग्यं
शिक्षा शुद्धान्तकिंकराणामिव लघ्वी ॥ ५५

कम्मगइदोसदुहिआ
कअन्तभिउडीभुअङ्गिदंसणतत्था ।
अच्चन्ति तुज्झ चलणे
अच्चुअ पब्भट्ठवम्महरसासाआ ॥ ५६

कर्मगतिदोषदुःखिताः
कृतान्तभ्रुकुटीभुजंगीदर्शनत्रस्ताः ।
अर्चन्ति तव चरणा-
वच्युत प्रभ्रष्टमन्मथरसास्वादाः ॥ ५६

आलग्गइ तुह चलणे
अच्चुअ विहिणा वि अच्चणा आअरिआ ।
जा एक्कन्तिपउत्ता
सेसं व सअं सिरेण पडिगेण्हसितम् ॥ ५७

आलगति तव चरणा-
वच्युत विधिनाप्यर्चनाचरिता ।
यैकान्तिप्रयुक्ता
शेषामिव स्वयं शिरसा प्रतिगृह्णासि ताम् ॥ ५७

तुह मुहजोण्हादाविअ-
माणससिअन्तपवहसंणिहबाहे ।
अच्चुअ ण मुअसि भत्ते
कलम्बगोलणिहकण्टअन्तणिअङ्गे ॥ ५८

तव मुखज्योत्स्नाद्रावित
मानसशशिकान्तप्रवाहसंनिभबाष्पान् ।
अच्युत न मुञ्चसि भक्तान्-
कदम्बगोलनिभकण्टकायमाननिजाङ्गान् ॥ ५८

सव्वेसु वि णिव्वेरा
सरणागअसच्च गहिअसासअधम्मा ।
गअसङ्गा तुह भत्ता
जन्ति तुमं एव्व दुल्लहं इअरेहिम् ॥ ५९

सर्वेष्वपि निर्वैराः
शरणागतसत्य गृहीतशाश्वतधर्माः ।
गतसङ्गास्तव भक्ता
यान्ति त्वामेव दुर्लभमितरैः ॥ ५९

अहिवइणअरिन्द तुमं
आसण्णं वि गअणं व सइ दुग्गेज्झम् ।
विसएसु विलग्गन्ता
तूरन्ता वि ण लहन्ति डोलन्तमणा ॥ ६०

अहिपतिनगरेन्द्र त्वा-
मासन्नमपि गगनमिव सदा दुर्ग्रहम् ।
विषयेषु विलगन्त-
स्त्वरमाणा अपि न लभन्ते डोलायमानमनसः ॥ ६०

भत्ता तावअसेवा-
रसभरिआ सअलरक्खणूसुअरुइणा ।
करणाइ धरन्ति चिरं
कङ्खिअमोक्खा वि अच्चुअ तुए ठविआ ॥ ६१

भक्तास्तावकसेवा-
रसभरिताः सकलरक्षणोत्सुकरुचिना ।
करणानि धरन्ति चिरं
काङ्क्षितमोक्षा अप्यच्युत त्वया स्थापिताः ॥६१

ठिरगुणगिरिजणिएहिं
संतारेसि णअसच्च णिअभत्तेहिम् ।
जम्मपरिवाडिजलहिं
जङ्गमठिरसेउदंसणिज्जेहि जणे ॥ ६२

स्थिरगुणगिरिजनितैः
संतारयसि नतसत्य निजभक्तैः ।
जन्मपरिपाटीजलधिं
जङ्गमस्थिरसेतुदर्शनीयैर्जनान् ॥ ६२

पसमिअभवन्तरभआ
पत्तं पत्तं हिअं ति परिपेच्छन्ता ।
भावेन्ति तुज्झ भत्ता
पिआइहिं व णअसच्च पच्छिमदअहम् ॥६३

प्रशमितभवान्तरभयाः
प्राप्तं प्राप्तं हितमिति परिपश्यन्तः ।
भावयन्ति तव भक्ताः
प्रियातिथिमिव नतसत्य पश्चिमदिवसम् ॥ ६३

पअडतिमिरम्म भुवणे
पत्तपडिट्ठविअपरमणाणपईवा ।
णिज्जन्ति अच्चुअ तुए
णिअं पअं सइ सअंपहं कअकज्जा ॥ ६४

प्रकटतिमिरे भुवने
पात्रप्रतिष्ठापितपरमज्ञानप्रदीपाः ।
नीयन्तेऽच्युत त्वया
निजं पदं सदा स्वयंप्रभं कृतकार्याः ॥ ६४

दिढतिव्वभत्तिणअणा
परिपेच्छन्ता अहिन्दउरणाह तुमम् ।
पत्ता तुह साउज्जं
पन्तिं पूरेन्ति पण्णइन्दमुहाणम् ॥ ६५

दृढतीव्रभक्तिनयनाः
परिपश्यन्तोऽहीन्द्र पुरनाथ त्वाम् ।
प्राप्तास्तव सायुज्यं
पङ्क्तिंपूरयन्ति पन्नगेन्द्रमुखानाम् ॥ ६५

संणअसुलहं अच्चुअ
समाहिसोवाणकमविलम्बविमुहिआ ।
सरणं गन्तूण तुमं
मुत्ता मुउउन्दखत्तबन्धुप्पमुहा ॥ ६६

संनतसुल भमच्युत
समाधिसोपानक्रमविलम्बविमुखिताः ।
शरणं गत्वा त्वामुक्ता
मुचुकुन्दक्षत्रबन्धुप्रमुखाः ॥ ६६

देवाण पसुसमाणो
जन्तू गन्तूण देवणाह तुह पअम् ।
तेहिं चिअ सव्वेहिं
संसरमाणेहि होइ सइ दिण्णबली ॥ ६७

देवानां पशुसमानो
जन्तुर्गत्वा देवनाथ तव पदम् ।
तैरेवसर्वैः संसरमाणैः
भवति सदा दत्तबलिः ॥ ६७

मोहन्धारमहण्णव-
मुच्छिअमाआमहारअणिपच्चूहो ।
अच्चुअ तुज्झ कडक्खो
विमुत्तिपत्थाणपुढमपरिअरबन्धो ॥ ६८

मोहान्धकारमहार्णव-
मूर्छितमायामहारजनिप्रत्यूषः ।
अच्युत तव कटाक्षो
विमुक्तिप्रस्थानप्रथमपरिकरबन्धः ॥ ६८

मोक्खसुहरुक्खमूलं
मोहजराउरमहारसा अणपवरम् ।
सअलकुसलेक्कखेतं
किंकरसच्च तुह कित्तणं अमिअणिहम् ॥ ६९

मोक्षसुखवृक्षमूलं
मोहजरातुरमहारसायनप्रवरम् ।
सकलकुशलैकक्षेत्रं
किंकरसत्य तव कीर्तनममृतनिभम् ॥ ६९

णत्थि अहिक्कमणासो
विच्छेअम्भि वि ण पच्चवायपसङ्गो ।
सप्पा वि तुह सपज्जा
रक्खइ अच्चुअ महत्तरादु भआदो ॥ ७०

नास्त्यभिक्रमनाशो
विच्छेदेऽपि न प्रत्यवायप्रसङ्गः ।
स्वल्पापि तव सपर्या
रक्षत्यच्युत महत्तराद्भयात् ॥ ७०

अपसाए अपसण्णा
तुज्झ पसाअम्मि दाससच्च पसण्णा ।
आरज्झा होन्ति परे किं
तेहि पसङ्गलम्भिअपहावेहिम् ॥ ७१

अप्रसादे अप्रसन्ना-
स्तव प्रसादे दाससत्य प्रसन्नाः
आराध्या भवन्ति परे
किं तैः प्रसङ्गलम्भितप्रभावैः ॥ ७१

इअरतिअसा पसण्णा
किंकरसच्च मह किं णु काहिन्ति हिअम् ।
णीहारघणसएहिं
णहु पूरिज्जइ कहं वि चाअअतिण्हा ॥ ७२

इतरत्रिदशाः प्रसन्नाः
किंकरसत्य मम किं नु करिष्यन्ति हितम् ।
नीहारघनशतै-
र्न खलु पूर्यते कथमपि चातकतृष्णा ॥ ७२

अणुगअसुहमिअतिण्हा
अच्चुअ वीसमइ तुज्झ मामअतिण्हा ।
पवहेसु पसरिआए
आसिअपवहन्तघणकिवासरिआए ॥ ७३

अनुगतसुखमृगतृष्णा
अच्युत विश्राम्यति तव मामकतृष्णा ।
प्रवाहेषु प्रसृताया
आश्रितप्रवहद्घनकृपासरितः ॥ ७३

विअलसअलङ्गविसमे
धम्मे णअसच्च धअणिहे धारेन्तो ।
कन्तारपन्थओ विअ
खलन्तचलणो म्हि काअरविसीरन्तो ॥ ७४

विकलसकलाङ्गविषमान्-
धर्मान्नतसत्य ध्वजनिभान्धारयन् ।
कान्तारपान्थक इव
स्खलच्चरणोऽस्मि कातरविशीर्यमाणः ॥ ७४

ठिरधम्मवम्मथइअं
तधम्मपवणाण अग्गखन्धपउत्तम् ।
अघडन्तविपडिसारं
अच्चुअ मं हससि णूण लच्छिसमक्खम् ॥ ७५

स्थिरधर्मवर्मस्थगित-
मधर्मप्रवणानामग्रस्कन्धप्रवृत्तम् ।
अघटमानविप्रतीसार-
मच्युत मां हससि नूनं लक्ष्मीसमक्षम् ॥ ७५

तरिउं अच्चुअ दुरिअं
इमम्मि देहम्मि एक्कदिअहे वि कअम् ।
कालो अलं सअलो
कलुखाए तुज्झ पुण्णपत्तं म्हि इमो ॥ ७६

तरितुमच्युत दुरित-
मस्मिन्देह एकदिवसेऽपि कृतम् ।
कालोऽलं न सकलः
करुणायास्तव पूर्णपात्रमस्म्ययम् ॥ ७६

अच्चुअ तुज्झ गुणाणं
मह दोसाणं वि णत्थि कुत्थ वि गणणा ।
तह वि जओ पुढमाणं
अहिअं लीणाण होइ णहु दोब्बल्लम् ॥ ७७

अच्युत तव गुणानां
मम दोषाणामपि नास्ति कुत्रापि गणना ।
तथापि जयः प्रथमाना-
मधिकं लीनानां भवति न खलु दौर्बल्यम् ॥ ७७

रत्तिं दिअहं अच्चुअ
तुडिअपडन्ताइ आउदुमखण्डाइम् ।
दठ्ठूण वि दरिअमणं
बालं एण्हिं वि भरसु मं अपमत्तो ॥ ७८

रात्रिं दिवसमच्युत
त्रुटितपतन्त्यायुर्द्रुमखण्डानि ।
दृष्ट्वापि दृप्तमनसं
बालमिदानीमपि भरस्व मामप्रमत्तः ॥ ७८

णीसाससंकणिज्जे
देहे पडलन्तसलिलविन्दुसरिच्छे ।
मुणसि णअसच्च तुमं
जरन्तकरणे वि दीहजोव्वणतिण्हम् ॥ ७९

निश्वासशङ्कनीये
देहे पटलान्तसलिलबिन्दुसदृक्षे ।
जानासि नतसत्य त्वं
जरत्करणेऽपि दर्घयौवनतृष्णम् ॥ ७९

अमुणिअणिअकाअव्वं
तिलग्गमुणिएसु मं वि पडिऊलगइम् ।
इअ णिअसहावविलिअं
हाउं दासाण सच्च णहु तुह जुत्तम् ॥ ८०

अज्ञातनिजकर्तव्यं
तिलाग्रज्ञातेषु मामपि प्रतिकूलगतिम् ।
इति निजस्वभावव्रीलितं
हातुं दासानां सत्य न खलु तव युक्तम् ॥ ८०

कोहं किं करणिज्जं
परिहरणिज्जं वि किंति जाणसि सव्वम् ।
तीरसि अ तंहिअं मह
मह तिअसेसर कुणसु णिअहिअअणिक्खित्तम् ॥ ८१

कोऽहं किं करणीयं
परिहरणीयमपि किमिति जानासि सर्वम् ।
शक्नोषि च तद्धितं मम
त्रिदशेश्वर कुरुष्व निजहृदयनिक्षिप्तम् ॥ ८१

एण्हिं उवरिं वि इमो
गुणगहिओ दारुपुत्तओ व परवसो ।
तस्स वि मह तिअसेसर
तीसु वि करणेसु होसु सुहसंकप्पो ॥ ८२

इदानीमुपर्यप्ययं
गुणगृहीतो दारुपुत्रक इव परवशः ।
तस्यापि मम त्रिदशेश्वर
त्रिष्वपि करणेसु भव सुखसंकल्पः ॥ ८२

णिअकम्मणिअलजुअलं
अच्चुअ काऊण मह पिअप्पिअवग्गे ।
काहे घोरकलेवर-
काराघरकुहरणिग्गअं काहिसि मम् ॥ ८३

निजकर्मनिगलयुगल-
मच्युत कृत्वा मम प्रियाप्रियवर्गे ।
कदा घोरकलेबर
कारागृहकुहरनिर्गतं करिष्यसि माम् ॥ ८३

हद्दे तुमम्मि कइआ
विस्समिअं बम्हधमणिमग्गणिहिन्तम् ।
दिणअरदिण्णग्गकरं
अच्चुअ दच्छिहिसि दइअडिम्मं विअ मम् ॥८४

हार्दे त्वयि कदा विश्रान्तं
ब्रह्मधमनिमार्गगमिष्यन्तम् ।
दिनकरदत्ताग्रकरमच्युत
द्रक्ष्यसि दयितडिम्भमिव माम् ॥ ८४

काहे अमाणवन्ता
अग्गिमुहा आइवाहिआ तुह पुरिसा ।
अइलङ्घेहिन्ति मिमं
अच्चुअ तमगहणतिउणमरुकन्तारम् ॥ ८५

कदा अमानवान्ता
अग्निमुखा आतिवाहिकास्तव पुरुषाः ।
अतिलङ्घयिष्यन्ति मा-
मच्युत तमोगहनत्रिगुणमरुकान्तारम् ॥ ८५

लघिअ विरआसरिअं
लम्भिअसइसुद्धसत्तमअसोम्मतणुम् ।
कअबम्हालंकारं
काहिसि णअसच्च किंकरं काहे मम् ॥ ८६

लङ्घितविरजासरितं
लम्भितसदाशुद्धसत्त्वमयसौम्यतनुम् ।
कृतब्रह्मालङ्कारं
करिष्यसि नतसत्य किंकरं कदा माम् ॥ ८६

संसारसाअराओ
उक्खित्तं तिअसणाह फुरिआलोअम् ।
काहे काहिसि हिअए
कोत्थुहमणिदप्पणं व लच्छिपुलइअम् ॥ ८७

संसारसागरादुत्क्षिप्तं
त्रिदशनाथ स्फुरितालोकम् ।
कदा करिष्यसि हृदये
कौस्तुभमणिदर्पणमिव लक्ष्मीदृष्टम् ॥ ८७

काहे तुह पअपउमे
होहिमि णअसच्च केलिकन्ततिहुवणे ।
मअणरिउमउडमण्डण
सुरसरिआसोत्तसूइअमहुप्पवहे ॥ ८८

कदा तव पादपद्मे
भविष्यामि नतसत्य केलिक्रान्तत्रिभुवने ।
मदनरिपुमकुटमण्डन-
सुर सरित्स्रोतः सूचितमधुप्रवाहे ॥ ८८

उवणिसआसिरकुसुमं
उत्तंसेऊण तुह पअम्बुअजुअलम ।
दइओ होहिमि कइआ
दासो दासाण सच्च सूरिसरिच्छो ॥ ८९

उपनिषच्छिरः कुसुम-
मुत्तंसयित्वा तव पदाम्बुजयुगलम् ।
दयितो भविष्यामि कदा
दासो दासानां सत्य सूरिसदृक्षः ॥ ८९

अउणोणिउत्ति जोग्गं
ओआरविहारसहअरत्तणधणिअम ।
अप्पसमभोअमेत्तं
अणुहोहिसि देव्वणाह काहे णु मिमम् ॥ ९०

अपुनर्निवृत्तियोग्य
मवतारविहारसहचरत्वधन्यम् ।
आत्मसमभोगमात्र-
मनुभविष्यसि देवनाथ कदा नु माम् ॥ ९०

इअ फुडमणोरहं मं
एआरिसवअणमेत्तसारं वसअम् ।
कुणसु णिअगुणगणेहिं
सच्चं दासाण सच्च सइ सच्छण्दो ॥ ९१

इति स्फुटमनोरथं मा-
मेतादृशवचनमात्रसारं वशगम् ।
कुरुष्व निजगुणगणैः सत्यं
दासानां सत्य सदा स्वच्छन्दः ॥ ९१

बालपवगोव्व तरलो
मारुइजाइत्ति साअरं तरिउमणो ।
पत्थेमि तुमं अच्चुअ
कङ्खिअपअपउम खमसु मह कावेअम् ॥ ९२

बालप्लवग इव तरलो ।
मारुतिजातिरिति सागरं तरितुमनाः ।
पार्थये त्वामच्युत-
काङ्क्षितपदपद्म क्षमस्व मम कापेयम् ॥ ९२

अच्चुअ विसअक्कन्तं
भवण्णवावत्तभमिणिवुड्डिज्जन्तम् ।
जणणीथणंधअं विअ
मं उद्धरिउण सेवसु सअं पच्छम् ॥ ६३

अच्युत विषयाक्रान्तं
भवार्णवावर्तभ्रमिनिमज्जन्तम् ।
जननी स्तनंधयमिव
मामुद्धृत्य सेवस्व स्वयं पथ्यम् ॥ ६३

कम्मम अघम्मतविअं
सुहमिअतिण्हाहि काहि वि अतिण्हाअम् ।
कारेसु णिव्वुअं मं
कर आसिसिरेहि अच्चुअ कडक्खेहिम् ॥ ६४

कर्ममयघर्मतप्तं
सुखमृगतृष्णाभिः कदाप्यतृष्णाकम् ।
कारय निर्वृतं मां
करकाशिशिरैरच्युत कटाक्षैः ॥ ६४

तुह चिन्तणविमुहाणं
दिट्ठिविसाणं व दंसणाउ मोएन्तो ।
अमअमुहाणं विअ मं
अच्चुअ भत्ताण णेसु णअणासारम् ॥ ६५

तव चिन्तनविमुखानां
दृष्टिविषाणामिव दर्शनान्मोचयन् ।
अमृतसुखानामिव मा-
मच्युत भक्तानां नयस्व नयनासारम् ॥ ६५

विसमि लिअमहुणिहेसु
तिणपठिमेसुअपडिग्गहेसु पलुठिअम् ।
अमिअणिहिम्मि व अच्चुअ
ठावेसु तुमम्मि णिम्ममं मह हिअअम् ॥ ९६

विषमिलितमधुनिभेषु
तृणप्रतिमेषु च प्रतिग्रहेषु प्रलुठितम् ।
अमृतनिधाविवाच्युत
स्थापय त्वयि निर्ममं मम हृदयम् ॥ ९६

णिच्चं इमम्मि किवणे
णिक्खिवसु णमन्तसच्च णिहिसारिच्छे ।
पवहन्तणहपहाभर-
पसमिअपणमन्तसंजरे तुह चलणे ॥ ९७

नित्यमस्मिन्कृपणे
निक्षिप नमत्सत्य निधिसदृक्षौ ।
प्रवहन्नखप्रभाभर
प्रशमितप्रणमत्संज्वरौ तव चरणौ ॥ ९७

सरणागओत्ति जणिए
जणवाए वि जइ अच्चुअ ण रक्खसि मम् ।
होज्ज खु साअरघोसो
साअरपुलिणम्मि तारिसं तुह वअणम् ॥ ९८

शरणागत इति जनिते
जनवादेऽपि यद्यच्युत न रक्षसिमाम् ।
भवेत्खलु सागरघोषः
सागरपुलिने तादृशं तव वचनम् ॥ ९८

णिक्खित्तो म्हि अ अगई
णिवुणेहि तुमम्मि णाह कारुणिएहिम् ।
ते तुह दट्ठूण पिए
भरिअं णअसच्च भरसु अप्पाण भरम् ॥ ९९

निक्षिप्तोऽस्मि चागति-
निपुणैस्त्वयि नाथ कारुणिकैः ।
तांस्तव दृष्ट्वा प्रियान्
भृतं नतसत्य भरस्वात्मनो भरम् ॥ ९९

णअसच्च पक्कणाणिअ-
गलिअकिलाअभमणिअकुमारं व णिवो ।
होज्जन्तजोव्वणवहुं
वरोव्व मं लहसु मन्तिअणविण्णविअम् ॥ १००

नतसत्य पक्कणानीत
गलितकिरातभ्रमनिजकुमारमिव नृपः ।
भविष्यद्यौवनवधूवर इव
मां लभस्व मन्त्रिजनविज्ञापितम् ॥ १००

इअ कइतक्किअकेसरि-
वेअन्ताअरिअवेङ्कडेसविरइअम् ।
सुहअं अच्चुअसअअं
सहिअअहिअएसु सोहउ समग्गगुणम् ॥ १०१

इति कवितार्किककेसरि-
वेदान्ताचार्यवेङ्कटेशविरचितम् ।
सुभगमच्युतशतकं
सहृदयहृदयेषु शोभतां समग्रगुणम् ॥ १०१

॥ अच्चुअसअअं संपुण्णम् ॥

॥ अच्युतशतकं संपूर्णम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः ॥

॥ श्रीः ॥

रघुवीरगद्यम्

—:०:०:—

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

—: ० :—

जयत्याश्रितसंत्रासध्वान्तविध्वंसनोदयः ।
प्रभावान्सीतया देव्या परमव्योमभास्करः ॥

जय जय महावीर !
महाधीर धौरेय !
देवासुर समर समय समुदित निखिल निर्जरनिर्धारित निरवधिक महात्म्य !
दशवदन दमित दैवत परिषदभ्यर्थितदाशरथिभाव !
दिनकर कुल कमल दिवाकर !
दिविषदधिपति रणसहचरण चतुरदशरथ चरमऋणविमोचन !
कोसलसुताकुमारभाव कञ्चुकितकारणाकार !
कौमारकेलिगोपायित कौशिकाध्वर !
रणाध्वरधुर्यभव्य दिव्यास्त्रवृन्दवन्दित !
प्रणतजनविमत विमथन दुर्ललित दोर्ललित !
तनुतरविशिखविताडन विघटितविशरारु शरारु ताटकाताटकेय !
जडकिरण,शकलधरजटिलनटपतिमकुट, तटनटनपटुविबुधस-

रिदतिबहुलमधुगलनललितपदनलिनरजउपमृदितनिजवृजिन, जहदुपलतनुरुचिरपरममुनिवरयुवतिनुत !

कुशिकसुतकथितविदितनवविविधकथ !

मैथिलनगरसुलोचनालोचनचकोरचन्द्र !

खण्डपरशुकोदण्डप्रकाण्डखण्डनशौण्डभुजदण्ड !

चण्डकरकिरणमण्डलबोधितपुण्डरीकवनरुचिलुण्टाकलोचन !

मोचितजनकहृदयशङ्कातङ्क !

परिहृतनिखिलनरपतिवरणजनकदुहितृकुचतटविहरणसमुचितकरतल !

शतकोटिशतगुणकठिनपरशुधरमुनिवरकरधृतदुरवनमतमनिजधनुराकर्षणप्रकाशितपारमेष्ठ्य !

क्रतुहरशिखरिकन्तुकविहृतिमुखजगदरुन्तुदजितहरिदन्तदन्तुरोदन्तदशवदनदमनकुशलदशशतभुजमुखनृपतिकुलरुधिरझरभरितपृथुतरतटाकतर्पितपितृकभृगुपतिसुगतिविहतिकरनतपरुडिषुपरिघ !

अनृतभयमुषितहृदयपितृवचनपालनप्रतिज्ञावज्ञातयौवराज्य !

निषादराजसौहृदसूचितसौशील्यसागर !

भरद्वाजशासनपरिगृहीतविचित्रचित्रकूटगिरिकटकतटरम्यावसथ !

अनन्यशासनीय ।

प्रणतभरतमकुटतटसुघटित पादुकाग्र्याभिषेकनिर्वर्तितसर्वलोकयोगक्षेम !

पिशितरुचिविहितदुरितवलमथनतनयबलिभुगनुगतिसरभसशयनतृणशकलपरिपतनभयचकितसकलसुरमुनिवरबहुमतमहास्त्रसामर्थ्य !

द्रुहिण हरवलमथनदुरारक्ष्यशरलक्ष्य !

दण्डकातपोवनजङ्गमपारिजात !
विराधहरिणशार्दूल !
विलुलितबहुफलमखकलमरजनिचरमृगमृगयारम्भसंभृतचीरभृदनुरोध !
त्रिशिरः शिरस्त्रितयतिमिरनिरासवासरकर !
दूषणजलनिधिशोषणतोषितऋषिगणघोषितविजयघोषण !
खरतरखरतरुखण्डनचण्डपवन !
द्विसप्तरक्षःसहस्रनलवनविलोलनमहाकलभ !
असहायशूर !
अनपायसाहस !
महितमहामृधदर्शनमुदितमैथिलीदृढतरपरिरम्भणविभवविरोपितविकटवीरव्रण !
मारीचमायामृगचर्मपरिकर्मितनिर्भरदर्भास्तरण !
विक्रमयशोलाभविक्रीतजीवितगृध्रराजदेहदिधक्षालक्षितभक्तजनदाक्षिण्य !
कल्पितविबुधभावकबन्धाभिनन्दित !
अवन्ध्यमहिममुनिजनभजनमुषितहृदयकलुषशबरी, मोक्षसाक्षिभूत !
प्रभञ्जनतनयभावुकभाषितरञ्जितहृदय !
तरणिसुतशरणागतिपरतन्त्रीकृतस्वातन्त्र्य !
दृढघटितकैलासकोटिविकटदुन्दुभिकङ्कालकूटदूरविक्षेपदक्षदक्षिणेतरपादाङ्गुष्ठदरचलनविश्वस्तसुहृदाशय !
अतिपृथुलबहुविटपिगिरिधरणिविवरयुगपदुदयविवृतचित्रपुङ्खवैचित्र्य !
विपुलभुजशैलमूलनिबिडनिपीडितरावणरणरणकजनक, चतुरुदधिविहरणचतुरकपिकुलपतिहृदयविशालशिलातल-

दारणदारुणशिलीमुख !

अपारपारावारपरिखापरिवृतपरपुरपरिसृतदवदहनजवनपवन-
भवकपिवरपरिष्वङ्गभावितसर्वस्वदान !

अहितसहोदररक्षःपरिग्रहविसंवादिविविधसचिवविप्रलम्भस-
मयसंरम्भसमुज्जृम्भितसर्वेश्वरभाव !

सकृत्प्रपन्नजनसंरक्षणदीक्षित !

वीर !

सत्यव्रत !

प्रतिशयनभूमिकाभूषितपयोधिपुलिन !

प्रलयशिखिपरुषविशिखशिखाशोषिताकूपारवारिपूर !

प्रबलरिपुकलहकुतुकचटुलकपिकुलकरतलतुलितहृतगिरिनि-
करसाधितसेतुपथसीमासीमन्तितसमुद्र !

द्रुतगतितरुमृगवरूथिनीनिरुद्धलङ्कावरोधवेपथुलास्य,लीलो-
पदेशदेशिक धनुर्ज्याघोष !

गगनचरकनकगिरिगरिमधरनिगममयनिजगरुडगरुदनिल-
लवगलितविषवदनशरकदन !

अकृतचरवनचररणकरणवैलक्ष्यकूणिताक्षबहुविधरक्षोबलाध्य-
क्षवक्षःकवाटपाटनपटिमसाटोपकोपावलेप !

कटुरटदटनिटंकृतिचटुलकठोरकार्मुक !

विशङ्कटविशिखविताडनविघटितमकुटविह्वल विश्रवस्तनय-
विश्रमसमयविश्राणनविख्यातविक्रम !

कुम्भकर्णकुलगिरिविदलनदम्भोलिभूतनिःशङ्ककङ्कपत्र !

अभिचरणहुतवहपरिचरणविघटनसरभसपरिपतदपरिमितक-

पिबल ज़लधिलहरिकलकलरवकुपितमघवजिदभिहनन-
कृदनुजसाक्षिकराक्षसद्वन्द्वयुद्ध !

अप्रतिद्वन्द्वपौरुष !

त्र्यम्बकसमधिकघोरास्त्राडम्बर !

सारथिहृतरथसत्रपशात्रवसत्यापितप्रताप !

शितशरकृतलवनदशमुखमुखदशकनिपतनपुनरुदयदरगलित-
जनित, दरतरलहरिहयनयननलिनवनरुचिखचितनिप-
तितसुरतरुकुसुमविततिसुरभितरथपथ !

अखिलजगदधिकभुजबलवरबलदशलपनलपनदशकलवनज-
नितकदनपरवशरजनिचरयुवतिविलपनवचनसमविषय-
निगमशिखरनिकरमुखरमुखमुनिवरपरिपणित !

अभिगतशतमखहुतवहपितृपतिनिऋतिवरुणपवनधनदगि-
रिशमुखसुरपतिनुतिमुदित !

अमितमतिविधिविदितकथितनिजविभवजलधिपृषतलव !

विगतभयविबुधविबोधितवीरशयनशायितवानरपृतनौघ !

स्वसमयविघटितसुघटितसहृदयसहधर्मचारिणीक !

विभीषणवशंवदीकृतलङ्कैश्वर्य !

निष्पन्नकृत्य !

खपुष्पितरिपुपक्ष !

पुष्पकरभसगतिगोष्पदीकृतगगनार्णव !

प्रतिज्ञार्णवतरणकृतक्षणभरतमनोरथसंहितसिंहासनाधिरूढ-
स्वामिन् !

राघवसिंह !

हाटकगिरिकटकलडहपादपीठनिकटतटपरिलुंठितनिखिल-
नृपतिकिरीटकोटिविविधमणिगणकिरणनिकरनीरा-
जितचरणराजीव !

दिव्यभौमायोध्याधिदैवत !

पितृवधकुपितपरशुधरमुनिविहितनृपहननकदनपूर्वकालप्रभव-
शतगुणप्रतिष्ठापितधार्मिकराजवंश !

शुभचरितरतभरतखर्वितगर्वगन्धर्वयूथगीतविजयगाथाशत !
शासितमधुसुतशत्रुघ्नसेवित !

कुशलवपरिगृहीतकुलगाथाविशेष !

विधिवशपरिणमदमरभणितिकविवररचितनिजचरितनिब-
न्धननिशमननिर्वृत !

सर्वजनसंमानित

पुनरुपस्थापितविमानवरविश्राणनप्रीणितवैश्रवणविश्रावित-
यशः प्रपञ्च !

पञ्चतापन्नमुनिकुमारसंजीवनामृत !

त्रेतायुगप्रवर्तितकार्तयुगवृत्तान्त !

अविकलबहुसुवर्णहयमखसहस्रनिर्वहणनिर्वर्तितनिजवर्णाश्रम-
धर्म !

सर्वकर्मसमाराध्य !

सनातनधर्म !

साकेतनजनपदजनिधनिकजंगमतदितरजन्तुजातदिव्यगति-
दानदर्शितनित्यनिःसीमवैभव !

भवतपनतापितभक्तजनभद्राराम !

श्री रामभद्र !

नमस्ते पुनस्ते नमः ॥

चतुर्मुखेश्वरमुखैः पुत्रपौत्रादिशालिने ।
नमः सीतासमेताय रामाय गृहमेधिने ॥

कविकथकसिंहकथितं कठोरसुकुमारगुम्भगम्भीरम् ।
भवभयभेषजमेतत्पठत महावीरवैभवं सुधियः ॥

॥ रघुवीरगद्यं संपूर्णम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः ॥

॥ श्रीः ॥

देहलीशस्तुतिः

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

विक्रम्य येन विजितानि जगन्तिभूम्ना
विश्वस्य यं परमकारणमामनन्ति ।
विश्राणयन्प्रणायिनां विविधान्पुमर्थान्
गोप्ता स मे भवतु गोपपुराधिराजः ॥ १

देहल्यधीश्वर तवेदृशमीश्वरत्वं
तुष्टूषतां दिशति गद्गदिकानुबन्धम् ।
वाचालयस्यथ च मां क्वचन क्षपायां
क्षान्तेन दान्तकविमुख्यविमर्दनेन ॥ २

त्वच्चक्रवद्द्रुतमनेहसि घूर्णमाने
निम्नोन्नतक्रमनिदर्शितनेमिवृत्ताः ।
आराध्य गोपनगरे कृपयोदितं त्वां
स्वाराज्यमग्र्यमलभन्तसुरासुरेन्द्राः ॥ ३

आकल्पपुष्पसुभगोन्नतबाहुशाखः
पादे सदा परिपचेलिमसत्फलस्त्वम् ।
पण्णातटस्पृशि मृकण्डुतपोवनेऽस्मिन्
छायानिलीनभुवनोऽसि तमालशाखी ॥ ४

चक्रस्य दैत्यदनुजादिषु वामभावं
शङ्खस्य चाश्रितजनेष्वपि दक्षिणत्वम् ।
व्यक्तं प्रदर्शयसि गोपपुराधिराज
व्यत्यस्य नूनमनयोःकरसंप्रयोगम् ॥ ५

दीपेन केनचिदशीतरुचा निशीथे
स्नेहोपपन्नपरिशुद्धगुणार्पितेन ।
दहावकाशनिबिडं ददृशुर्भवन्ततं
स्वाध्याययोगनयनाः शुचयः कवीन्द्राः ॥ ६

कासारपूर्वकविमुख्यविमर्दजन्मा
पण्णातटेक्षुसुभगस्य रसो बहुस्ते ।
त्वत्पादपद्ममधुनि त्वदनन्यभोग्ये
नूनं समाश्रयति नूतनशर्करात्वम् ॥ ७

वैरोचनेः सदसि वामनभूमिकावान्
विक्रान्तिताण्डवरसेन विजृम्भमाणः ।
चक्रे भवान्मकरकुण्डलकर्णपाशः
श्यामैकमेघभरितामिव सप्तलोकीम् ॥ ८

चित्रं न तत्त्रिषु मितानि पदेषु धत्ते
विश्वान्यमूनि भुवनानि विशङ्कटेषु ।
भक्तैस्समं क्वचिदसौ भवनैकदेशे
माति स्ममूर्तिरमिता तदिहाद्भुतं नः ॥ ९

भक्तप्रिय त्वयि तथा परिवर्धमाने
मुक्तावितानविततिस्तव पूर्वमासीत् ।
हारावलिः परमथो रशनाकलाप-
स्तारागणस्तदनु मौक्तिमनूपुरश्रीः ॥ १०

भिक्षोचितं प्रकटयन्प्रथमाश्रमत्वं
कृष्णाजिनं यवनिकां कृतवान्प्रियायाः ।
व्यक्ताकृतेस्तव समीक्ष्य भुजान्तरे तां
त्वामेव गोपनगरीश जना विदुस्त्वाम् ॥ ११

सत्कुर्वतां तव पदं चतुराननत्वं
पादोदकं च शिरसा वहतां शिवत्वम् ।
एकत्र विक्रमणकर्मणि तद्द्वयं ते
देहल्यधीश युगपत्प्रथितं पृथिव्याम् ॥ १२

भक्तोपरोधसह पादसरोजतस्ते
मन्दाकिनी विगलिता मकरन्दधारा ।
सद्यस्त्रिवर्गमपवर्गमपि क्षरन्ती
पुण्या बभूव पुरशासनमौलिमाला ॥ ॥ १३

विक्रान्तिकेतुपटिका पदवाहिनी ते
न्यञ्चन्युपैति नतजीवित शिंशुमारम् ।
औत्तानपादिममृतांशुमशीतभानुं
हेमाचलं पशुपतिं हिमवन्तमुर्वीम् ॥ १४

वेधःकमण्डलुजलैर्विहितार्चनं ते
पादाम्बुजं प्रतिदिनं प्रतिपद्यमाना ।
स्तोत्रप्रिय त्रिपथगादिसरिद्वराणां
पण्णा बभूव भुवने बहुमानपात्रम् ॥ १५

स्वच्छन्दविक्रमसमुन्नमितादमुष्मात्
स्रोतस्त्रयं यदभवत्तव पादपद्मात् ।
वेतालभूतसरसामपदिश्य वाचं
प्रायेण तत्प्रसवभूमिमवाप भूयः ॥ १६

क्रीडापरेण भवताविहितोपरोधा-
नाराधकाननुपरोधमुदञ्चयिष्यन् ।
तारेण पादनखरेण तदाण्डमध्ये
घन्टापथं कमपि नूनमवर्तयस्त्वम् ॥ १७

कामाविलेऽपि करुणार्णवविन्दुरेकः
क्षिप्तः स्वकेलितरसा तव देहलीश ।
तत्संततेरुभयथा विततिं भजन्त्याः
संसारदावदहनं शमयत्यशेषम् ॥ १८

नीडोदरान्निपतितस्य शुकार्भकस्य
त्राणेन नाथ विहरन्निव सार्वभौमः ।
आदाय गोपनगराधिपते स्वयं मां
क्रीडादयाव्यतिकरेण कृतार्थय त्वम् ॥ १९

लीलाशकुन्तमिव मां स्वपदोपलब्ध्यै
स्वैरं क्षिपन्दुरितपञ्जरतो गुणस्थम् ।
तत्तादृशं कमपि गोपपुरीविहारिन्
संतोषमुल्ललय सागरसंभवायाः ॥ २०

वातूलकल्पवृजिनप्रभवैर्मदीयां
वैयाकुलीं विषयसिन्धुतरङ्गभङ्गैः ।
दासोपमर्दसह दुर्निरसां त्वदन्यै-
रन्वीक्ष्य गाढमनुकम्पितुमर्हसि त्वम् ॥ २१

एनस्विनीमिति सदा मयि जायमानां
देहलयधीश दृषदोऽपि विलापयन्तीम् ।
नाथे समग्रशकने त्वयि जागरूके
किं ते सहेत करुणा करुणामवस्थाम् ॥ २२

आत्मोन्नतिं परनिकर्षमपीह वाञ्छन्
निम्ने विमोहजलधौ निपतामि भूयः ।
तन्मामुदञ्चय तवोन्नतपादनिघ्नं
देहल्यधीश गुणितेन दयागुणेन ॥ २३

अक्षीणकल्मषरसोऽपि तवानृशंस्या-
ल्लक्ष्मीसमक्षमपि विज्ञपयाम्यभीतः ।
भक्तोपमर्दरसिक स्वयमल्पबुद्धे-
र्यन्मन्यसे मम हितं तदुपाददीथाः ॥ २४

मन्ये दयार्द्रहृदयेन महाधनं मे
दत्तं त्वयेदमनपायमकिंचनत्वम् ।
येन स्तनंधयमिव स्वहितानभिज्ञं
न्यासीकरोषि निजपादसरोरुहे माम् ॥ २५

दुर्वारतीव्रदुरितप्रतिवावदूकै-
रौदार्यवद्भिरनघस्मितदर्शनीयैः ।
देहल्यधीश्वर दयाभरितैरपाङ्गै-
र्वाचं विनापि वदसीव मयि प्रसादम् ॥ २६

अयमनवमसूक्तैरादिभक्तैर्यथाव
द्विशदितनिजतत्त्वो विश्वमव्यादभव्यात् ।
रथचरणनिरूढव्यञ्जनानांजननां
दुरितमथनलीलादोहली देहलीशः ॥ २७

इयमवितथवर्णा वर्णनीयस्वभावा-
द्विदितनिगमसीम्ना वेङ्कटेशेन गीता ।
भवमरुभुवि तृष्णालोभपर्याकुलानां
दिशतु फलमभीष्टं देहलीशस्तुतिर्नः ॥ २८

॥ देहलीशस्तुतिः संपूर्णा ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः ॥

परमार्थस्तुतिः

—०—

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदाहृदि ॥

श्रीमद्गृध्रसरस्तीरपारिजातमुपास्महे ।
यत्र तुङ्गैरतुङ्गैश्च प्रणतैर्गृह्यते फलम् ॥ १

गुरुभिस्त्वदनन्यसर्वभावै-
र्गुणसिन्धौ कृतसंप्लवस्त्वदीये ।
रणपुंगव वन्दिभावमिच्छन्न-
हमस्म्येकमनुग्रहास्पदं ते ॥ २

भुवनाश्रयभूषणास्त्रवर्गं
मनसि त्वन्मयतां ममातनातु ।
वपुराहवपुंगव त्वदीयं
महिषीणामनिमेषदर्शनीयम् ॥ ३

अभिरक्षितुमग्रतः स्थितं त्वां
प्रणवे पार्थरथे च भावयन्तः ।
अहितप्रशमैरयत्नलभ्यैः
कथयन्त्याहवपुंगवं गुणज्ञाः ॥ ४

कमला निरपायधर्मपत्नी
करुणाद्याः स्वयमृत्विजो गुणास्ते ।
अवनं श्रयतामहीनमाद्यं
स च धर्मस्त्वदनन्यसेवनीयः ॥ ५

कृपणाः सुधियः कृपासहायं
शरणं त्वां रणपुंगव प्रपन्नाः ।
अपवर्गनयादनन्यभावा
वरिवस्यारसमेकमाद्रियन्ते ॥ ६

अवधीर्य चतुर्विधं पुमर्थं
भवदर्थे विनियुक्त जीवितः सन् ।
लभते भवतः फलानि जन्तु-
र्निखिलान्यत्र निदर्शने जटायुः ॥ ७

शरणागतरक्षणव्रती मां
न विहातुं रणपुंगवार्हसि त्वम् ।
विदितं भुवने विभीषणो वा
यदि वा रावण इत्युदीरितं ते ॥ ८

भुजगेन्द्रगरुत्मदादिलभ्यै-
स्त्वदनुज्ञानुभवप्रवाहभेदैः ।
स्वपदे रणपुंगव स्वयं मां
परिचर्याविभवैः परिष्क्रियेथाः ॥ ९

विमलाशयवेङ्कटेशजन्मा
रमणीया रणपुंगवप्रसादात् ।
अनसूयुभिरादरेण भाव्या
परमार्थस्तुति रन्वहं प्रपन्नैः ॥ १०

॥ परमार्थस्तुतिः संपूर्णा ॥

—:०:०:—

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः ॥

दयाशतकप्रारम्भः

॥ श्रीमते रामानुजाय नमः ॥

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

—:*०*०*:—

प्रपद्ये तं गिरिं प्रायः श्रीनिवासानुकम्पया ।
इक्षुसारस्रवन्त्येव यन्मूर्त्या शर्करायितम् ॥ १

विगाहे तीर्थबहुलां शीतलां गुरुसन्ततिम् ।
श्रीनिवासदयाम्भोधिपरीवाहपरम्पराम् ॥ २

कृतिनः कमलावासकारुण्यैकान्तिनो भजे ।
धत्ते यत्सूक्तिरूपेण त्रिवेदी सर्वयोग्यताम् ॥ ३

पराशरमुखान्वन्दे भगीरथनये स्थितान् ।
कमलाकान्तकारुण्यगङ्गाप्लावितमद्विधान् ॥ ४

अशेषविघ्नशमनमनीकेश्वरमाश्रये ।
श्रीमतः करुणाम्भोधौ शिक्षास्रोत इवोत्थितम् ॥ ५

समस्तजननीं वन्दे चैतन्यस्तन्यदायिनीम् ।
श्रेयसीं श्रीनिवासस्यकरुणामिव रूपिणीम् ॥ ६

वन्दे वृषगिरीशस्य महिषीं विश्वधारिणीम् ।
तत्कृपाप्रतिघातानां क्षमया वारणं यया ॥ ७

निशामयतु मां नीला यद्भोगपटलैर्ध्रुवम् ।
भावितं श्रीनिवासस्य भक्तदोषेष्वदर्शनम् ॥ ८

कमप्यनवधिं वन्दे करुणावरुणालयम् ।
वृषशैलतटस्थानां स्वयं व्यक्तिमुपागतम् ॥ ९

अकिञ्चननिधिं सूतिमपवर्गत्रिवर्गयोः
अञ्जनाद्रीश्वरदयामभिष्टौमि निरञ्जनाम् ॥ १०

अनुचरशक्त्यादिगुणा-
मग्रेसरबोधविरचितालोकाम् ॥
स्वाधीनवृषगिरीशां
स्वयंप्रभूतां प्रमाणयामि दयाम् ११

अपि निखिललोकसुचारित-
मुष्टिन्धयदुरितमूर्च्छनाजुष्टम् ।
संजीवयतु दये मा-
मञ्जनगिरिनाथरञ्जनीभवती ॥ १२

भगवति दये भवत्या
वृषगिरिनाथे समाप्लुते तुङ्गे ।
अप्रतिघमज्जनानां
हस्तालम्बो मदागसां मृग्यः ॥ १३

कृपणजनकल्पलतिकां
कृतापराधस्य निष्क्रियामाद्याम् ।
वृषगिरिनाथदये त्वां
विदन्ति संसारतारणीं विबुधाः ॥ १४

वृषगिरिगृहमेधिगुणा
बोधबलैश्वर्यवीर्यशक्तिमुखाः ।
दोषा भवेयुरेते
यदि नाम दये त्वया विना भूताः ॥ १५

आसृष्टिसंततानां-
मपराधानां निरोधिनीं जगतः ।
पद्मासहायकरुणे
प्रतिसंचरकेलिमाचरसि ॥ १६

अचिदविशिष्टान् प्रलये
जन्तूनवलोक्य जातनिर्वेदा ।
करणकलेवरयोगं
वितरसि वृषशैलनाथकरुणे त्वम् ॥ १७

अनुगुणदशार्पितेन
श्रीधरकरुणे समाहितस्नेहा ।
शमयसि तमः प्रजानां
शास्त्रमयेन स्थिरप्रदीपेन ॥ १८

रूढावृषाचलपतेः
पादे मुखकान्तिपत्रलच्छाया ।
करुणे सुखयसि विनतान्-
कटाक्षविटपैः करापचेयफलैः ॥ १९

नयने वृषाचलेन्दो-
स्तारामैत्रीं दधानया करुणे ।
दृष्टस्त्वयैव जनिमा-
नपवर्गमकृष्टपच्यमनुभवति ॥ २०

समयोपनतैस्तव प्रवाहै-
रनुकम्पे कृतसंप्लवा धरित्री ।
शरणागतसस्यमालिनीयं
वृषशैलेशकृषीवलं धिनोति ॥ २१

कलशोदधिसम्पदो भवत्याः
करुणे सन्मतिमन्थसंस्कृतायाः ।
अमृतांशमवैमि दिव्यदेहं
मृतसञ्जीवनमञ्जनाचलेन्दोः ॥ २२

जलधेरिव शीतता दये त्वं
वृषशैलाधिपतेः स्वभावभूता ।
प्रलयारभटीनटीं तदीक्षां
प्रसभं ग्राहयसि प्रसत्तिलास्यम् ॥ २३

प्रणतप्रतिकूलमूलघाती
प्रतिघिः कोऽपि वृषाचलेश्वरस्य ।
कलमे यवसापचायनीत्या
करुणे किंकरतां तवोपयाति ॥ २४

अबहिष्कृतनिग्रहान् विदन्तः
कमलाकान्तगुणान् स्वतंत्रतादीन् ।
अविकल्पमनुग्रहं दुहानां
भवती मेव दये भजन्ति सन्तः॥ २५

कमलानिलयस्त्वया दयालुः
करुणे निष्करुणा निपरूणे त्वम् ।
अत एव हि तावकाश्रितानां
दुरितानां भवति त्वदेवभीतिः ॥ २६

अतिलंघितशासनेष्वभीक्ष्णं
वृषशैलाधिपतिर्विजृम्भितोष्मा ।
पुनरेव दये क्षमानिदानै-
र्भवतीमाद्रियते भवत्यधीनैः ॥ २७

करुणे दुरितेषु मामकेषु
प्रतिकारान्तरदुर्जयेषु खिन्नः ।
कवचायितया त्वयैव शार्ङ्गी
विजयस्थानमुपाश्रितो वृषाद्रिम् ॥ २८

मयि तिष्ठति दुष्कृतां प्रधाने
मितदोषानितरान्विचिन्वती त्वम् ।
अपराधगणैरपूर्णकुक्षिः
कमलाकान्तदये कथं भवित्री ॥ २९

अहमस्म्यपराधचक्रवर्ती
करुणे त्वं च गुणेषु सार्वभौमी ।
विदुषी स्थितिमीदृशीं स्वयं मां
वृषशैलेश्वरपादसात्कुरुत्वम् ३० ॥ ३०

अशिथिलकरणेऽस्मिन्नक्षतश्वासवृत्तौ
वपुषि गमनयोग्ये वासमासादयेयम् ।
वृषगिरिकटकेषु व्यञ्जयत्सु प्रतीतै-
र्मधुमथनदये त्वां वारिधाराविशेषैः ॥ ३१

अविदितनिजयोगक्षेममात्मानभिज्ञं
गुणलवरहितं मां गोप्तुकामा दये त्वम् ।
परवति चतुरैस्ते विभ्रमैः श्रीनिवासे
बहुमतिमनपायां विन्दसि श्रीधरण्योः ॥ ३२

फलवितरणनक्षं पक्षपातानभिज्ञं
प्रगुणमनुविधेयं प्राप्य पद्मासहायम् ।
महति गुणसमाजे मानपूर्वं दये त्वं
प्रतिवदसि यथार्हं पाप्मनां मामकानाम् ॥ ३३

अनुभवितुमघौघं नालमागामिकालः
प्रशमयितुमशेषं निष्क्रियाभिर्न शक्यम् ।
स्वयमिति हि दये त्वं स्वीकृतश्रीनिवासा
शिथिलितभवभीतिः श्रेयसे जायसे नः ॥ ३४

अवतरणविशेषैरात्मलीलापदेशै-
रवमतिमनुकम्पे मन्दचित्तेषु विन्दन ।
वृषभ शिखरिनाथस्त्वन्निदेशेन नूनं
भजति शरणभाजां भाविनो जन्मभेदान् ॥ ३५

परहितमनुकम्पे भावयन्त्यां भवत्यां
स्थितमनुपधि हार्दं श्रीनिवासो दधानः ।
ललितरुचिषु लक्ष्मीभूमिनीलासु नूनं
प्रथयति बहुमानं त्वत्प्रतिच्छन्दबुद्ध्या ॥ ३६

वृषगिरिसविधेषु व्याजतो वासभाजां
दुरितकलुषितानां दूयमाना दये त्वम् ।
करणविलयकाले कान्दिशीकस्मृतीनां
स्मरयसि बहुलीलं माधवं सावधाना । ३७

दिशि दिशि गतिविद्भिर्देशिकैर्नीयमाना
स्थिरचरमनुकम्पे स्त्यानलग्ना गुणैस्त्वम् ।
परिगत वृषशैलं पारमारोपयन्ती
भवजलधिगतानां पोतपात्रीभवित्री ॥ ३८

परिमितफलसङ्गात्प्राणिनः किम्पचाना
निगमविपणिमध्ये नित्यमुक्तानुषक्तम् ।
प्रसदनमनुकम्पे प्राप्तवत्या भवत्या
वृषगिरिहरिनीलं व्यञ्जितं निर्विशन्ति ॥ ३९

त्वयि बहुमतिहीनः श्रीनिवासानुकम्पे
जगति गतिमिहान्यां देवि सम्मन्यते यः ।
स खलु विबुधसिन्धौ सन्निकर्षे वहन्त्यां
शमयति मृगतृष्णावीचिकाभिः पिपसाम् ॥ ४०

आज्ञां ख्यातिं धनमनुचरा नाधिराज्यादिकं वा
काले दृष्टा कमलवसतेरप्यकिञ्चित्कराणि ।
पद्माकान्तं प्रणिहितवतीं पालनेऽनन्यसाध्ये
साराभिज्ञा जगति कृतिनः संश्रयन्ते दये त्वाम् ॥ ४१

प्राजापत्यप्रभृतिविभवं प्रेक्ष्य पर्यायदुःखं
जन्माकाङ्क्षन्वृषगिरिवने जग्मुषां तस्थुषां वा ॥
आशासाना कतिचन विभो स्त्वत्परिष्वङ्गधन्यै-
रङ्गीकारं क्षणमपि दये हार्दतुङ्गैरपाङ्गैः ॥ ४२

नाभीपद्मस्फुरणसुभगानव्यनीलोत्पलाभा-
क्रीडाशैलं कमपि करुणे वृण्वती वेङ्कटाख्यम् ।
शीता नित्यं प्रसदनवती श्रद्दधानावगाह्या
दिव्या काचिज्जयति महती दीर्घिका तावकीना ॥ ४३

यस्मिन् दृष्टे तदितरसुखैर्गम्यते गोष्पदत्वं
सत्यं ज्ञानं त्रिभिरवधिभिर्मुक्तमानन्दसिन्धुम् ।
त्वत्स्वीकारात्तमिह कृतिनः सूरिवृन्दानुभाव्यं
नित्यापूर्वं निधिमिव दये निर्विशन्त्यञ्जनाद्रौ ॥ ४४

सारं लब्ध्वा कमपि महतः श्रीनिवासाम्बुराशेः
काले काले घनरसवती कालिकेवानुकम्पे ।
व्यक्तोन्मेषामृगपतिगिरौ विश्वमाप्याययन्ती
शीलोपज्ञं क्षरति भवती शीतलं सद्गुणौघम् ॥ ४५

भीमे नित्यं भवजलनिधौ मज्जतां मानवाना-
मालम्बार्थं वृषगिरिपतिस्त्वन्नियोगात्प्रयुङ्क्ते ।
प्रज्ञासारं प्रकृतिमहता मूलभागेन जुष्टं
शाखाभेदैः सुभगमनघं शाश्वतं शस्त्रपाणिम् ॥ ४६

विद्वत्सेवाकतकनिकषैर्वीतपङ्काशयानां
पद्माकान्तः प्रणयति दये दर्पणं ते स्वशास्त्रम् ।
लीलादक्षां त्वदनवसरे लालयन् विप्रलिप्सां
मायाशास्त्राण्यपि शमयितुं त्वत्प्रपन्नप्रतीपान् ॥ ४७

दैवात्प्राप्ते वृषगिरितटं देहिनि त्वन्निदानात्-
स्वामिन्पाहीत्यवशवचने विन्दति स्वापमन्त्यम् ।
देवः श्रीमान्दिशति करुणे दृष्टिमिच्छंस्त्वदीया-
मुद्घातेन श्रुतिपरिषदामुत्तरेणाभिमुख्यम् ॥ ४८

श्रेयस्सूतिं सकृदपि दये सम्मतां यः सखीं ते
शीतोदारामलभत जनः श्रीनिवासस्य दृष्टिम् ।
देवादीनामयमनृणतां देहवत्त्वेऽपि विन्दन्-
बन्धान्मुक्तो बलिभिरनघैः पूर्यतेतत्प्रयुक्तैः ॥ ४९

दिव्यापाङ्गं दिशसि करुणे येषु सद्देशिकात्मा
क्षिप्रं प्राप्ता वृषगिरिपतिं क्षत्रबन्ध्वादयस्ते ॥
विश्वाचार्या विधिशिवमुखाः स्वाधिकारोपरुद्धा
मन्ये माता जड इव सुते वत्सला मादृशे त्वम् ॥ ५०

अतिकृपणोऽपि जन्तुरधिगम्य दये भवती-
मशिथिलधर्मसेतुपदवीं रुचिराममचिरात् ॥
अमितमहोर्मिजालमतिलङ्घय भवाम्बुनिधिं
भवति वृषाचलेशपदपत्तननित्यधनी ॥ ५१

अभिमुखभावसंपदभिसंभविनां भविनां
क्वचिदुपलक्षिताक्वचिदभङ्गुरगूढगतिः ॥
विमलरसावहा वृषगिरीशदये भवती
सपदि सरस्वतीव शमयत्यघमप्रतिघम् ॥ ५२

अपि करुणे जनस्य तरुणेन्दुविभूषणता-
मपि कमलासनत्वमपि धाम वृषाद्रिपतेः ॥
तरतमतावशेन तनुते ननु ते बिततिः
परहितवर्ष्मणा परिपचेलिमकेलिमती ॥ ५३

धृतभुवना दये त्रिविधगत्यनुकूलतरा-
वृषगिरिनाथपादपरिरम्भवती भवती ॥
अविदित वैभवापि सुरसिन्धुरिवातनुते
सकृदवगाहमानमपतापमपापमपि ॥ ५४

निगमसमाश्रिता निखिललोकसमृद्धिकरी
भजदघकूलमुद्वहगतिः परितप्तहिता ॥
प्रकटितहंसमत्स्यकमठाद्यवतारशता
विबुधसरिच्छ्रियं वृषगिरीशदये वहसि ॥ ५५

जगति मतिम्पचा त्वदितरा तु दये तरला
फलनियमोज्झिता भवति सन्तपनाय पुनः ॥
त्वमिह निरङ्कुशप्रशकनादिविभूतिमती
वितरसि देहिनां निरवधिं वृषशैलनिधिम् ॥ ५६

सकरुणलौकिकप्रभुपरिग्रहनिग्रहयो-
नियतिमुपाधिचक्रपरिवृत्तिपरम्परया
वृषभमहीधरेशकरुणे वितरङ्गयतां
श्रुतिमितसम्पदि त्वयि कथं भविता विशयः ॥ ५७

वृषगिरिकृष्णमेघजनितां जनितापहरां
त्वदभिमतिं सुवृष्टिमुपजीव्यनिवृत्ततृषः ॥
बहुषु जलाशयेषु बहुमानमपोह्य दये
न जहति सत्पथं जगति चातकवत्कृतिनः ॥ ५८

त्वदुदयतूलिकाभिरमुना वृषशैलजुषा
स्थिरतरशिल्पिनैव परिकल्पितचित्रधियः ॥
यतिपतियामुनप्रभृतयः प्रथयन्ति दये
जगति हितन्न नस्त्वयि भरन्यसनादधिकम् ॥ ५९

मृदुहृदये दये मृदितकामहिते महिते
धृतविबुधे बुधेषु विततात्मधुरे मधुरे ॥
वृषगिरिसार्वभौमदयिते मयि ते महतीं
भवुकनिधे निधेहि भवमूलहरां लहरीम् ॥ ६०

अकूपारैरेकोदकसमयवैतण्डिकजवै-
रनिर्वाप्यां क्षिप्रं क्षपयितुमविद्याख्यवडवाम् ॥
कृपे त्वं तत्तादृक्प्रथिमवृषपृथ्वीधरपति-
स्वरूपद्वैगुण्यद्विगुण निज बिन्दुः प्रभवसि ॥६१

विवित्सावेतालीविगमपरिशुद्धेऽपि हृदये
पटुप्रत्याहारप्रभृतिपुटपाकप्रचकिताः ॥
नमन्तस्त्वां नारायणशिखरि कूटस्थकरुणे
निरुद्धत्वद्द्रोहानृपतिसुतनीतिं न जहति ॥ ६२

अनन्याधीनः सन् भवति परतन्त्रः प्रणमतां
कृपे सर्वद्रष्टा न गणयति तेषामपकृतिम् ॥
पतिस्त्वत्पारार्थ्यं प्रथयति वृषक्ष्माधरपति-
र्व्यवस्थां वैयात्यादिति विघटयन्ती विहरसि ॥ ६३

अपां पत्युः शत्रूनसहनमुनेर्धर्मनिगडं
कृपे काकस्यैकं हितमिति हिनस्ति स्मनयनम् ॥
विलीनस्वातन्त्र्यो वृषगिरिपतिस्त्वद्विहृतिभि-
र्दिशत्येवं देवो जनितसुगतिं दण्डनविधिम् ॥ ६४

निषादानां नेता कपिकुलपतिः कापि शबरी
कुचेलः कुब्जा सा व्रजयुवतयो माल्यकृदिति ॥
अमीषां निम्नत्वं वृषगिरिपतेरुन्नतिमपि
प्रभूतैः स्रोतोभिः प्रसभमनुकम्पे शमयसि ॥ ६५

त्वया दृष्टस्तुष्टिं भजति परमेष्ठी निजपदे
वहन्मूर्तीरष्टौ विहरति मृडानीपरिवृढः ॥
बिभर्ति स्वाराज्यं वृषशिखरिशृङ्गारिकरुणे
शुनासीरो देवासुर समरनासीरसुभटः ॥ ६६

दये दुग्धोदन्वद्व्यतियुतसुधासिन्धुनयत-
स्त्वदाश्लेषान्नित्यं जनितमृतसंजीवनदशाः ॥
स्वदन्ते दान्तेभ्यः श्रुतिवदनकर्पूरगुलिका-
विवृण्वन्तश्चित्तं वृषशिखरिविश्वम्भरगुणाः ॥ ६७

जगज्जन्मस्थेमप्रलयरचनाकेलिरसिको-
विमुक्त्येकद्वारं विघटितकपाटं प्रणयिनाम् ॥
इति त्वय्यायत्तं द्वितयमुपधीकृत्य करुणे
विशुद्धानां वाचां वृषशिखरिनाथस्तुतिपदम् ॥ ६८

कलिक्षोभोन्मीलत्क्षितिकलुषकूलंकषजवै-
रनुच्छेदैरेतैरवटतटवैषम्यरहितैः ।
प्रवाहैस्ते पद्मासहचरपरिष्कारिणि कृपे
विकल्पन्तेऽनल्पावृषशिखरिणो निर्झरगुणाः ॥६९

खिलं चेतोवृत्तेः किमिदमिति विस्मेरभुवनं
कृपे सिंहक्ष्मात्कृतमुखचमत्कारकरणम् ।
भरन्यासच्छन्नप्रबलवृजिनप्राभृतभृतां
प्रतिप्रस्थानं ते श्रुतिनगरशृङ्गाटकजुषः ॥ ७०

त्रिविधचिदचित्सत्तास्थेमप्रवृत्तिनियामिका
वृषगिरिविभोरिच्छा सा त्वं परैरपराहता ।
कृपणभरभृत्किंकुर्वाणप्रभूतगुणान्तरा
वहसि करुणे वैचक्षण्यं मदीक्षणसाहसे ॥ ७१

वृषगिरिपतेर्हृद्या विश्वावतारसहायिनी
क्षपितनिखिलावद्या देवि क्षमादिनिषेविता ।
भुवनजननी पुंसां भोगापवर्गविधायिनी
वितमसि पदेव्यक्तिं नित्यां बिभर्षि दये स्वयम् ॥७२

स्वयमुदयिनः सिद्धाद्याविष्कृताश्च शुभालया
विविधविभवव्यूहावासाः परं च पदं विभोः ।
वृषगिरिमुखेष्वेतेष्विच्छावधिप्रतिलब्धये
दृढविनिहता निःश्रेणिस्त्वं दये निजपर्वभिः ॥७३

हितमितिजगद्दृष्ट्या क्लृप्तैरक्लृप्तफलान्तरै-
रमतिविहितैरन्यैर्धर्मायितैश्च यदृच्छया ।
परिणतबहुच्छद्मापद्मासहायदये स्वयं
प्रदिशसि निजाभिप्रेतं नः प्रशाम्यदपत्रपा ॥७४

अतिविधिशिवैरैश्वर्यात्माऽनुभूतिरसैर्जना-
नहृदयमिहोपच्छन्द्यैषामसङ्गदशार्थिनी ।
तृषितजनतातीर्थस्नानक्रमक्षपितैनसां
वितरसि दये वीतातङ्का वृषाद्रिपतेः पदम् ॥ ७५

वृषगिरिसुधासिन्धौ जन्तुर्दये निहितस्त्वया
भवभयपरीतापच्छित्यै भजन्नघमर्षणम् ।
मुषितकलुषो मुक्तेरग्रे सरैरभिपूर्यते
स्वयमुपनतैः स्वात्मानन्दप्रभृत्यनुबन्धिभिः ॥७६

अनितरजुषामन्तर्मूलेऽप्यपायपरिप्लवे
कृतविदनघाविच्छिद्यैषां कृपेयमवश्यताम् ।
प्रपदनफलप्रत्यादेशप्रसङ्गविवर्जितं
प्रतिविधिमुपादित्से सार्धं वृषाद्रिहितैषिणा ॥७७

क्षणविलयिनां शास्त्रार्थानां फलाय निवेशिते
पितृसुरगणे निर्वेशात्प्रागपि प्रलयं गते ।
अधिगतवृषक्ष्माभृन्नाथामकालवशंवदां
प्रतिभुवमिह व्याचख्युस्त्वां कृपे निरुपप्लवाम् ॥७८

त्वदुपसदनादद्य श्वो वा महाप्रलयेऽपि वा
वितरति निजं पादाम्भोजं वृषाचलशेखरः ।
तदिह करुणे तत्तत्क्रीडातरङ्गपरम्परा-
तरतमतया जुष्टायास्ते दुरत्ययतां विदुः ॥ ७९

प्रणिहितधियां त्वत्संपृक्ते वृषाद्रिशिखामणौ
प्रसृमरसुधाधाराकारा प्रसीदति भावना ।
दृढमिति दये दत्तास्वादं विमुक्तिबलाहकं
निभृतगरुतो निध्यायन्ति स्थिराशयचातकाः ॥८०

कृपे विगतवेलया कृतसमग्रपोषैस्त्वया
कलिज्वलनदुर्गते जगति कालमेघायितम् ।
वृषक्षितिधरादिषु स्थितिपदेषु सानुप्लवै-
र्वृषाद्रिपतिविग्रहैर्व्यपगताखिलावग्रहैः ॥ ८१

प्रसूय विविधं जगत्तदभिवृद्धये त्वं दये
समीक्षणविचिन्तनप्रभृतिभिः स्वयं तादृशैः ।
विचित्रगुणचित्रितां विविधदोषवैदेशिकीं
वृषाचलपतेस्तनुं विशसि मत्स्यकूर्मादिकाम् ॥८२

युगान्तसमयोचितं भजति योगनिद्रारसं
वृषक्षितिभृदीश्वरे विहरण क्रमाज्जाग्रति ।
उदीर्णचतुर्णवीकदनवेदिनीं मेदिनीं
समुद्धृतवती दये तदभिजुष्टया दंष्ट्रया ॥ ८३

सटापटलभीषणे सरभसाट्टहासोद्भटे
स्फुरत्क्रुधिपरिस्फुरद्भ्रुकुटिकेऽपि वक्त्रे कृते ।
दये वृषगिरीशितुर्दनुजडिम्भदत्तस्तना-
सरोजसदृशा दृशासमुदिताकृत्तिर्दृश्यसे ॥ ८४

प्रसक्तमधुना विधिप्रणिहितैस्सपर्योदकैः
समस्तदुरितच्छिदा निगमगन्धिना त्वं दये ।
अशेषमविशेषतस्त्रिजगदञ्जनाद्रीशितु-
श्चराचरमचीकरश्चरणपङ्कजेनाङ्कितम् ॥ ८५

परश्वधतपोधनप्रथनसत्क्रतूपाकृत-
क्षितीश्वरपशुक्षरत्क्षतजकुङ्कुमस्थासकैः ।
वृषाचलदयालुना ननु विहर्तुमालिप्यथा
निधाय हृदये दये निहितरक्षितानां हितम् ॥ ८६

कृपे कृतजगद्धिते कृपणजन्तुचिन्तामणे
रमासहचरं क्षितौ रघुधुरीणयन्त्या त्वया ।
व्यभजत सरित्पतिः सकृदवेक्षणात्तत्क्षणात्-
प्रकृष्टबहुपातकप्रशमहेतुना सेतुना ॥ ८७

कृपे परवतस्त्वया वृषगिरीशितुः क्रीडितं
जगद्धितमशेषतस्तदिदमित्थमर्थाप्यते ।
मदच्छलपरिच्युतप्रणतदुष्कृतप्रेक्षितै-
र्हतप्रबलदानवैर्हलधरस्य हेलाशतैः ॥ ८८

प्रभूतविबुधद्विषद्भरणखिन्नविश्वम्भराभरा-
पनयनच्छलात्त्वमवतार्य लक्ष्मीधरम् ।
निराकृतवती दये निगमसौधदीप्तश्रिया
विपश्चिदविगीतया जगति गीतयान्धं तमः ॥ ८९

वृषाद्रिहयसादिनः प्रबलदोर्मरुत्प्रेङ्खित-
स्त्विषा स्फुटतटिद्गुणस्त्वदवसेकसंस्कारवान् ।
करिष्यति दये कलिप्रबलधर्मनिर्मूलनः
पुनः कृतयुगाङ्कुरं भुवि कृपाणधाराधरः ॥ ९०

विश्वोपकारमिति नाम सदा दुहाना-
मद्यापि देवि भवतीमवधीरयन्तम् ।
नाथे निवेशय वृषाद्रिपतौ दये त्वं
न्यस्तस्वरक्षभरं त्वयि मां त्वयैव ॥ ९१

नैसर्गिकेण तरसा करुणे नियुक्ता
निम्नेतरेऽपि मयि ते विततिर्यदि स्यात् ।
विस्मापयेद्वृषगिरीश्वरमप्यवार्या
वेलातिलङ्घनदशेव महाम्बुराशेः ॥ ९२

विज्ञातशासनगतिर्विपरीतवृत्त्या
वृत्रादिभिः परिचितां पदवीं भजामि ।
एवंविधे वृषगिरीशदये मयि त्वं
दीने विभोः शमय दण्डधरत्वलीलाम् ॥ ६३

मा साहसोक्तिघनकञ्चुकवञ्चितान्यः
पश्यत्सु तेषु विदधाम्यतिसाहसानि ।
पद्मासहायकरुणे न रुणत्सि किं त्वं
घोरं कुलिङ्गशकुनेरिव चेष्टितं मे ॥ ६४

विक्षेपमर्हसि दये विपलायितेऽपि
व्याजं विभाव्य वृषशैलपतेर्विहारम् ।
स्वाधीनसत्वसरणिः स्वयमत्र जन्तौ
द्राघीयसी दृढतरा गुणवागुरात्वम् ॥ ६५

सन्तन्यमानमपराधगणं विचिन्त्य
त्रस्यामि हन्त भवतीं च विभावयामि ।
अह्नाय मे वृषगिरीश दये जहीमा-
माशीविषग्रहणकेलिनिभामवस्थाम् ॥ ६६

औत्सुक्यपूर्वमुपहृत्य महापराधान्-
मातः प्रसादयितुमिच्छति मे मनस्त्वाम् ।
आलिह्यतान् निरवशेषमलब्धतृप्ति-
स्ताम्यस्यहो वृषगिरीशधृता दये त्वम् ॥ ६७

जह्याद्वृषाचलपतिः प्रतिघेऽपि न त्वां
धर्मोपतप्त इव शीतलतामुदन्वान् ।
सा मामरुंतुदभरन्यसनानुवृत्ति-
स्तद्वीक्षणैः स्पृश दये तव केलिपद्मैः ॥ ६८

दृष्टेऽपि दुर्बलधियं दमनेऽपि दृप्तं
स्नात्वापि धूलिरसिकं भजनेऽपि भीमम् ।
बध्वा गृहाण वृषशैलपतेर्दये मां
त्वद्वारणं स्वयमनुग्रहशृङ्खलाभिः ॥ ९९

नातः परं किमपि मे त्वयि नाथनीयं
मातर्दये मयि कुरुष्व तथा प्रसादम् ।
बद्धादरो वृषगिरिप्रणयी यथासौ
मुक्तानुभूतिमिह दास्यति मे मुकुन्दः ॥ १००

निस्सीमवैभवजुषांमिषतां गुणानां
स्तोतुर्दये वृषगिरीश गुणेश्वरीं त्वां ।
तैरेत्र नूनमवशैरभिनन्दितं मे
सत्यापितं तव बलादकुतोभयत्वम् ॥ १०१

अद्यापि तद्वृषगिरीशदये भवत्या-
मारम्भमात्रमनिदं प्रथमस्तुतीनाम् ।
संदर्शितस्वपरनिर्वहणासहेथा
मन्दस्य साहसमिदं त्वयि वन्दिनो मे ॥ १०२

प्रायो दये त्वदनुभावमहाम्बुराशौ
प्राचेतसप्रभृतयोऽपि परन्तटस्थाः ।
तत्रावतीर्णमतलस्पृशमाप्लुतं मां
पद्मापतेः प्रहसनोचितमाद्रियेथाः ॥ १०३

वेदान्तदेशिकपदे विनिवेश्य बालं
देवो दयाशतकमेतदवादयन्माम् ।
वैहारिकेण विधिना समये गृहीतं
वीणाविशेषमिव वेङ्कटशैलनाथः ॥ १०४

अनवधिमधिकृत्य श्रीनिवासानुकम्पा-
मवितथविषयत्वाद्विश्वमव्रीडयन्ती ।
विविधकुशलनीवीवेङ्कटेशप्रसूता
स्तुतिरियमनवद्या शोभते सत्वभाजाम् ॥ १०५

शतकमिदमुदारं सम्यगभ्यस्यमानान्-
वृषगिरिमधिरुह्य व्यक्तमालोकयन्ती ।
अनितरशरणानामाधिराज्येऽभिषिञ्चे-
च्छमितविमतपक्षा शार्ङ्गधन्वानुकम्पा ॥ १०६

विश्वानुग्रहमातरं व्यतिषजत्स्वर्गापवर्गां सुधा-
सध्रीचीमिव वेङ्कटेश्वरकविर्भक्त्यादयामस्तुत ।
पद्यानामिह यद्विधेयभगवत्संकल्पकल्पद्रुमात्
झञ्झामारुतधूतचूतनयतः सांपातिकोऽयं क्रमः ॥ १०७

कामं सन्तु मिथःकरम्बितगुणावद्यानि पद्यानि नः
कस्यास्मिन् शतके सदम्बुकतके दोषश्रुतिं क्षाम्यति ।
निष्प्रत्यूहवृषाद्रिनिर्झरझरत्कारच्छलेनोच्चल-
द्दीनालम्बनदिव्यदंपतिदयाकल्लोलकोलाहलः ॥ १०८

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कट-
नाथस्य वेदान्ताचार्यस्य कृतिषु दयाशतकं सम्पूर्णम् ४२
श्रीरस्तु ॥

—०—

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः ॥

॥ श्रीः ॥

यतिराजसप्ततिः

—:०:०:—

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदाहृदि ॥

कमप्याद्यं गुरुं वन्दे कमलागृहमेधिनम् ।
प्रवक्ता च्छन्दसां वक्ता पञ्चरात्रस्य यः स्वयम् ॥ १

सहधर्मचारीं शौरेः संमन्त्रितजगद्धिताम् ।
अनुग्रहमयीं वन्दे नित्यमज्ञातनिग्रहाम् ॥ २

वन्दे वैकुण्ठसेनान्यं देवं सूत्रवतीसखम् ।
यद्वेत्रशिखरस्पन्दे विश्वमेतद्व्यवस्थितम् ॥ ३

यस्य सारस्वतं स्रोतो वकुलामोदवासितम् ।
श्रुतीनां विश्रमायालं शठारिं तमुपास्महे ॥ ४

नाथेन मुनिना तेन भवेयं नाथवानहम् ।
यस्य नैगमिकं तत्त्वं हस्तामलकतां गतम् ॥ ५

नमस्याम्यरविन्दाक्षं नाथभावे व्यवस्थितम् ।
शुद्धसत्त्वमयं शौरेरवतारमिवापरम् ॥ ६

अनुज्झितक्षमायोगमपुण्यजनबाधकम् ।
अस्पृष्टमदरागं तं रामं तुर्यमुपास्महे ॥ ७

विगाहे यामुनं तीर्थं साधुवृन्दावने स्थितम् ।
निरस्तजिह्मगस्पर्शे यत्र कृष्णः कृतादरः ॥ ८

दयानिघ्नं यतीन्द्रस्य देशिकं पूर्णमाश्रये ।
येन विश्वसृजो विष्णोरपूर्यत मनोरथः ॥ ९

प्रणामं लक्ष्मणमुनिः प्रतिगृह्णातु मामकम् ।
प्रसाधयति यत्सूक्तिः स्वाधीनयतिकां श्रुतिम् ॥ १०

उपवीतिनमूर्ध्वपुण्ड्रवन्तं
त्रिजगत्पुण्यफलं त्रिदण्डहस्तम् ।
शरणागतसार्थवाहमीडे
शिखया शेखरिणं पतिं यतीनाम् ॥ ११

प्रथयन्विमतेषु तीक्ष्णभावं
प्रभुरस्मत्परिरक्षणे यतीन्द्रः ।
अपृथक्प्रतिपन्नयन्मयत्वै-
र्ववृधे पञ्चभिरायुधैर्मुरारेः ॥ १२

शमितोदयशंकरादिगर्वः
स्वबलादुद्धृतयादवप्रकाशः ।
अवरोपितवान् श्रुतेरपार्था-
न्ननु रामावरजः स एष भूयः ॥ १३

अबहुश्रुतसंभवं श्रुतीनां
जरतीनामयथायथप्रचारम् ।
विनिवर्तयितुं यतीश्वरोक्ति-
र्विदधे ताः स्थिरनीतिपञ्जरस्थाः ॥ १४

अमुना तपनातिशायिभूम्ना
यतिराजेन निबद्धनायकश्रीः ।
महती गुरुपङ्क्तिहारयष्टि-
र्विबुधानां हृदयंगमा विभाति ॥ १५

अलूनपक्षस्य यतिक्षमाभृतो
विभाति वंशे हरितत्त्वमक्षतम् ।
यदुद्भवाः शुद्धसुवृत्तशीतला
भवन्ति मुक्तावलिभूषणं भुवः ॥ १६

अनपायविष्णुपदसंश्रयं भजे
कलया कयापि कलयाप्यनुज्झितम् ।
अकलङ्कयोगमजडाशयोदितं
यतिराजचन्द्रमुपरागदूरगम् ॥ १७

अभिगम्य सम्यगनघाः सुमेधसो
यतिचक्रवर्तिपदपद्मपत्तनम् ।
हरिभक्तदास्यरसिकाः परस्परं
क्रयविक्रयार्हदशया समिन्धते ॥ १८

परुषातिवादपरिवादपैशुन-
प्रभृतिप्रभूतपतनीयपङ्किला ।
स्वदते ममाद्य सुभगा सरस्वती
यतिराजकीर्तिकतकैर्विशोधिता ॥ १९

अनुकल्पभूतमुरभित्पदं सता-
मजहत्त्रिवर्गमपवर्गवैभवम् ।
चलचित्तवृत्तिविनिवर्तनौषधं
शरणं यतीन्द्रचरणं वृणीमहे ॥ २०

श्वसितावधूतपरवादिवैभवा
निगमान्तनीतिजलधेस्तलस्पृशः ।
प्रतिपादयन्ति गतिमापवर्गिकीं
यतिसार्वभौमपदसात्कृताशयाः ॥ २१

मूले निवेश्य महतां निगमद्रुमाणां
मुष्णन्प्रतारकभयं धृतनैकदण्डः ।
रङ्गेशभक्तजनमानसराजहंसो
रामानुजः शरणमस्तु मुनिः स्वयं नः ॥ २२

सन्मन्त्रवित्क्षिपति संयमिनां नरेन्द्रः
संसारजिह्मगमुखैः समुपस्थितं नः ।
विष्वक्ततं विषयलोभविषं निजाभि-
र्गाढानुभावगरुडध्वजभावनाभिः ॥ २३

नाथः स एष यमिनां नखरश्मिजालै-
रन्तर्निलीनमपनीय तमो मदीयम् ।
विज्ञानचित्रमनघं लिखतीव चित्ते
व्याख्यानकेलिरसिकेन कराम्बुजेन ॥ २४

उद्गृह्णतीमुपनिषत्सु निगूढमर्थं
चित्ते निवेशयितुमल्पधियां स्वयं नः ।
पश्येम लक्ष्मणमुनेः प्रतिपन्नहस्ता-
मुन्निद्रपद्मसुभगामुपदेशमुद्राम् ॥ २५

आकर्षणानि निगमान्तसरस्वतीना-
मुच्चाटनानि बहिरन्तरुपप्लवानाम् ।
पथ्यानि घोरभवसंज्वरपीडितानां
हृद्यानि भान्ति यतिराजमुनेर्वचांसि ॥ २६

शीतस्वभावसुभगानुभवः शिखावान्
दोषावमर्दनियतोन्नतिरोषधीशः ।
तापानुबन्धशमनस्तपनः प्रजानां
रामनुजो जयतिसंवलितत्रिधामा ॥ २७

जयति सकलविद्यावाहिनीजन्मशैलो
जनिपथपरिवृत्तिश्रान्तविश्रान्तिशाखी ।
निखिलकुमतिमायाशर्वरीबाल सूर्यो
निगमजलधिवेलापूर्णचन्द्रो यतीन्द्रः ॥ २८

मुनिबहुमतसारा मुक्तिनिश्रेणिकेयं
सहृदयहृदयानां शाश्वती दिष्टसिद्धिः ।
शमितदुरितगन्धा संयमीन्द्रस्य सूक्तिः
परिचितगहना नः प्रस्नुवीत प्रसादम् ॥ २९

भवमरुपरिखिन्नस्फीतपानीयसिन्धु-
र्दुरितरहितजिह्वादुग्धकुल्यासकुल्या ।
श्रुतिनयनसनाभिः शोभते लक्ष्मणोक्ति-
र्नरकमथनसेवास्वादनाडिंधमा नः ॥ ३०

हरिपदमकरन्दस्यन्दिनः संश्रिताना-
मनुगतबहुशाखास्तापमुन्मूलयन्ति ।
शमितदुरितगन्धाः संयमीन्द्रप्रबन्धाः
कथकजनमनीषाकल्पनाकल्पवृक्षाः ॥ ३१

नानाभूतैर्जगति समयैर्नर्मलीला विधित्सो-
रन्त्यं वर्णं प्रथयति विभोरादिमव्यूहभेदे ।
विश्वंत्रातुं विषयनियतं व्यञ्जितानुग्रहः सन्
विष्वक्सेनो यतिपतिरभूद्वेत्रसारस्त्रिदण्डः ॥ ३२

लक्ष्यं बुद्धे रसिकरसनालास्यलीलानिदानं
शुद्धास्वादं किमपि जगति श्रोत्रदिव्यौषधं नः ।
लक्ष्यालक्ष्यैः सितजलधिवद्भाति तात्पर्यरत्नै-
र्लक्ष्मीकान्तस्फटिकमुकुरो लक्ष्मणार्योपदेशः ॥ ३३

स्थितिमवधीरयन्त्यतिमनोरथसिद्धिमतीं
यतिपतिसंप्रदायनिरपायधनोपचिताः ।
मधुकरमौलिदघ्नमददन्तुरदन्तिघटा-
करटकटाहवाहिघनशीकरशीभरिताम् ॥ ३४

निरुपधिरङ्गवृत्तिरसिकानभिताण्डवय-
न्निगमविमर्शकेलिरसिकैर्निभृतैर्विधृतः ।
गुणपरिणद्धसूक्तिदृढकोणविघट्टनया
रटति दिशामुखेषु यतिराजयशःपटहः ॥ ३५

इदंप्रथमसंभवत्कुमतिजालकूलङ्कषा
मृषामतविषानलज्वलितजीवजीवातवः ।
क्षरन्त्यमृतमक्षरं यतिपुरन्दरस्योक्तय-
श्चिरंतनसरस्वतीचिकुरबन्धसैरन्ध्रिकाः ॥ ३६

सुधाशनसुदुर्ग्रह श्रुतिसमष्टिमुष्टिन्धयः
कथाहवमसौगतान्कपटसौगतान्खण्डयन् ।
मुनिर्मनसि लक्ष्मणो मुदमुदञ्चयत्यञ्जसा
मुकुन्दगुणमौक्तिकप्रकरशुक्तिभिः सूक्तिभिः ॥ ३७

कपर्दिमतकर्दमं कपिलकल्पनावागुरां
दुरत्ययमतीत्य तद् द्रुहिणतन्त्रयन्त्रोदरम् ।
कुदृष्टिकुहनामुखे निपततः परब्रह्मणः
करग्रहविचक्षणो जयति लक्ष्मणोऽयं मुनिः ॥ ३८

कणादपरिपाटिभिः कपिलकल्पनानाटकैः
कुमारिलकुभाषितैर्गुरुनिबन्धनग्रन्थिभिः ।
तथागतकथाशतैस्तदनुसारिजल्पैरपि
प्रतारितमिदं जगत्प्रगुणितं यतीन्द्रोक्तिभिः ॥ ३९

कथाकलहकौतुकग्रहगृहीतकौतस्कुत-
प्रथाजलधिसंप्लवग्रसनकुम्भसंभूतयः ।
जयन्ति सुधियो यतिक्षितिभृदन्तिकोपासना-
प्रभावपरिपक्त्रिमप्रमितिभारतीसंपदः ॥ ४०

यतीश्वरसरस्वतीसुरभिताशयानां सतां
वहामि चरणाम्बुजं प्रणतिशालिना मौलिना ।
तदन्यमतदुर्मतज्वलितचेतसां वादिनां
शिरस्सु निहितं मया पदमदक्षिणं लक्ष्यताम् ॥४१

भजस्व यतिभूपतेरनिदमादिदुर्वासना-
कदध्वपरिवर्तनश्रमनिवर्तनीं वर्तनीम् ।
लभस्व हृदय स्वयं रथपदायुधानुग्रह-
द्रुतग्रहतिनिस्त्रुटद्दुरितदुर्वृतिनिर्वृतिम् ॥ ४२

कुमतिविहितग्रन्थग्रन्थिप्रभूतमतान्तर-
ग्रहिलमनसः पश्यन्त्वल्पां यतीश्वरभारतीम् ।
विकटमुरभिद्वक्षःपीठीपरिष्करणोचितः
कुलगिरितुलारोहे भावी कियानिव कौस्तुभः ॥४३

स्थविरनिगमस्तोमस्थेयां यतीश्वरभारतीं
कुमतिफणितिक्षोभक्षीबाः क्षिपन्तु भजन्तु वा ।
रसपरिमलश्लाघाघोषस्फुटत्पुटभेदनं
लवणवणिजः कर्पूरार्धं किमित्यभिमन्वते ॥ ४४

वहति महिलामाद्यो वेधास्त्रयीमुखरैर्मुखै-
र्वरतनुतया वामो भागः शिवस्य विवर्तते ।
तदपि परमं तत्त्वं गोपीजनस्य वशंवदं
मदनकदनैर्न क्लिश्यन्ते यतीश्वरसंश्रयाः ॥ ४५

निगमपथिकच्छायाशाखी निराशमहानिधि-
महितविविधच्छात्रश्रेणीमनोरथसारथिः ।
त्रिभुवनतमः प्रत्यूषोऽयं त्रिविद्यशिखामणिः
प्रथयति यतिक्ष्माभृत्पारावरीमविपर्ययाम् ॥ ४६

जडमतिमुधादन्तादन्तिव्यथौषधसिद्धयः
प्रमितिनिधयः प्रज्ञाशालिप्रपालनयष्टयः ।
श्रुतिसुरभयः शुद्धानन्दाभिवर्षुकवारिदा
यमगतिकथाविच्छेदिन्यो यतीश्वरसूक्तयः ॥ ४७

प्रतिकलमिह प्रत्यक्तत्त्वावलोकनदीपिका
यतिपरिबृढग्रन्थाश्चिन्तां निरन्तरयन्ति नः ।
अकलुषपरज्ञानौत्सुक्यक्षुधातुरदुर्दशा-
परिणतफलप्रत्यासीदत्फलेग्रहिसुग्रहाः ॥ ४८

मुकुन्दाङ्घ्रिश्रद्धाकुमुदवनचद्रातपनिभा
मुमुक्षामक्षोभ्यां ददति मुनिबृन्दारकगिरः ।
स्वसिद्धान्तध्वान्तस्थिरकुतुकदुर्वादिपरिष-
द्दिवाभीतप्रेक्षादिनकरसमुत्थानपरुषाः ॥ ४९

निराबाधा बोधायनभणितिनिष्यन्दसुभगा
विशुद्धोपन्यासव्यतिभिदुरशारीरकनयाः ।
अकुण्ठैः कल्पन्ते यतिपतिनिबन्धा निजमुखै-
रनिद्राणप्रज्ञारसधमनिवेधाय सुधियाम् ॥ ५०

विकल्पाटोपेन श्रुतिपथमशेषं विघटयन्
यदृच्छानिर्दिष्टे यतिनृपतिशब्दे विरमति ।
वितण्डाहंकुर्वत्प्रतिकथकवेतण्डपृतना-
वियातव्यापारव्यतिमथनसंरम्भकलहः ॥ ५१

प्रतिष्ठा तर्काणां प्रतिपदमृचांधाम यजुषां
परिष्कारः साम्नां परिपणमथर्वाङ्गिरसयोः ।
प्रदीपस्तत्त्वानां प्रतिकृतिरसौ तापसगिरां
प्रसत्तिं संवित्तेः प्रदिशति यतीशानफणितिः ॥५२

हतावद्ये हृद्ये हरिचरणपङ्केरुहयुगे
निबध्नन्त्यैकान्त्यं किमपि यतिभूभृद्भणितयः ।
शुनासीरस्कन्दद्रुहिणहरहेरम्बहुतभुक्-
प्रभेशादिक्षुद्रप्रणतिपरिहारप्रतिभुवः ॥ ५३

यथाभूतस्वार्था यतिनृपतिसूक्तिर्विजयते
सुधासंदोहाब्धिः सुचरितविपत्तिः श्रुतिमताम् ।
कथादृप्यत्कौतस्कुतकलहकोलाहलहत-
त्रिवेदीनिर्वेदप्रशमनविनोदप्रणयिनी ॥ ५४

श्रुतिश्रेणीचूडापदबहुमते लक्ष्मणमते
स्वपक्षस्थान्दोषान्वितथमतिरारोपयति यः ।
स्वहस्तेनोत्क्षिप्तैः स खलु निजगात्रेषु बहुलं
गलद्भिर्जम्बालैर्गगनतलमालिम्पति जडः ॥ ५५

निरालोके लोके निरुपधिपरस्नेहभरितो
यतिक्ष्माभृद्दीपो यदि न किल जाज्वल्यत इह ।
अहंकारध्वान्तं विजहति कथंकारमनघाः
कुतर्कव्यालौघं कुमतिमतपातालकुहरम् ॥ ५६

यतिक्ष्माभृद्दृष्टंमतमिह नवीनं तदपि किं
ततः प्रागेवान्यद्वद तदपि किं वर्णनिकषे ।
निशाम्यन्तां यद्वा निजमतितिरस्कारविगमा-
न्निरातङ्काष्टङ्कद्रमिडगुहदेवप्रभृतयः ॥ ५७

सुधासारं श्रीमद्यतिवरभुवः श्रोत्रकुहरे
निषिञ्चन्ति न्यञ्चन्निगमगरिमाणः फणितयः।
यदास्वादाभ्यासप्रचयमहिमोल्लासितधियां
सदास्वाद्यं काले तदमृतमनन्तं सुमनसाम् ॥ ५८

यतिक्षोणीभर्तुर्यदिदमनिदंभोगजनता-
शिरः श्रेणीजुष्टं तदिह दृढबन्धं प्रभवति।
अविद्यारण्यानीकुहरविहरन्मामकमनः-
प्रमाद्यन्मातङ्गप्रथमनिगलं पादयुगलम् ॥ ५९

सवित्री मुक्तानां सकलजगदेनः प्रशमनी
गरीयोभिस्तीर्थैरुपचितरसा यामुनमुखैः।
निरुच्छेदा निम्नेतरमपि समाप्लावयति मां
यदृच्छाविक्षेपाद्यतिपतिदयादिव्यतटिनी ॥ ६०

चिन्ताशेषदुरर्थदन्तुरवचःकन्थाशतग्रन्थिलाः
सिद्धान्ता न समिन्धते यतिपतिग्रन्थानुसंधायिनि।
मुक्ताशुक्तिविशुद्धसिद्धतटिनीचूडालचूडापदः
किं कुल्यां कलयेत खण्डपरशुर्मण्डूकमञ्जूषिकाम् ॥ ६१

वन्दे तं यमिनां धुरंधरमहं मानान्धकारद्रुहा
पन्थानं परिपन्थिनां निजदृशा रुन्धानमिन्धानया।
दत्तं येन दयासुधाम्बुनिधिना पीत्वा विशुद्धं पयः
काले नः करिशैलकृष्णजलदः काङ्क्षाधिकं वर्षति ॥ ६२

काषायेण गृहीतपीतवसना दण्डैस्त्रिभिर्मण्डिता
सा मूर्तिर्मुरमर्दनस्य जयति त्रय्यन्तसंरक्षिणी।
यत्प्रख्यापिततीर्थवर्धितधियामभ्यस्यतां यद्गुणा-
नासिन्धोरनिदंप्रदेशनियता कीर्तिः प्रजागर्ति नः ॥ ६३

लिप्से लक्ष्मणयोगिनः पदयुगं रथ्यापरागच्छटा-
रक्षारोपणधन्यसूरिपरिषत्सीमन्तसीमान्तिकम् ।
भिक्षापर्यटनक्षणेषु बिभरांचक्रे गलत्किल्बिषा
यद्विन्यासमिषेण पत्रमकरीमुद्रां समुद्राम्बरा ॥ ६४

नानातन्त्रविलोभितेन मनसा निर्णीतदुर्नीतिभिः
कष्टं कुत्सितदृष्टिभिर्यतिपतेरादेशवैदेशिकैः ।
व्यासो हासपदीकृतः परिहृतः प्राचेतसश्चेतसः
क्लप्तः केलिशुकः शुकः स च मुधाबाधाय बोधायनः ॥ ६५

अर्थ्या तिष्ठति मामिका मतिरसावाजन्मराजन्वती
पत्या संयमिनामनेन जगतामत्याहितच्छेदिना ।
यत्सारस्वतदुग्धसागरसुधासिद्धौषधास्वादिनां
प्रस्वापाय न बोभवीति भगवन्मायामहायामिनी ॥ ६६

शुद्धादेशवशंवदीकृतयतिक्षोणीशवाणीशता-
प्रत्यादिष्टबहिर्गतिः श्रुतिशिरःप्रासादमासीदति ।
दुग्धोदन्वदपत्यसंनिधिसदासामोददामोदर-
श्लक्ष्णालोकनदौर्ललित्यललितोन्मेषा मनीषा मम ॥ ६७

आस्तां नाम यतीन्द्रपद्धतिजुषामाजानशुद्धामति-
स्तच्चाव्याजविदग्धमुग्धमधुरं सारस्वतं शाश्वतम् ।
को वा चक्षुरुदश्चयेदपि पुरः साटोपतर्कच्छटा-
शस्त्राशस्त्रिविहारसंभृतरणास्वादेषु वादेषु नः ॥ ६८

पर्याप्तं पर्यचैषं कणचरणकथामाक्षपादं शिशिक्षे
मीमांसामांसलात्मा समजनिषि मुहुः सांख्ययोगौ समाख्यम् ।
इत्थं तैस्तैर्यतीन्द्रत्रुटितबहुमृषातन्त्रकान्तारपान्थै-
रन्तर्मोहक्षपान्धैरहह किमिह नश्चिन्तनीयं तनीयः ॥ ६९

गाथा ताथागतानां गलति गमनिका कापिली क्वापि लीना
क्षीणा काणादवाणी द्रुहिणहरगिरः सौरभं नारभन्ते ।
क्षामा कौमारिलोक्तिर्जगति गुरुमतं गौरवाद्दूरवान्तं
का शङ्का शङ्करादेर्भजति यतिपतौ भद्रवेदीं त्रिवेदीम् ॥७०

विष्वग्व्यापिन्यगाधे यतिनृपतियशः संपदेकार्णवेऽस्मिन्
श्रद्धाशुद्धावगाहैः शुभमतिभिरसौ वेङ्कटेशोऽभिषिक्तः ।
प्रज्ञादौर्जन्यगर्जत्प्रतिकथकवचस्तूलवातूलवृत्त्या
सप्तत्या सारवत्या समतनुत सतां प्रीतिमेतां समेताम् ॥ ७१

आशामतङ्गजगणानविषह्यवेगान्-
पादे यतिक्षितिभृतः प्रसभं निरुन्धन् ।
कार्यः कथाहवकुतूहलिभिः परेषां
कर्णे स एष कवितार्किकसिंहनादः ॥ ७२

उपशमितकुदृष्टिविप्लवाना-
मुपनिषदामुपचारदीपिकेयम् ।
कवलितभगवद्विभूतियुग्मां
दिशतु मतिं यतिराजसप्ततिर्नः ॥ ७३

करतलामलकीकृतसत्पथाः
श्रुतिवतंसितसूनृतसूक्तयः ।
दिवसतारकयन्ति समत्सरान्
यतिपुरन्दरसप्ततिसादराः ॥ ७४

॥ यतिराजसप्ततिः संपूर्णा ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥
श्रीमते निगमान्तमहादेशिकाय नमः ॥

॥ शरणागतिदीपिका ॥

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

—:०:०:—

पद्मापते स्तुतिपदेन विपच्यमानं
पश्यन्त्विह प्रपदनप्रवणा महान्तः ।
मद्वाक्यसंवलितमप्यजहत्स्वभावं
मान्यं यतीश्वरमहानससंप्रदायम् ॥ १

नित्यं श्रिया वसुधया च निषेव्यमाणं
निर्व्याजनिर्भयदयाभरितं विभाति ।
वेदान्तवेद्यमिह वेगवतीसमीपे
दीपप्रकाश इति दैवतमद्वितीयम् ॥ २

दीपस्त्वमेव जगतां दयिता रुचिस्ते
दीर्घं तमः प्रतिनिवर्त्यमिदं युवाभ्याम् ।
स्तव्यं स्तवप्रियमतः शरणोक्तिवश्यं
स्तोतुं भवन्तमभिलष्यति जन्तुरेषः ॥ ३

पद्माकरादुपगता परिषस्वजे त्वां
वेगासरिद्विहरणा कलशाब्धिकन्या ।
आहुस्तदाप्रभृति दीपसमावभास-
माजानतो मरकतप्रतिमं वपुस्ते ॥ ४

स्वामिन्गभीरसुभगं श्रमहारि पुंसां
माधुर्यरम्यमनघं मणिभङ्गदृश्यम् ।
वेगान्तरे वितनुते प्रतिबिम्बशोभा
लक्ष्मीसरः सरसिजाश्रयमङ्गकं ते ॥ ५

आविश्य धारयसि विश्वममुष्य यन्ता
शेषी श्रियः पतिरशेषतनुर्निदानम् ।
इत्यादिलक्षणगणैः पुरुषोत्तमं त्वां
जानाति यो जगति सर्वविदेष गीतः ॥ ६

विश्वं शुभाश्रयवदीश वपुस्त्वदीयं
सर्वा गिरस्त्वयि पतन्ति ततोऽसि सर्वः ।
सर्वे च वेदविधयस्त्वदनुग्रहार्थाः
सर्वाधिकस्त्वमिति तत्त्वविदस्तदाहुः ॥ ७

ज्ञानं बलं नियमनक्षमताथ वीर्यं
शक्तिश्च तेज इति ते गुणषट्कमाद्यम् ।
सर्वातिशायिनि हिमोपवनेश यस्मि-
न्नन्तर्गतो जगदिव त्वयि सद्गुणौघः ॥ ८

दीपावभास दयया विधिपूर्वमेत-
द्विश्वं विधाय निगमानपि दत्तवन्तम् ।
शिष्यायिताः शरणयन्ति मुमुक्षवस्त्वा-
माद्यं गुरुं गुरुपरंपरयाधिगम्यम् ॥ ९

सत्तास्थितिप्रयतनप्रमुखैरुपात्तं
स्वार्थं सदैव भवता स्वयमेव विश्वम् ।
दीपप्रकाश तदिह त्वदवाप्तये त्वा-
मव्याजसिद्धमनपायमुपायमाहुः ॥ १०

भोग्यं मुकुन्द गुणभेदमचेतनेषु
भोक्तृत्वमात्मनि निवेश्य निजेच्छयैव ।
पाञ्चालिकाशुकविभूषणभोगदायी
सम्राडिवात्मसमया सह मोदसे त्वम् ॥ ११

त्वां मातरं च पितरं सहजं निवासं
सन्तः समेत्य शरणं सुहृदं गतिं च ।
निःसीमनित्यनिरवद्यसुखप्रकाशं
दीपप्रकाश सविभूतिगुणं विशन्ति ॥ १२

जन्तोरमुष्य जनने विधिशम्भुदृष्टौ
रागादिनेव रजसा तमसा च योगः ।
द्वैपायनप्रभृतयस्त्वदवेक्षितानां
सत्त्वं विमुक्तिनियतं भवतीत्युशन्ति ॥ १३

कर्मस्वनादिविषमेषु समो दयालुः
स्वेनैव क्लृप्तमपदेशमवेक्षमाणः ।
स्वप्राप्तये तनुभृतां त्वरसे मुकुन्द
स्वाभाविकं तव सुहृत्त्वमिदं गृणन्ति ॥ १४

निद्रायितान्निगमवर्त्मनि चारुदर्शी
प्रस्थानशक्तिसहितान्प्रतिबोध्य जन्तून् ।
जीर्णस्तनंधयजडान्धमुखानिवास्मा
न्नेतुं मुकुन्द यतसे दयया सहत्वम् ॥ १५

भक्तिः प्रपत्तिरथ वा भगवंस्तदुक्ति
स्तन्निष्टसंश्रय इतीव विकल्प्यमानम् ।
यत्किंचिदेकमुपपादयता त्वयैव
त्रातास्तरन्त्यवसरे भविनो भवाब्धिम् ॥ १६

नानाविधैरकपटैरजहत्स्वभावै-
रप्राकृतैर्निजविहारवशेन सिद्धैः ।
आत्मीयरक्षणविपक्षविनाशनार्थैः
संस्थापयस्यनघजन्मभिराद्यधर्मम् ॥ १७

निम्नोन्नतानि निखिलानि पदानि गाढं
मज्जन्ति ते महिमसागरशीकरेषु ।
नीरन्ध्रमाश्रयसि नीचजनांस्तथापि
शीलेन हन्त शिशिरोपवनेश्वर त्वम् ॥ १८

काशीवृकान्धकशरासनबाणगङ्गा-
संभूतिनामकृतिसंवदनाद्युदन्तैः ।
स्वोक्त्यम्बरीषभयशापमुखैश्च शंभुं
त्वन्निम्नमीक्षितवतामिह कः शरण्यः ॥ १९

क्वासौ विभुः क्व वयमित्युपसत्तिभीतान्
जन्तून्क्षणात्त्वदनुवृत्तिषु योग्ययन्ती ।
संप्राप्तसद्गुरुतनो समये दयालो-
रात्मावधिर्भवति संस्कृतधीः क्षणं ते ॥ २०

योग्यं यमैश्च नियमैश्च विधाय चित्तं
सन्तो जितासनतया स्ववशासुवर्गाः ।
प्रत्याहृतेन्द्रियगणाः स्थिरधारणास्त्वां
ध्यात्वा समाधियुगलेन विलोकयन्ति ॥ २१

पद्माभिरामवदनेक्षणपाणिपादं
दिव्यायुधाभरणमाल्यविलेपनं त्वाम् ।
योगेन नाथ शुभमाश्रयमात्मवन्तः
सालम्बनेन परिचिन्त्य न यान्ति तृप्तिम् ॥ २२

मानातिलङ्घिसुखबोधमहाम्बुराशौ
मग्नाखिसीमरहिते भवतः स्वरूपे ।
तापत्रयेण विहतिं न भजन्ति सन्तः
संसारघर्मजनितेन समाधिमन्तः ॥ २३

धीसंस्कृतान्विदधतामिह कर्मभेदान्
शुद्धं जिते मनसि चिन्तयतां स्वमेकम् ।
त्वत्कर्मसक्तमनसामपि चापरेषां
सूते फलान्यभिमतानि भवान्प्रसन्नः ॥ २४

उद्बाहुभावमपहाय यथैव सर्वः
प्रांशु फलार्थमभियाचति योगिचिन्त्य ।
एवं सुदुष्करमुपायगणं विहाय
स्थाने निवेशयति तस्य विचक्षणस्त्वाम् ॥ २५

नित्यालसार्हमभयं निरपेक्षमन्यै-
र्विश्वाधिकारमखिलाभिमतप्रसूतिम् ।
शिक्षाविशेषसुभगं व्यवसायसिद्धाः ।
सत्कुर्वते त्वयिमुकुन्द षडङ्गयोगम् ॥ २६

त्वत्प्रातिकूल्यविमुखाः स्फुरदानुकूल्याः
कृत्वा पुनः कृपणतां विगतातिशङ्काः ।
स्वामिन्भव स्वयमुपाय इतीरयन्त-
स्त्वय्यर्पयन्ति निजभारमपारशक्तौ ॥ २७

अर्थान्तरेषु विमुखानधिकारहानेः
श्रद्धाधनांस्त्वदनुभूतिविलम्बभीतान् ।
दीपप्रकाश लभसे सुचिरात्कृतीव
न्यस्तात्मनस्तव पदे निभृतान्प्रपन्नान् ॥ २८

मन्त्रैरनुश्रवमुखेष्वधिगम्यमानैः
स्वाधिक्रियासमुचितैर्यदि वान्यवाक्यैः ।
नाथ त्वदीयचरणौ शरणं गतानां
नैवायुतायुतकलाप्यपरैरवाप्या ॥ २९

दत्ताः प्रजा जनकवत्तव देशिकेन्द्रैः
पत्याभिनन्द्य भवता परिणीयमानाः ।
मध्ये सतां महितभोगविशेषसिद्ध्यै
माङ्गल्यसूत्रमिव बिभ्रति किंकरत्वम् ॥ ३०

दिव्ये पदे नियतकिंकरताधिराज्यं
दातुं त्वदीयदयया विहिताभिषेकाः ।
आदेहपातमनघः परिचर्यया ते
युञ्जानचिन्त्य युवराजपदं भजन्ति ॥ ३१

त्वां पाञ्चरात्रिकनयेन पृथग्विधेन
वैखानसेन च पथा नियताधिकाराः ।
संज्ञाविशेषनियमेन समर्चयन्तः
प्रीत्या नयन्ति फलवन्ति दिनानि धन्याः ॥ ३२

वर्णाश्रमादिनियतक्रमसूत्रबद्धा
भक्त्या यथार्हविनिवेशितपत्रपुष्पा ।
मालेव कालविहिता हृदयंगमा त्वा-
मामोदयत्यनुपरागधियां सपर्या ॥ ३३

ब्रह्मा गिरीश इतरेऽप्यमरा य एते
निर्धूय तान्निरयतुल्यफलप्रसूतीन् ।
प्राप्तुं तवैव पदपद्मयुगं प्रतीताः
पातिव्रतीं त्वयि वहन्ति परावरज्ञाः ॥ ३४

नाथ त्वदिष्टविनियोगविशेषसिद्धं
शेषत्वसारमनपेक्ष्य निजं गुणज्ञाः ।
भक्तेषु ते वरगुणार्णव पारतन्त्र्या-
द्दास्यं भजन्ति विपणिव्यवहारयोग्यम् ॥ ३५

सद्भिस्त्वदेकशरणैर्नियतं सनाथाः
सर्पादिवत्त्वदपराधिषु दूरयाताः ।
धीरास्तृणीकृतविरिञ्चिपुरंदराद्याः
कालं क्षिपन्ति भगवन्करणैरवन्ध्यैः ॥ ३६

वागादिकं मनसि तत्पवने स जीवे
भूतेष्वयं पुनरसौ त्वयि तैः समेति ।
साधारणोत्क्रमणकर्म समाश्रितानां
यन्त्रा मुकुन्द भवतैव यथा यमादेः ॥ ३७

सव्यान्ययोरयनयोर्निशि वासरे वा
संकल्पितायुरवधीन्सपदि प्रपन्नान् ।
हार्दः स्वयं निजपदे विनिवेशयिष्य-
न्नाडीं प्रवेशयसि नाथ शताधिकां त्वम् ॥ ३८

अर्चिर्दिनं विशदपक्ष उदक्प्रयाणं
संवत्सरो मरुदशीतकरः शशाङ्कः ।
सौदामनी जलपतिर्वलजित्प्रजेश
इत्यातिवाहिकसखो नयसि स्वकीयान् ॥ ३९

त्वच्छेषवृत्त्यनुगुणैर्महितैर्गुणौघै
राविर्भवत्ययुतसिद्धनिजस्वरूपे ।
त्वल्लक्षणेषु नियतेष्वपि भोगमात्रे
साम्यं भजन्ति परमं भवता विमुक्ताः ॥ ४०

इत्थं त्वदेकशरणैरनघैरवाप्ये
त्वत्किंकरत्वविभवे स्पृहयापराध्यन् ।
आत्मा ममेति भगवन्भवतैव गीता
वाचो निरीक्ष्य भरणीय इह त्वयाहम् ॥ ४१

पद्मामहीप्रभृतिभिः परिमुक्तभूम्नः
का हानिरत्र मयि भोक्तरि ते भवित्री ।
दुष्येत्किमङ्घ्रितटिनी तव देवसेव्या
दुर्वारतर्षचपलेन शुनावलीढा ॥ ४२

सत्वानि नाथ विविधान्यभिसंजिघृक्षोः
संसारनाट्यरसिकस्य तवास्तु तृप्त्यै ।
प्रत्यक्पराङ्मुखमतेरसमीक्ष्य कर्तुः
प्राचीनसज्जनविडम्बनभूमिका मे ॥ ४३

कर्तव्यमित्यनुकलं कलयाम्यकृत्यं
स्वामिन्नकृत्यमिति कृत्यमपि त्यजामि ।
अन्यद्व्यतिक्रमणजातमनन्तमर्थ
स्थाने दया भवतु ते मयि सार्वभौमी ॥ ४४

यं पूर्वमाश्रितजनेषु भवान् यथाव-
द्धर्मं परं प्रणिजगौ स्वयमानृशंस्यम् ।
संस्मारितस्त्वमसि तस्य शरण्यभावा-
न्नाथ त्वदात्तसमया ननु मादृशार्थम् ॥ ४५

त्राणं भवेति सकृदुक्तिसमुद्यतानां
तैस्तैरसह्यवृजिनैरुदरंभरिस्ते ।
सत्यापिता शतमखात्मजशंकरादौ
नाथ क्षमा न खलु जन्तुषु मद्विवर्जम् ॥ ४६

कर्मादिषु त्रिषु कथां कथमप्यजानन्-
कामादिमेदुरतया कलुषप्रवृत्तिः ।
साकेतसंभवचराचरजन्तुनीत्या
वीक्ष्यः प्रभो विषयवासितयाप्यहं ते ॥ ४७

ब्रह्माण्डलक्षशतकोटिगणाननन्ता-
नेकक्षणे विपरिवर्त्य विलज्जमानाम् ।
मत्पापराशिमथने मधुदर्पहन्त्रीं
शक्तिं नियुङ्क्ष्व शरणागतवत्सल त्वम् ॥ ४८

आस्तां प्रपत्तिरिह देशिकसाक्षिका मे
सिद्धा तदुक्तिरनघा त्वदपेक्षितार्था ।
न्यस्तस्य पूर्वनिपुणैस्त्वयि नन्विदानीं
पूर्णे मुकुन्द पुनरुक्त उपाय एषः ॥ ४९

यद्वा मदर्थपरिचिन्तनया तवालं
संज्ञां प्रपन्न इति साहसिको बिभर्मि ।
एवं स्थिते त्वदपवादनिवृत्तये मां
पात्रीकुरुष्व भगवन्भवतः कृपायाः ॥ ५०

त्यागे गुणेश शरणागतसंज्ञिनो मे
स्त्यानागसोऽपि सहसैव परिग्रहे वा ।
किं नाम कुत्र भवतीति कृपादिभिस्ते
गूढं निरूपय गुणेतरतारतम्यम् ॥ ५१

स्वामी दयाजलनिधिर्मधुरः क्षमावान्
शीलाधिकः श्रितवशः शुचिरत्युदारः ।
एतानि हातुमनघो न किलार्हसि त्वं
विख्यातिमन्ति विरुदानि मया सहैव ॥ ५२

वेलाधनंजयरथादिषु वाचिकैः स्वै-
राघोषितामखिलजन्तुशरण्यतां ते ।
जानन्दशाननशतादधिकागसोऽपि
पश्यामि दत्तमभयं स्वकृते त्वया मे ॥ ५३

रक्ष्यस्त्वया तव भरोऽस्म्यहमित्यपूर्वान्-
वर्णानिमानहृदयानपि वाचयित्वा ।
मद्दोषनिर्जितगुणो महिषीसमक्षं
मा भूस्त्वदन्य इव मोघपरिश्रमस्त्वम् ॥ ५४

मुख्यं च यत्प्रपदनं स्वयमेव साध्यं
दातव्यमीश कृपया तदपि त्वयैव ।
तन्मे भवच्चरणसङ्गवतीमवस्थां
पश्यन्नुपायफलयोरुचितं विधेयाः ॥ ५५

अल्पास्थिरैरसुकरैरसुखावसानै-
र्दुःखान्वितैरनुचितैरभिमानमूलैः ।
प्रत्यक्परागनुभवैः परिघूर्णितं मां
त्वय्येव नाथ चरितार्थय निर्विविक्षुम् ॥ ५६

तत्त्वावबोधशमितप्रतिकूलवृत्तिं
कैंकर्यलब्धकरणत्रयसामरस्यम् ।
कृत्वा त्वदन्यविमुखं कृपया स्वयं मां
स्फातिं दृशोः प्रतिलभस्व जगज्जनन्याः ॥ ५७

इत्थं स्तुतिप्रभृतयो यदि संमताः स्यु
र्यद्वापराधपदवीष्वभिसंविशन्ति ।
स्तोकानुकूल्यकणिकावशवर्तिनस्ते
प्रीतिक्षमाप्रसरयोरहमस्मि लक्ष्यम् ॥ ५८

स्नेहोपपन्नविषयः स्वदशाविशेषाद्
भूयस्तमिस्रशमनीं भुवि वेङ्कटेशः ।
दिव्यां स्तुतिं निरमिमीत सतां नियोगात्
दीपप्रकाशशरणागतिदीपिकाख्याम् ॥ ५९

—०—

॥ शरणागतिदीपिका संपूर्णा ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

श्रीमद्वेदान्तदेशिकमंगलाशासनम्

—:०:०:—

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

श्रीमल्लक्ष्मणयोगीन्द्रं, सिद्धान्तविजयध्वजम् ।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥

सर्वतन्त्रस्वतन्त्राय सिंहाय कविवादिनाम् ।
वेदान्ताचार्यवर्याय वेङ्कटेशाय मङ्गलम् १

नभस्यमासिश्रोणायामवतीर्णाय सूरये ।
विश्वामित्रान्वयायास्तु वेङ्कटेशाय मङ्गलम् २

पिता यस्याऽनन्तसूरिः पुण्डरीकाक्षयज्वनः ।
पौत्रो यस्तनयस्तोता-रम्बायास्तस्य मङ्गलम् ३

वेङ्कटेशावतारोऽयं तद्घण्टांशोऽथवा भवेत् ।
यतीन्द्रांशोऽथवेत्येवं वितर्क्यायास्तु मङ्गलम् ४

श्रीभाष्यकारः पन्थानमात्मना दर्शितं पुनः ।
उद्धर्त्तुमागतो नून-मित्यूह्यायाऽस्तु मङ्गलम् ५

यो बाल्ये वरदार्यस्य प्राचार्यस्य परां दयाम् ।
अवाप्य वृद्धिं गमित स्तस्मै योग्याय मङ्गलम् ६

रामानुजार्यादात्रेयान्मातुलात्सकलाः कलाः ।
अवाप विंशत्यब्दे यस्तस्मै प्राज्ञाय मङ्गलम् ७

श्रुतप्रकाशिका भूमौ येनादौ परिरक्षिता ।
प्रवर्त्तिता च पात्रेषु तस्मै श्रेष्ठाय मङ्गलम् ८

साँस्कृतीभिर्द्राविडीभिर्बह्वीभिः कृतिभिर्जनान् ।
यः समुज्जीवयामास तस्मै सेव्याय मंगलम् ६

यः ख्यातिलाभपूजासु विमुखो वैष्णवे जने ।
क्रयणीयदशां प्राप्तस्तस्मै भव्याय मङ्गलम् १०

यस्मादेव मया सर्वं शास्त्रमग्राहि नान्यतः ।
तस्मै वेङ्कटनाथाय मम नाथाय मंगलम् ॥ ११

पित्रे ब्रह्मोपदेष्ट्रे मे गुरवे दैवताय च ।
प्राप्याय प्रापकायास्तु वेङ्कटेशाय मंगलम् ॥ १२

यः कृतं वरदार्येण वेदान्ताचार्यमंगलम् ।
आशास्तेऽनुदिनं सोपि भवेन्मंगलभाजनम् ॥ १३

भाद्रपदमासगतविष्णुविमलर्क्षे
वेङ्कटमहीध्रपतितीर्थदिनभूते ।
प्रादुरभवज्जगति दैत्यरिपुघण्टा
हन्त कवितार्किकमृगेन्द्रगुरुमूर्त्या ॥ १४

सशङ्खचक्रलाञ्छनः सदूर्ध्वपुण्ड्रमण्डितः
सकण्ठलग्नसत्तुलस्यनर्घपद्ममालिकः ।
सितान्तरीयसोत्तरीययज्ञसूत्रशोभितो
ममाविरस्तु मानसे गुरुस्स वेङ्कटेश्वरः ॥ १५

अनन्तसूरिसनवेऽभिनन्द्यमानवैभवा-
द्दिगन्तवादिहंसजैत्रकालमेघदेशिकात् ।
उपात्तसर्वशासनाय हन्त वर्षविंशतौ
पुनः पुनर्नमस्क्रियाऽस्तु वेङ्कटेशसूरये ॥ १६

गुरौ वादिहंसाम्बुदाचार्यशिष्ये
    जना भक्तिहीना यतीन्द्राप्रियाः स्युः ।
यतीन्द्राऽप्रिया विष्णुकारुण्यदूराः
    कुतो मुक्तिवार्त्ता हि तादृग्विधानाम् ॥ १७

कवितार्किककलभव्रजकवलीकृतिसिंहं
    कमलापतिकरुणारसपरिवर्द्धितबोधम् ।
यतिनायक पदपङ्कजयुगलीपरतन्त्रं
    भज मानस ! बुधवेङ्कटपतिदेशिकमनिशम् ॥ १८

वेदे सञ्जातखेदे मुनिजनवचने प्राप्तनित्यावमाने
    सङ्कीर्णे सर्ववर्णे सति तदनुगुणे निष्प्रमाणे पुराणे ।
मायावादे समोदे कलिबलवशतश्शून्यवादे विवादे
धर्मत्राणाय योऽभूत्स जयतु भगवान्विष्णुघण्टावतारः ॥ १९

॥ श्री मद्वेदान्तदेशिकमङ्गलाशासनं सम्पूर्णम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः ॥

श्रीमते रामानुजाय नमः

श्रीमद्वेदान्तदेशिकप्रपत्तिः

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् ।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥

विद्वन्मतङ्गजशिखाभरणायमानौ,
विश्वातिशायिमहिमाम्बुनिधानभूतौ ।
विद्वेषिवादिमुकुटीकृतकुट्टनौ तौ
वेदान्तसूरिचरणौ शरणं प्रपद्ये ॥ १

विश्वम्भरामतितरामपि भावयन्तौ
विन्यासतो विविधसज्जनतानुभाव्यौ ।
विस्तारसंसृतिमहार्णवकर्णधारौ
वेदान्त सूरिचरणौ शरणं प्रपद्ये ॥ २

विश्वन्तरान्धतमसक्षपण प्रवीणौ
विद्योतमाननखरेन्दुमयूखजालैः ।
विख्याततामरसशङ्खरथाङ्गचिन्हौ
वेदान्तसूरिचरणौ शरणं प्रपद्ये ॥ ३

विद्वेषमानमदमत्सरविद्विषौ यौ
विष्णवालयानुगमनोत्तमनित्यकृत्यौ ।
वेदान्तवृद्धविहिताञ्जलिगोचरौ तौ
वेदान्तसूरिचरणौ शरणं प्रपद्ये ॥ ४

विष्णवर्पितात्मजनभाग्यविपाकभूतौ
विभ्राजमाननवकोकनदानुकल्पौ ।
वेषान्तरोपगतपल्लवतल्लजौ तौ
वेदान्तसूरिचरणौ शरणं प्रपद्ये ५

वेधोमुखैरपि सुरैर्विहितप्रणामौ
वेलातिलङ्घिसुषुमासुकुमारभावौ ।
विस्मेरकेसरलसन्मृदुलाङ्गुलीकौ
वेदान्तसूरिचरणौ शरणं प्रपद्ये ॥ ६

विद्रावितोद्भटविकाररजोगुणौ तौ
विख्यातभूरिविभवेन रजःकणेन ।
विश्वोपकारकरणाय कृतावतारौ
वेदान्तसूरिचरणौ शरणं प्रपद्ये ॥ ७

विष्णवङ्घ्रिनिर्गतसरित्प्रवरानुभावौ
विद्याविनीतजनितैर्विमलैस्वतीर्थैः ।
व्यानम्रशिष्यजनरक्षणजागरूकौ
वेदान्तसूरिचरणौ शरणं प्रपद्ये ॥ ८

वीथीषु रङ्गनगरे कृतचङ्क्रमौ तौ
विष्णूत्सवेषु विधिवासवसेवितेषु ।
विद्याविनीतजनताविहितानुसारौ
वेदान्तसूरिचरणौ शरणं प्रपद्ये ॥ ९

विश्वासविष्णुपदभक्तिविरक्तिशून्यं
विभ्रष्टकृत्यमपि मां विषयेषु सक्तम् ।
विद्वत्सभानुगतियोग्यमिहादधानौ
वेदान्तसूरिचरणौं शरणं प्रपद्ये ॥ १०

—०—

इति श्रीनयिनाराचार्यविरचिता श्रीमद्वेदान्त
देशिकप्रपत्तिः सम्पूर्णा ॥

॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

श्रीमद्वेदान्तदेशिकदिनचर्यास्तोत्रम्

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् ।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥

काञ्चीपुरी यस्य हि जन्मभूमि
विहारभूर्वेङ्कटभूधरेन्द्रः ।
वासस्थली रङ्गपुरी तमीड्यं
श्रीवेङ्कटेशं गुरुमाश्रयामः ॥ १

सम्भावना यस्य हि कालकूट-
स्सभा भुजङ्गी कुणपं तरुण्यः ।
स्याद्रौरवं राजगृहं स जीया-
च्चिरं गुरुर्वेङ्कटनाथनामा ॥ २

यः प्रातरभ्येत्य हरिं शुचीनि
द्रव्याण्युपादाय शुचिः कृतेज्यः ।
स्वाध्याययुक्तो निशि योगरूपां
निद्रां समारोहति तं नतास्स्मः ॥ ३

यामे तुरीये यतवाग्रजन्या
विहाय शय्यां विहताङ्घ्रिशुद्धिः ॥
योऽत्यादरेणास्थितयोगशेष-
स्तं वेङ्कटेशं गुरुमानमामः ॥ ४

ततोऽनुसन्धाय ततिं गुरूणां
तञ्चापि देवं रमणं रमायाः ।
तत्कालयोग्यानि तथाविधानि
हृद्यानि पद्यानि पठन्तमीडे ॥ ५

उत्थाय गेहादुपगम्य रम्यां
  कवेरकन्यां कलिताङ्घ्रिशुद्धिः ।
ततो विशोध्याप्सु निमज्ज्य शुभ्रं
  वस्त्रं वसानं तमहं स्मरामि ॥ ६

धृत्वोर्ध्वपुण्ड्राणि सरोजबीज
  मालामवन्ध्यां समुपास्य संध्याम् ।
सावित्रमीशं सवितुः पुरस्तात्-
  स्तुवन्तमेकाग्रधिया स्तुवे तम् ॥ ७

ततः सुपूर्वाह्णिकनित्यकर्म
  निर्वर्त्य नित्येष्टनिवृत्तिमार्गः
श्रीरङ्गधामोपसमेत्य सेवा-
  क्रमेण रङ्गेश्वरपादमूलम् ॥ ८

प्राबोधिकीभिः प्रतिबोध्य गीर्भिः
  प्रसाद्य तङ्घ्रमुखैः प्रबन्धैः ।
आशास्य तन्मङ्गलमाप्तवाक्यै
  रापादचूडं कलयन्तमीडे ॥ ९

तीर्थप्रसादादिकमत्र लब्ध्वा
  विज्ञाप्य देवाय ततो विसृष्टः ।
शनैरुपेत्याश्रमकल्पमात्म
  गेहं सुखासीनमहं स्मरामि ॥ १०

व्याख्यानशालामुपगम्य चाथो
  शिष्याननन्यान् श्रवणाभिमुख्यान् ।
संग्राहयन्तं सकलानि तन्त्रा-
  ण्यतन्द्रितं तं गुरुमाश्रयेऽहम् ॥ ११

तास्संस्कृतद्राविडदिव्यसूक्तीः
प्रसन्नगम्भीरतया प्रसिद्धाः ।
तत्तद्रुचिभ्यस्तनयाविशेषं
प्रणौमि दान्तं प्रतिपादयन्तम् ॥ १२

शिष्यैरुपादानपरैरनन्यैः
समर्पितं भक्तिपुरस्सरं यत् ।
तेनैव शुद्धेन यथोदितेन
तुष्यन्तमीडे तुषतुल्यरुक्मम् ॥ १३

इत्थं ह्युपादाय च शास्त्रशिक्षां
ताञ्याप्युपादानपदे निवेश्य ।
माध्याह्निकं कर्म समाप्य पश्चा-
द्वन्देयजन्तं वरदं सदारम् ॥ १४

अतस्करग्राह्यपवित्रपात्रै-,
रनिन्द्रियोन्मादकरैर्हविर्भिः ।
आराध्य देवं कमलासहाय-
माराधये तं विहितानुयागम् ॥ १५

यामे चतुर्थे निहतारिवर्ग-
प्रबन्धनिर्माणविलोकनाद्यैः ।
तथा पुराणाद्यवलोकनैश्च
कालं क्षिपन्तं कलये गुरुं तम् ॥ १६

सायन्तनं कर्म समाप्य पश्चात्-
समेत्य च श्रीवरदाह्वयस्य ।
सहान्तरङ्गैः कुलदैवतस्य
समीपमारात्प्रणतं स्मरामि ॥ १७

आशास्य चास्मै बहुमङ्गलानि
तैस्तैः प्रबन्धैश्च तदीयपङ्क्तीः ।
स्तुत्वैकतानं प्रतिगृह्य तीर्थं
प्रसादमेनं कृतकृत्यमीडे ॥ १८

अथान्तरङ्गैरुपदेवगेह-
मध्यास्य पीठं सरसैर्वचोभिः ।
तेषां सुसूक्ष्मार्थविशेषशिक्षां
कुर्वाणमीडीमहि वेङ्कटेशम् ॥ १९

शिष्याननुज्ञाप्य सुसूक्ष्मबुद्धीन्-
कृतप्रणामान्कृपया गृहेभ्यः ।
अध्यास्य शुद्धं शमनीयमत्र
योगाय सन्नद्धमहं स्मरामि ॥ २०

हृत्पुण्डरीके वरदं सदारं
निवेश्य तत्पादसरोजयुग्मे ।
आबद्ध्य चित्तं सुसुखं शयान-
माराधये देशिकमस्मदीयम् ॥ २१

योगस्वरूपामनुभूय निद्रां
यामे तुरीये प्रतिबुध्य भूयः ।
स्वस्वामिभावाकलनात्मयोगं
भजे भजन्तं गुरुवेङ्कटेशम् ॥ २२

इत्येवमेतामिह सर्वतन्त्र-
स्वतन्त्रवेदान्तगुरुत्तमस्य ।
नित्याभिजप्यां शुभनित्यचर्यां
जपन्ति ये ते दुरितं तरन्ति ॥ २३

—: ० :—

इति श्रीनयिनाराचार्यकृतिषु श्रीमद्वेदान्तदेशिक-
दिनचर्यास्त्रोत्रं मम्पूर्णम् ।

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवेनमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः ॥

——:०:०:——

सप्ततिरत्नमालिका

वेदान्तदेशिककटाक्षविवृद्धबोधविद्वज्जनेड्यवरदार्य दयैकपात्रम् ।
तत्सूक्तिलेशविभवात्तसमस्ततत्वं भक्त्या भजामि परवादिभयङ्करार्यम्

—:०:—

जीवनं जगतां जीयात् किमप्यपगतस्पृहम् ।
स्वतन्त्रं सर्वतन्त्रेषु वेङ्कटेशाह्वयं महः ॥ १

शोश्रूयमाणा यच्छब्दं कवितार्किक कुञ्जराः ।
स्वप्ने प्रसुप्त्युर्नित्यं सिंहं कमपि तं भजे ॥ २

श्रीमतां हरिदासानां पादरक्षावलम्बिना ।
तेन वेङ्कटनाथेन सनाथास्सुखिनोवयम् ॥ ३

वेदान्तदेशिकपदं यस्मै श्रीरङ्गशायिना ।
दत्तं तस्मै नमस्कुर्मो वेङ्कटेशविपश्चिते ॥ ४

दक्षिणोत्तरदेशीय सूक्त्या वरददेशिकः ।
यस्मादजनि सोदर्यस्त स्मान्नान्यागतिर्मम ॥ ५

ज्ञानं तु विनयो भक्तिस्संपत्तिर्वीतरागता ।
आरोग्यं यस्य तस्यास्मि दासो वेदान्तसद्गुरोः ॥ ६

यस्मिन्ननन्यसामान्या वेदान्ताचार्यता गुरौ ।
यथा पुरुषता विष्णौतस्मिन्न्यस्तभरोस्म्यहम् ॥ ७

सर्वतन्त्रस्वतन्त्रत्वात् शास्त्रदीपप्रदानतः ।
श्रीवेङ्कटाद्रिनाथोऽसौ साक्षाद्वेदान्तदेशिकः ॥ ८

आविर्मूर्तिर्यस्य वंशादनर्घात्
वैश्वामित्राद्विष्णुघण्टांशकस्य ।
श्रीमान् सोऽयं सर्वतन्त्रस्वतन्त्रो
वक्ता व्याख्यासार्वभौमो विभाति ॥ ९

भाद्रपदमासगतविष्णुविमलर्क्षे
वेङ्कटमहीध्रपतितीर्थदिनभूते ।
प्रदुरभवज्जगति दैत्यरिपु घण्टा
हन्तकवितार्किकमृगेन्द्रगुरुमूर्त्या ॥ १०

तमिमं श्रीमद्वेङ्कट-
नाथाचार्यं वदन्ति किलसन्तः ।
श्रीवेङ्कटाद्रिनाथं
सदसद्गुणराशियोगहानिभ्याम् ॥ ११

श्रीभाष्यं विरचय्यसंयमिवरो जित्वा स्वयं वादिनो
बाह्यांश्चापि कुदृष्टिकान् भुवि पुनर्भाष्यप्रतिष्ठाशया ।
श्रीमद्वेङ्कटनाथदेशिकशिरोरत्नात्मनाविर्बभा-
वित्येवं च वदन्ति हन्त कतिनस्त्रैकालिकज्ञानिनः ॥ १२

अवनाय सतामसद्गुण-
प्रबलाटोपनिवर्हणाय च ।
अपिवैष्णवधर्मवृद्धये
जननं श्रीनिगमान्तसद्गुरोः ॥ १३

यद्ययं हि कवितार्किकसिंहो
नाभविष्यदिह भुव्यवतीर्णः ।
तर्हि बाह्यकुदृगुद्धतपक्षैः
मेदिनी परिवृता ह्यभविष्यत् ॥ १४

वेङ्कटेश्वरविपाश्चिति जाते
निस्सपत्नमभवत्किल भाष्यम् ।
तत्त्वमप्रतिहतं च तदासी-
द्येन मोक्षपदवी सुखलभ्या ॥ १५

पुत्रोऽनन्तार्यसूरेः पुरुषसमगुणः पुण्डरीकाक्षयज्वः
पौत्रस्तोतारभिख्याश्रुतवरजननीगर्भवाराशिचन्द्रः ।
विश्वामित्रान्ववायो वरदगुरुपिता वादिहंसाम्बुवाहा-
दाचार्यादाप्तशास्त्रो वरदगुरुमतस्सर्वतन्त्रस्वतन्त्रः ॥ १६

अनन्तसूरिसूनवेऽभिनन्द्यमानवैभवात्
दिगन्तवादिहंसजैत्रकालमेघदेशिकात् ।
उपात्तसर्वशासनाय हन्त वर्षविंशतौ
पुनः पुनर्नमस्क्रियास्तु वेङ्कटेशसूरये ॥ १७

वेदान्ताचार्यवर्यो विदितबहुगुणो वीतरागाग्रयायी
विद्वान् विद्यानिषद्याविरचितविविधानेकदिव्यप्रबन्धः ।
विष्णौ विष्ण्वाश्रितेषु प्रकटितविनयप्रेमशेषत्ववृत्तिः
विख्यातः श्रेयसे स्याद्विषयजिदिह नो वेङ्कटाचार्यवर्यः ॥ १८

यः संस्कृतकवितायां
प्रौढिम्नान्वेति कूरनाथसुतम् ।
द्राविडकवितामार्गे
परकालं वाथ भक्तिसारं वा ॥ १९

परश्शतं वापि परस्सहस्रं
श्रीवेङ्कटाचार्यकृताः प्रबन्धाः ।
तत्रालमेकः खलु भुक्तिमुक्त्योः
कात्स्न्येन कस्तान् गणयेत्समस्तान् ॥ २०

यदीयचरितं सतां सुचरितव्यवस्थापकं
यदीयवचनं परं सकलसंशयोन्मूलनम् ।
यदीयकरुणागतिस्सकलधर्मशून्यात्मनां
स नश्शरणमस्त्वसौ सकलतन्त्रनिर्वाहकः ॥ २१

दान्तिश्शान्तिश्शुचित्वं विषयविजयिता धीरता निस्पृहत्वं
शेषत्वं श्रीशतद्दासजनविषयकं पारतन्त्र्यं च तत्र ॥
अक्षोभ्यत्वं पटुत्वं मृदु समवशितानिर्भिरत्वानसूये
यस्मिन्नाजानसिद्धं स खलुविजयते वेङ्कटाचार्यवर्यः २२

कलये सततं करुणाजलधिं
करुणाविषयं कमलाधिपतेः ॥
कलिवैरिशठारिवचोरसिकं
कवितार्किककेसरिसूरिगुरुम् ॥ २३

सरोभूतवेतालसारस्वतानां
शठद्विट्कलिध्वंसिमुख्योदितानाम् ।
अविच्छिन्न सत्सम्प्रदायार्थवेदी
गुरुर्वेङ्कटेशो गुरूक्तिष्वतुल्यः ॥ २४

युक्ता अलूक्षा अपि धर्मकामाः
संमर्शिनो युक्तिसमन्विताश्च ।
सद्ब्राह्मणा वेदशिरः प्रसिद्धाः
श्रीवेङ्कटाचार्यमुखा हि नूनम् ॥ २५

जटावर्ण चर्चाद्यनेकप्रकार
त्रयीलक्षणोच्चारणे व्यासकल्पः ।
तथा कल्पसूत्रप्रयोगाद्यभिज्ञो-
जयत्यन्वहं सर्वतन्त्रस्वतन्त्रः ॥ २६

भरद्वाजशाण्डिल्यहारीतमुख्य
स्मृतिस्तोमसूक्ष्मार्थनिर्णीतिदक्षः ।
पुराणागमादिष्वसाधारण श्री
स्सुतो भाति लोकेष्वनन्तार्यसूरेः ॥ २७

ज्योतिश्छन्दश्शब्दशास्त्रप्रवीणः
काव्यश्रेणीनाटकालङ्कृतिज्ञः ॥
मीमांसाया ब्रह्मकर्मानुगाया
स्रष्टा साक्षात्सर्वतन्त्रस्वतन्त्रः ॥ २८

साङ्ख्ये योगे भाट्टतन्त्रे गुरूक्ते
शैवे जैने शाङ्करे भास्करे च ।
शास्त्रे बौद्धे यादवे गर्वितानां
प्रत्याख्याता सर्वतन्त्रस्वतन्त्रः ॥ २९

सर्वोज्जीवनचिन्तया घटकतां भावेन दानात् कृति-
श्रेष्ठानां बहुशस्तदुद्धरणतस्त्रय्यन्तसंरक्षणात् ।
श्रीमच्छ्रीशठकोपमुख्यदिविषन्नाथार्यरामानुजा-
चार्यानप्यनुयाति हन्तनिगमान्ताचार्यचूडामणिः ॥ ३०

इह रङ्गपतिप्रसादलब्धो-
भयवेदान्तधुरन्धरत्वकीर्तिः ।
अपि तत्सहधर्मिणीकृपात्ता-
खिलतन्त्रप्रभुताक एष सूरिः ॥ ३१

अखिलतन्त्रधुरन्धरता हरेः
त्वयि तु वेङ्कटनाथगुरौ स्थिता ।
विधिशिवादिजनेष्वितरेषु वा
क्वचिदपीह न सा परिदृश्यते ॥ ३२

क्षमायां ह्रियस्योपमानं मुकुन्दः
श्रुतौ तस्य तल्पोमतौ देवमन्त्री ।
जये वैरिणां दैत्यसंहारकारी
सजीयाच्चिरं सर्वतन्त्रस्वतन्त्रः ॥ ३३

आचार्यत्वोपयुक्ता मुनिगणकथिता देशिकैस्स्वेन चोक्ताः
सर्वे भद्रा गुणास्स्युस्समुदितविभवास्सर्वतन्त्रस्वतन्त्रे ।
शिष्यत्वे चोपयुक्ता अपि च गुणगणाः कूरनाथे यथा स्युः
नान्यत्राचार्यवर्गे कतिचन हि गुणाः प्रायशस्तत्र दृष्टाः ॥ ३४

यतिपतिसंप्रदायपरिपोषकस्य
निगमान्त देशिकमणेः ।
अतिपतितामृता सरसता
गुणेन सुमनस्स्रजो मृदुतरा ।
अधिगतलक्षणा विमलसूक्ति-
रार्तिशमनी विपक्षमथनी ।
कलयतु नश्शुभानि भगवत्तदीय-
यतिराजहर्षजननी ॥ ३५

अपि च भवाहिदष्टपरिमूर्छितस्य
भविनः प्रबोधनकरी ।
शमदमदोषभीतिभगवत्तदीय
जनभक्ति मुक्तिजननी ।
विजयपरत्वकोपमदमोहलोभ-
शठतादिदोषशमनी ।
भुविसदृशीतरास्ति नहिसूक्तिरद्य
निगमान्तदेशिकगिरः ॥ ३६

कर्मविचिकित्सा वृत्तविचिकित्सा
धर्मविचिकित्सा सर्वविचिकित्सा ।
शाम्यति हिनूनं सर्वपुरुषाणां
वेङ्कटविपश्चिद्वाग्विलसितेन ॥ ३७

यदुक्तयो यतिपतितन्त्रदीपिकाः
सलक्षणास्सरसतमास्सतां मताः ।
समत्सरैरपि सततं परोक्षतः
प्रशंसिताः परिकलयेत्सनः श्रियम् ॥ ३८

वाणी यस्यद्रामिडी सांस्कृती च
प्रायःप्राचामाशयानन्ववादीत् ।
अर्वाचामप्यास वैयात्यमूलं-
जीयात्सोऽयं सर्वतन्त्रस्वतन्त्रः ॥ ३९

यदीयकृतिषुक्षणं परिचितिस्सतां चातुरीं
तनोति बहुवत्सरश्रममनुस्त्रु तामन्यतः ।
तमद्ययतिभूपति प्रथितसन्मतोद्धारकं
भजे कविकथारतद्विरदबृन्दकण्ठीरवम् ॥ ४०

कविवादिकरिसिंह कृतिरत्नतिलकं
यतिराजवरसप्ततिमिमामनुदिनम् ।
प्रवदन्ति परवादितिमिरौघमिहिराः
त इमे हि यतिराजकरुणैकविषयाः ॥ ४१

वेङ्कटेशविदुषारचितानां
ज्ञायते न गणनापि कृतीनाम् ।
तत्रचापि नहिरङ्गपतिश्री-
पादुकास्तुतिसहस्रसमाऽन्या ॥ ४२

वेङ्कटेश्वरगुरुग्रथितं ये
पादुकास्तुति सहस्रमजस्रम् ।
सार्थबोधमनुसंदधते ते
संयमीन्द्रमतसारविद स्स्युः ॥ ४३

अनन्यसाधारणचातुरी च
काव्यादिषु ब्रह्मविदग्रणीत्वम् ।
तथाष्टभाषा कवितापटुत्वं
संकल्पसूर्योदयदृश्यमस्य ॥ ४४

दूषण्यादौ तार्किकाग्रेसरत्वं
स्पष्टं श्रीमद्वेङ्कटेशस्य सूरेः ।
अन्यालभ्या चातुरी पद्यगुम्भे
सर्वज्ञत्वं तत्त्वमुक्ताकलापे ॥ ४५

कलयतां कवितार्किककेसरि-
प्रकटितां शतदूषणिकांहृदि ।
मशकवत्सुजयाः खलुमायिनः
प्रणिपतन्ति परंपदयोर्मुहुः ॥ ४६

अहह शङ्करयादवभास्कर
ग्रथितदुर्मतदुर्मदवादिनाम् ।
कलकलः कवितार्किककेसरि
प्रथितदूषणिकाश्रवणावधि ॥ ४७

सर्वार्थसिद्धिश्शतदूषणी च
द्वे खेटशस्त्रे कथकाग्रगानाम् ।
आद्येन तत्र क्रियते स्वरक्षा
प्रत्यर्थिभङ्गः कलहेऽन्यतस्स्यात् ॥ ४८

अतएव सर्वजगतांसगुरुः
यति चक्रवर्ति मतमत्तदिग्गजः ।
कवितार्किक द्विरदपञ्चमुखो-
ह्यतऊर्जितं ह्यकृतभाष्यमिदम् ॥ ४९

श्रुतिशीर्षदेशिकशिरोमणिना
जनकेन येन हि सुशिक्षितधीः ।
वरदोगुरुश्च यतिराजमत-
प्रतिवादिकोटिशतकोटिरभूत् ॥ ५०

सर्वतन्त्रधूर्वहस्य वेङ्कटेशधीमतः
कुर्वतेऽवमाननां तु केचनाधुनोद्भवाः ।
हन्त हन्त रामकृष्णदूषणाभिधायिनां
किंनु चित्रमत्र चैद्य रावणानुसारिणाम् ॥ ५१

अपिकाममदलोभ शठतादिरहिता
अपि नीतिधृतिशान्ति मतिदान्ति सहिताः ।
यतिराजमतधुर्यपदपद्मविमुखा
अवलोकनतिमाननुति बाह्यविषयाः ॥ ५२

विमति रथवातेषां युक्तायतीश्वरजीवने
कविकथकपञ्चास्ये देवेसतां च धुरन्धरे ।
परिचिति रहोतन्माहात्म्यप्रकाशकतत्कृति-
ष्वपि लवमिता स्वप्नेप्येषां यतोनहिविद्यते ॥ ५३

न द्रष्टारो वैभवस्यास्य साक्षात्
नैवाभ्यासस्तत्कृतिष्वस्ति येषाम् ।
येषां नित्यं मानसं साभ्यसूयं
तेषां भक्तिस्स्यात्कथं वेङ्कटेशे ॥ ५४

गुरौ वादिहंसाम्बुदाचार्यशिष्ये
जना भक्तिहीना यतीन्द्राप्रियास्युः ।
यतीन्द्राप्रिपा विष्णुकारुण्यदूराः
कुतो मुक्ति वार्ताहिताद्दग्विधानाम् ॥ ५५

निःश्रेयसं येऽभिलषन्ति तस्य
मूलं कृपां चापिरमासखस्य ।
दयां यतीन्द्रस्य हि तैखश्यं
कार्याहि भक्तिः कविवादिसिंहे ॥ ५६

सेवा विष्णोर्वैष्णवाराधनान्ता
तद्वत्सेवा स्वामिन स्संयमीनाम् ।
वेदान्ताचार्याङ्घ्रिपद्मार्चनान्ता
यस्मादात्मा वेङ्कटेशस्य सूरेः ॥ ५७

कर्माद्युपायाइहकेचनस्युः
केचिच्चलक्ष्मीरमणाङ्घ्र्युपायाः ।
श्रीमद्यतीन्द्र प्रियवेङ्कटेश-
गुर्वङ्घ्र्युपायावयमेवधन्याः ॥ ५८

सशङ्खचक्रलाञ्छनस्सदूर्ध्वपुण्ड्र मण्डित-
स्स कण्ठलग्न सत्तुलस्यनर्घपद्ममालिकः ।
सितान्तरीयसूत्तरीय यज्ञसूत्र शोभितो
ममा विरस्तु मानसे गुरुस्स वेंङ्कटेश्वरः ॥ ५९

निगमान्तदेशिकपदाम्बुजद्वयं
निरसूयवैष्णवजनप्रियं धनम् ।
कुलदैवतं मम कुदृष्टिमस्तक-
क्षितिभृद्विभेदि कुलिशायुधायितम् ॥ ६०

महोत्पलायितपाद युगलं
रतिप्रियेषुधि रोधिसुजङ्घिकम् ।
ककुत्समानसुजानुक मञ्चित-
स्फुरत्कटीविलसत्परिधानकम् ॥ ६१

प्रशस्तनाभिकमुज्ज्वलवक्षसं
प्रसन्न सस्मित सन्मुखपङ्कजम् ।
मदीयहृत्कमलासन संस्थितं
भजामि वेङ्कटनाथ विपश्चितम् ॥ ६२

प्रबुद्धतामरसाभविलोचनं
प्रसिद्ध शिष्यजनैः परिवारितम् ।
प्रबद्धरागतमं गुरुपादयोः
प्रबुद्ध चेतसमर्थसमर्थने ॥ ६३

सरत्नकम्बलपीठ परिग्रहं
समर्थमुत्थित संशयनोदने ।
विरक्त सज्जन संघशिरोमणिं
भजामि वेङ्कटनाथ विपश्चितम् ॥ ६४

कवितार्किक कलभव्रजकबलीकृतिसिंहं
कमलापतिकरुणारसपरिवर्धित बोधम् ।
यतिनायकपदपङ्कजयुगली परतन्त्रं
भजमानसबुधवेङ्कटपतिदेशिकमनिशम् ॥ ६५

यति नृपतिपदकमलसकलविधबन्धुं
करिशिखरिपति नगर सुचिरकृतवासम् ।
भज हृदय कविकथक हरिमपिच रङ्ग-
क्षितिरमणचरणयुगसततकृतसेवम् ॥ ६६

अतिमृदुलमनसमति विपुल शुभनेत्रम्
अतिचतुरमधिकगुणयतिनृपतिभाष्ये ।
उपकरणपरमनिशमयकरणशीले-
ष्वपिकलय मम हृदय कविकथक सिंहम् ॥ ६७

भोनिगममौलियुगदेशिकदयामृतसमुद्र भगवन्
मामकमिदं वचनमद्य शृणुनाथ कवितार्किक हरे ।
सोऽह मति खिन्नमिह वीक्ष्य जनमत्र भवदङ्घ्रि विमुखं
त्वं च कुरुतावकपदाम्बुजयुग प्रवणमद्य कृपया ॥ ६८

किंच मम मानसमिदंच समुदञ्चितमिहान्यविषये-
ष्वञ्चतिनजातु कविवादिकरिपञ्चमुखतावकपदम् ।
वञ्चनपरं शठमकिंचनजनप्रियसपञ्चशरजं
चञ्चलमिदं पुनरचञ्चलतरं कुरु भवच्चरणयोः ॥ ६९

श्रीवेङ्कटेशस्य गुरोः पदाब्जयोः
समर्पिता सप्ततिरत्नमालिका ।
धृता सुधीभिर्हृदये विमत्सरैः
पुष्णातु शोभां पुरुषार्थनिर्भराम् ॥ ७०

वेदान्ताचार्य सप्तत्या गुणवत्या परिष्कृतः ।
वेदान्तवेद्य श्रीभाष्यकार कारुण्य गोचराः ॥ ७१

वीतरागा विशिष्टार्था वेदान्ताचार्य सप्ततिः ।
वैष्णवैस्सादरं ग्राह्या विद्वद्भिर्वीतमत्सरैः ॥ ७२

प्रतिवादि भयङ्करेणसा
सुधिया सप्तति रत्नमालिका ।
निगमान्तगुरौ समर्पिता
हृदयेतं भजतां स्वयाधिया ॥ ७३

कवितार्किकसिंहाय कल्याण गुणशलिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवेनमः ॥

इति श्रीमत्प्रतिवादिभयङ्करार्यनार्य
विरचिता श्रीमद्वेदान्तदेशिक सप्तति
रत्नमालिका संपूर्णा ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

—०—

शुद्धाशुद्ध पत्रिका

पुट	श्लोक	पंक्ति	अशुद्ध	शुद्ध
४	२५	३	शरण्यं	शरण्य
२२	१३	४	कापितनौः	कापितनौ
२७	१०	३	कलापः	कलापैः
२६	२१	१	विनिर्मिता	विनिर्मितां
३०	६	३	विमलमनसा	विमलमनसां
३१	१२	४	विश्रमं	विभ्रमं
३२	१५	४	स्थिरसमुदया	स्थिरसमुदयां
३२	१६	४	तस्या तस्यामहमहमिकां	तस्यांतस्यामहमहमिकां
४१	१	३	कामधेनु	कामधेनुं
४१	२	१	प्रिय	प्रियस्ते
६५	७	१	एकादश्यामुमुक्ति	एकादश्यामभुक्ति
६६	१२	४	यथाईम्	यथार्हम्
६७	१७	३	डाकैकात्यंत लश्या	डाकैकात्यन्त लभ्या
७०	२	३	भुजास्पदेश	भुजापदेश
८७	३	१	बहुतमोहभाजा	बहुलमोहभाजा
८६	३	१	निश्चतः	निश्चितः
६१	२८	४	परिसरेपु	परिसरेषु
६३	४	१	पक्षिवत्क्र	पक्षिवक्त्र
६५	१	४	गारूतत्मतं	गारूत्मतं
६५	३	२	घिषणयात्साभिरजनि	घिष्ण्यात्मभिरजनि
१०१	३७	१	शिखादीप्र	शिखादीप्तः
१००	३१	१	कोटिवक्रं	कोटिवक्र्
१०३	४७	४	अरातिपक्षः	अरातिपक्षैः
१०३	४६	४	नरकविहयते	नरकविहतये
१५७	२	३	प्रणायिनां	प्रणयिनां
१५७	३	४	सुरासुरेन्द्रः	सुरासुरेन्द्राः

१५७	४	२	सत्फलष्त्वम्	सत्फलत्वम्
१५८	६	३	दहशुर्भवन्ततं	दहशुर्भवन्तं
१५८	७	१	विमर्द जन्मा	विमर्दजन्मा
१५९	१४	२	शिशुं मारम्	शिंशुमारम्
१५९	१५	३	त्तोत्रप्रिय	स्तोत्रप्रिय
१७८	७५	१	अतिविधिशिवैः	अतिविधिशिवैः
१८२	१०१	३	तैरेत्र	तैरेव
१८८	३२	१	नर्मलीला	नर्मलीलां
२१३	६	२	तद्गध	तद्‌गध
२१४	१४	२	ताञ्यात्यु	तांचाप्युपादान
२१५	२१	३	आबध्य	आबद्ध
१२६	२३	२	गुरूत्तमस्य	गुरूत्तमस्य